# Poem on Ujjayini

# ઉજ્જયિની કાવ્યમ્

## Document Information

Text title : ujjayini kaavya

File name : ujjayini.itx

Category : major_works

Location : doc_z_misc_major_works

Author : Original Malyalam by ONV Kurup Sanskrit by NVP Unithiri

Transliterated by : NVP Unithiri unithiri at sify.com, anandavardhanan at yahoo.com

Proofread by : NVP Unithiri unithiri at sify.com, anandavardhanan at yahoo.com

Latest update : November 30, 2001

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# ઉજ્જયિની કાવ્યમ્

પ્રથમઃ સર્ગઃ

એકાન્તતાયાઃ કારાગૃહે

સન્ધ્યા ગતા મુહુરથોજ્જયિનીસકાશાદ્
વિન્ધ્યાદ્રિસાનુગતકાનનરમ્યવીથ્યા ।
કસ્માદ્ ભવાનિહ સમાગત એકતો મે
જિજ્ઞાસયા સહ મયાપ્યનુગમ્યમાનઃ ॥ ૧॥

દૃષ્ટ્વા સુતં વિરહતઃ પુનરાગતં સો-
મ્યાગમ્યતામિતિ સમાર્દ્રવચો જનન્યાઃ ।
શ્રુત્વા ભવાનિહ મયૂરશતસ્ય કણ્ઠા-
દુદ્ભિન્નકીચકમનઃક્ષતતો વિહઙ્ગાદ્ ॥ ૨॥

ઉદ્ગાસ્યતઃ કુટજશાખિગતાદરણ્ય-
ગીતોપમં સમવધાય વિરાજતે કિમ્ ।
યાત્રા સુદીર્ઘવિપુલેયમહો સમાપ્યે-
ત્યાલોચ્ય કિં ઝટિતિ તિષ્ઠસિ કાતરસ્ત્વમ્ ॥ ૩॥ યુગ્મકમ્
આલોલમાકલિતમારુતદોલનોત્ક-
શાખોજ્જ્વલદ્બકુલમૂલશિલાતલેઽસ્મિન્ ।
ક્ષીણો નિષદ્ય ચ ભવાન્ સમપોહિતું દૂ-
રાધ્વક્લમૌગ્ર્યમલસં પરિતો દદર્શ ॥ ૪॥

તાવત્સમાપ્ય ગગને દિનદીર્ઘયાત્રાં
સોપાનતઃ સમવરોહતિ ભાનુમાંશ્ચ ।
દૂરે તુ માળવમથાહિતમૌનમામ્ર-
મેઘસ્વરૂપમિવ ભાત્યનુચક્રવાળમ્ ॥ ૫॥

શ્યામાગ્રશિષ્ટકનકોજ્જ્વલપીનભૂમિ-
વક્ષોજતુલ્યમતિતુઙ્ગગિરિર્વિભાતિ ।

સ્રસ્તાંશુકાભમિહ તસ્ય તટે લસન્તિ
ચૂતાઃ સપલ્લવકરા નિબિડા મનોજ્ઞાઃ ॥ ૬॥

આરાદહો જનકજાપ્લવપુણ્યતીર્થ-
સ્નાનાર્દ્રમારુતસુખોચ્છ્વસિતાનિ વાન્તિ ।
શાન્તેઽપિ રામગિરિપુણ્યતમાશ્રમેઽસ્મિન્
તાન્તોઽસ્ત્યશાન્તહૃદયશ્ચ ભવાન્ નિષણ્ણઃ ॥ ૭॥

એકાન્તવિક્લબમુહૂર્તનિવારણાર્થ-
મન્યસ્ય સન્નિહિતતાપ્યલમિત્યચિન્તિ ।
છાયાં વિહાય વિવૃતે મયિ તિષ્ઠતીહ
વેગાદ્ ભવાનપિ સસમ્ભ્રમમન્વપૃચ્છત્ ॥ ૮॥

કસ્ત્વં દિદૃક્ષતિ ભવાન્ ગહને કમસ્મિ-
ન્નેકાન્તબન્ધનગૃહે વિજને નિગૂઢમ્ ।
અજ્ઞાતમેવ સવિશઙ્કમિમં નિરીક્ષ્ય
તિષ્ઠન્તમઞ્જલિયુતોઽસ્મિ ભવન્તમારાત્ ॥ ૯॥

ઉક્તં મયાથ - પથિકોઽહમનાદિકાલ-
વીથ્યામિહાત્મનિ નિધાય તુ પૂજયે ત્વામ્ ।
ભીતોઽસ્મ્યહં ચ સતતં પરિપૂજકેભ્ય-
સ્તત્રાપિ રાજકૃતપૂજનમાપદેવ ॥ ૧૦॥

વિશ્વાસ્યતાં મયિ ન મેઽસ્ત્યધિકારપૂજા
નિઃસ્વોઽસ્મિ તે સુકવિતાપરિપૂજકોઽહમ્ ।
પ્રસ્થાય તત્ર નગરાન્મહિતોજ્જયિન્યાઃ
પદ્ભ્યાં ચરંસ્ત્વમિહ રામગિરિં પ્રવિષ્ટઃ ॥ ૧૧॥

યુષ્મત્પ્રયાણમિદમેવ કિમર્થમેત-
દસ્વાસ્થ્યમન્તરિહ માં નયતીતિ સત્યમ્ ।
અસ્વાસ્થ્યમન્તરિતિ માં પ્રતિ કિન્નુ તાવાન્
બન્ધો મિથઃ ક ઇતિ વાં વદ માં યથાર્થમ્ ॥ ૧૨॥

વક્તું યથાવદહમપ્રભુરપ્યથૈતદ્
ભાવસ્થિરં ચ જનનાન્તરસૌહૃદં સ્યાદ્ ।
કાલાતિવર્તિકવિતાનિચયઃ સ માદૃક્ -
પાન્થસ્ય કાલપથસઞ્ચરતોઽસ્તિ પથ્યઃ ॥ ૧૩॥

ક્લેશાતિતપ્તમથનાદુતિતા સુધા નુ
નૈજાત્મશોણિતભવા તવ કાવ્યપાત્રે ।
તત્પાનજન્યલહરીધૃતદેવભાવ-
મર્ત્યેષુ કશ્ચિદહમપ્યથ માં વદાશુ ॥ ૧૪॥

કસ્માત્તવેહ વિજને ભવતિ પ્રવાસ
શ્ચૈકાન્તસીમનિ કુતો હ્યભયઙ્ગતસ્ત્વમ્ ।
એકાન્તતા મમ હિતેત્યહિતા ન સાપિ
નિર્બન્ધિતા યદિ સુધાપિ ભવેન્નુ તિક્તા ॥ ૧૫॥

યન્મર્ત્યજન્મસહજા ત્વસહાયતૈવ
સત્યં તદાસ્યપટવિશ્ળથિતા મુહૂર્તાઃ ।
નિશ્શબ્દમેવ ગળિતાસ્તદનુ પ્રશાન્ત
મસ્વસ્થિતોઽપ્યધિકતઃ પરિપૃછસીત્થમ્ ॥ ૧૬॥

કારાગૃહં ચ મયિ કેનચિદાજ્ઞયેય
મારોપિતા વિજનતેતિ હિ મન્યસે કિમ્ ।
સત્યં ક્ષમસ્વ સદયં મહિતોજ્જયિન્યાં
સાર્વત્રિકં સુવિદિતં નનુ ચૈવમેવ ॥ ૧૭॥

રાજપ્રકોપવિષયઃ સુકવિર્બહિષ્કૃ
તોઽભૂદિતિ શ્રુતિરથાત્થ ચ કોઽપરાધઃ ।
જાને ન કિઞ્ચિદપિ સૂક્ષ્મતયા તથાપિ
વાર્તાઃ શ્રુતાસ્ત્વિહ ભવાન્ નિજસોદરી ચ ॥ ૧૮॥

પ્રેમાકુલાવિતિ નૃપઃ ક્રુધયાદિદેશ
ચૈકાન્તતાં કિલ કવે તવ વર્ષભોગ્યામ્ ।
સર્પેણ દષ્ટ ઇવ હા સહસોત્થિતોઽતિ
ક્ષુબ્ધસ્ત્વમૂચિથ ગિરઃ સ્વગતસ્વરૂપાઃ ॥ ૧૯॥ યુગ્મકમ્
રાજસ્વસુઃ પ્રણયિતા મમ કોઽપમાનો
જાનન્તિ કિં કવિમનોઽપ્યધિકાલિદાસમ્ ।
કો વાપમાન ઇતિ કિં પ્રણયોઽપમાનઃ
ક્ષોભોઽયમન્તરિહ તત્સ્મરણાત્ કુતો વા ॥ ૨૦॥

સ્વર્ગપ્રભાવલયિતામનુચક્રવાળ

રેખં વિલોકયતિ વોજ્જયિનીં મનોજ્ઞામ્ ।
અત્યુત્કટવ્યથમિહ સ્થિતવાનથ ત્વ
મુન્મત્તવદ્વદસિ વાચિકમેવમુચ્ચૈઃ ॥ ૨૧॥

સ્નિગ્ધોઽહમુજ્જયિનિ હા ત્વયિ કિન્તુ નૈવ
ત્વત્પ્રોજ્જ્વલત્પ્રમદપુષ્પવનીષુ નૈવ ।
કામાકુલાલુળિતનેત્રચયેષુ નાપિ
લજ્જવિહીનમદલોભનપુઞ્જિતેષુ ॥ ૨૨॥

સર્વં મયા વિગણિતં તૃણવત્ પરન્તુ
દુઃખં વ્યધા હૃદિ મમાત્યપમાનજન્યમ્ ।
કસ્માત્ત્વમુજ્જયિનિ રાગવતી જનેઽસ્મિ
ન્નાસીઃ કિમેતદિહજન્મનિ વક્ષ્યસિ ત્વમ્ ॥ ૨૩॥

આત્માતપપ્રમથિતાનિ ચ તદ્વચાંસિ
સમ્મૂર્ચ્છિતોત્કિરણકા ભવતિ ત્રિસન્ધ્યા ।
ખદ્યોતરાજિરિહ પર્ણતતૌ પ્રદીપં
પ્રાકાશયદ્ભુવિ તતે ગગને ચ તારાઃ ॥ ૨૪॥

ક્ષોણીધરસ્થકટકાવૃતચૂતવાટે
શ્યામાભવીચિનિકરાઃ શિથિલીભવન્તિ ।
ગાધેતરોષ્ણપરિવાહગણોપરિ પ્ર
શાન્તાબ્ધિવત્ કવિરિહાત્મપદે વિભાતિ ॥ ૨૫॥

સાન્ત્વોક્તિભિર્ન હિ કથઞ્ચન શુષ્કભૂતો
બાષ્પામ્બુબિન્દુરથ સઞ્જ્વલતીહ જીવે ।
અન્તે પરસ્પરમહો પરિવર્ધમાનં
મૌનં વિભઞ્જયિતુમેવમહં ત્વવોચમ્ ॥ ૨૬॥

સાક્ષીકુરુષ્વ સદયં ભવદાત્મતાપ
સન્તપ્તસત્યતપનસ્ય ચ મામપિ ત્વમ્ ।
શશ્વદ્ભવિષ્યતિ પુરી ન ચ વિક્રમાર્ક
ભૂપાલકેન પુનરુજ્જયિની ત્વયૈવ ॥ ૨૭॥

ત્યક્ત્વા પુરં તદધિકોજ્જ્વલમત્ર કસ્મા
દેકો ભવાન્ વિજનરામગિરિં ગતોઽભૂઃ ।
ગાસ્યામિ તાં તદનુ ભાવિપરમ્પરાર્થ-

મુગ્રાપવાદદળિતામિહ સત્યગાથામ્ ॥ ૨૮॥

એવં ભવાનવધિહીનસુદીર્ઘદીર્ઘ-
કાલાખ્યદુર્ગમવિશાલમહાપથેન ।
ગચ્છન્તમધ્વગમિમં કવિપૂજકં સ-
દાશીરનુગ્રહગિરા મુદિતં કુરુષ્વ ॥ ૨૯॥

ક્ષોણીધ્રસાનુગતચૂતતરૂત્કરેષુ
ગન્ધં પ્રસારયતિ પલ્લવકુડ્મળાનિ ।
પુષ્પાણિ પૂરિતકરાઞ્જલિકાનિ સન્તિ
પુષ્પાન્તરપ્રસૃતરેણુભિરાત્તગન્ધૈઃ ॥ ૩૦॥

સ્વપ્નાવલીમધુઘટૈરૃતુરાજયાત્રા
સત્કારભોજનમહોત્સવ આવિરસ્તિ ।
એતત્પરં વિપરિણામમનોહરાસ્તે
ગ્રીષ્મર્તુવાસરગણાઃ પરિવર્ધયન્તિ ॥ ૩૧॥

જ્ઞાત્વા ન કિઞ્ચિદિહ યત્પરિવર્તતે તત્
સર્વં સ્થિતોઽસ્મિ નિકટે તવ જાગરૂકઃ ।
કાવ્યં તદાલિખસિ મે હૃદયાવબોધ-
ભૂર્જત્વચિ પ્રવિતતાખિલભાવરમ્યમ્ ॥ ૩૨॥

કાવ્યં ચ તદ્વિવૃતમેવ પઠામિ સમ્યગ્
ભૂયોઽપ્યહં હૃદયશોણિતચર્ચિતાર્દ્રમ્ ।
કાલશ્ચ તન્નિશમનાર્થમુપૈતિ ભાવિ-
કાલોઽપિ દત્તહૃદયઃ શ્રવણેચ્છુરાસ્તે ॥ ૩૩॥

---

દ્વિતીયઃ સર્ગઃ

પ્રથમકુડ્મળાઃ

એકાકી સ નદીતીરે મૂલે વટતરોરધઃ ।
ભૂર્જપત્રે કૃશે કિઞ્ચિત્ સ્મારં સ્મારં લિખન્ સ્થિતઃ ॥ ૧॥

સ્ફુટતિ પ્રથમં ચૂતકુસુમે હ્યૃતુમઙ્ગળે ।
મણિભૃઙ્ગ ઇવાસ્મિન્ કિં ભ્રમત્યસ્ય વિલોકિતમ્ ॥ ૨॥

પ્રચણ્ડસૂર્યસન્તપ્તશ્ચન્દ્રિકાશાપ્રવર્ધકઃ ।

દિનાન્તરમણીયઃ કિં નિદાઘોષ્ણસ્તપોજ્જ્વલઃ ॥ ૩॥

નિજાત્મનઃ કિમૂષ્મા કિં તરુણારુણકામિતમ્ ।
લિલેખ ભૂર્જપત્રેઽસ્મિન્નર્ઘબોધોઽયમદ્ય કિમ્ ॥ ૪॥ યુગ્મકમ્
તસ્મિન્નતિમૃદુશ્રુત્યા મધુરં ગાયતિ ક્ષણમ્ ।
હૃત્તોષમધુબિન્દૂનામાસ્વાદનમભૂત્ કિમુ ॥ ૫॥

અન્યસ્ય કસ્યચિત્ કર્ણે તદાલાપાય મન્ત્રવત્ ।
અકામયત્ કિં પક્ષી ચેદ્ ગાયેદ્ વીક્ષ્ય વિહાયસમ્ ॥ ૬॥

શ઼ૃણોતિ ગાયેત્ પક્ષી ચેન્નાદલક્ષ્યં નભઃ સદા ।
શ઼ૃણોતિ કો વા સદયં તદુક્તં હિતસુન્દરમ્ ॥ ૭॥

સ્મૃતૌ સ્વગુરુનાથસ્ય તેજોરૂપં વિભાતિ કિમ્ ।
અસ્તુ તે શુભમિત્યુક્ત્વા યો મે મૂર્ધ્નિ સ્પૃશન્ સ્થિતઃ ॥ ૮॥

આશ્રાવયન્ માં યઃ સામમન્ત્રં મન્દ્રગભીરકમ્ ।
દર્શને ગરુડોઽપ્યન્તરત્યન્તાર્દ્રમનાશ્ચ યઃ ॥ ૯॥ યુગ્મકમ્
પઠને નાવધાનેન કદાચિત્ ગુરુસન્નિધિમ્ ।
ત્યક્ત્વાસ્મિંસ્તટિનીતીરે સાયંકાલે સમાગતે ॥ ૧૦॥

યદત્ર માળવગ્રામે ધરાસૌન્દર્યધારયા ।
ઋતુલાસ્યવિલાસૈશ્ચ હૃતમાનસમાસ્થિતમ્ ॥ ૧૧॥

યત્પુરા યત્ર કુત્રાપિ ચરન્તં શિષ્યમઞ્જસા ।
નેતું ગુરોર્નિયોગેન મિત્રેણૈકેન ચાગતમ્ ॥ ૧૨॥

મહાપ્રકૃત્યાત્મપાઠશાલાં સન્ત્યજ્ય સત્વરમ્ ।
આચાર્યસન્નિધાનં સમાદરેણ ગતં ચ યત્ ॥ ૧૩॥

સ્ખલદ્દ્રુતિકપાદાભ્યાં સન્તપ્તમનસા સહ ।
ગુરુકોપાનલજ્વાલાદહનાર્થં યદાસ્થિતમ્ ॥ ૧૪॥

કઠોરદણ્ડદાનાર્થમાજ્ઞાપયતિ યત્તથા ।
પ્રશિક્ષિતેષુ સૂક્તેષુ પાઠમર્થં ચ કસ્યચિત્ ॥ ૧૫॥

વક્તું ક્રમાદ્યદાચાર્યેણાજ્ઞાપિતમથાદરાત્ ।
પાઠશ્ચાર્થશ્ચ સુસ્પષ્ટાવુક્તાવુચ્ચૈશ્ચ યદ્ દ્રુતમ્ ॥ ૧૬॥

પ્રતપ્તપ્રસ્તરાદ્ ગૈરેયામોદપ્રસરો યથા ।

આચાર્યેણ તદા વાત્સલ્યામૃતં વર્ષિતં ચ યત્ ॥ ૧૭॥

માળવસ્યાભિમાનસ્ત્વં ભવેતિ પરિતોષતઃ ।
ઉદિતં યચ્ચ કારુણ્યાન્મૂર્ધ્નિ વિન્યસ્ય પાણિના ॥ ૧૮॥

તત્સર્વં સ્મરણે ભાતિ લિખિતં યદિહાખિલમ્ ।
તદ્ દ્રુતં ગુરુવર્યસ્ય સન્નિધૌ વાચયામિ કિમ્ ॥ ૧૯॥ કુળકમ્
સમસ્યાપૂરણં દૃષ્ટ્વા તમાહ ગુરુરેકદા ।
વિજેષ્યતે કદાચિત્તે સૂક્તિરુજ્જયિનીમપિ ॥ ૨૦॥

આશીર્વાદાતિરિક્તોઽર્થસ્તસ્ય દૃષ્ટો ન કેનચિત્ ।
આચાર્યસ્ય ક્રાન્તદૃષ્ટેર્વાચમર્થોઽનુધાવતિ ॥ ૨૧॥

મનસઃ સ્મૃતિકોણેઽસ્મિન્ સ્વર્ણસિંહાસનોપરિ ।
મૃત્યતીતયશોરૂપો વિભાત્યદ્યાપ્યસૌ ગુરુઃ ॥ ૨૨॥

અથાલિખત્યસૌ નત્વા મનસા પાદયોર્ગુરોઃ ।
પ્રકૃત્યાઃ પરિણામિન્યા વર્ષારમ્ભં પદૈઃ ક્રમાત્ ॥ ૨૩॥

મેઘદ્વિપૈશ્ચ વિદ્યુદ્ભિર્ધ્વજૈશ્ચ ધ્વનિમર્દળૈઃ ।
વર્ષાકાલઃ કામિચિત્તહર્ષં વર્ધયતીતિ યત્ ॥ ૨૪॥

વલાહકઃ શ્રોત્રમનોહરારાવસ્તૃષાજલમ્ ।
સન્તપ્તેભ્યશ્ચાતકેભ્યો વૃષ્ટ્વા મન્દં પ્રયાતિ યત્ ॥ ૨૫॥

સૌદામન્યા ગુણં કૃત્વા શક્રચાપં દધદ્ દ્રુતમ્ ।
પ્રવાસિજનહૃદ્ભેદિ ધારાપાતં કરોતિ યત્ ॥ ૨૬॥

પ્રોત્થિતૈઃ કન્દલીજાલૈર્વૈદૂર્યાભૈસ્તૃણાઙ્કુરૈઃ ।
ઇન્દ્રગોપૈશ્ચોજ્જ્વલિતા ભાતિ યચ્ચ વસુન્ધરા ॥ ૨૭॥

યદ્ વિકલ્પ્ય દ્રુમલતાઃ સઙ્ઘર્ષેણાવરોહણે ।
તત્સુગન્ધસમાસ્વાદે ભાગભાજૌ ઘનાનિલૌ ॥ ૨૮॥

બાલાર્જુનપ્રસૂનાનિ નવકેસરપલ્લવાઃ ।
કેતકીસૂચયઃ શ્યામશ્વેતારુણસુમાન્યપિ ॥ ૨૯॥

વારાઙ્ગનાનામભવન્ વર્ણભૂષાયિતાનિ યત્ ।
તત્સર્વં ચિત્રિતં તેન ભૂર્જપત્રેષુ સાંપ્રતમ્ ॥ ૩૦॥ કુળકમ્
જાજ્વલ્યમાનગ્રીષ્માયાં વાચિ કિં કન્દળોદયઃ ।

ઉષ્ણતપ્તપ્રવાહાયાં વાચિ શીતદ્રવઃ કિમુ ॥ ૩૧॥

મૃદ્ગન્ધો વા વચસિ કિં નૂતનાસારશીકરે ।
વર્ષર્ત્વાલિઙ્ગને મહ્યાઃ કિમેષ પુળકોદ્ગમઃ ॥ ૩૨॥

ઋતુસ્નાનાર્દ્રવસના પ્રસિદ્ધારમ્યકૈશિકા ।
લજ્જાવનમ્રા કાચિત્ કિં માળવગ્રામકન્યકા ॥ ૩૩॥

કયા વા પ્રેરિતશ્ચૈવમસ્મિન્ પત્રે લિખત્યસૌ ।
તસ્મિન્નુચ્ચૈઃ પઠત્યારાત્ તિષ્ઠન્તી કા સવિસ્મયમ્ ॥ ૩૪॥

ન પશ્યન્ત્યપિ પશ્યન્તી કિઞ્ચિત્કૌતુકમદ્ભુતમ્ ।
અભૂચ્ચ તૂષ્ણીં તિષ્ઠન્તી સા કિઞ્ચિત્ પ્રષ્ટુમુત્સુકા ॥ ૩૫॥ યુગ્મકમ્
યે સન્ત્યુદયનપ્રેમકથાકથનકોવિદાઃ ।
તેષાં ગ્રામીણવૃદ્ધાનાં મુખ્યસ્યેયં પ્રિયાત્મજા ॥ ૩૬॥

ત્રિયામાસત્રગોષ્ઠીષુ યાત્રિકાનાં નિરન્તરમ્ ।
પુરાવૃત્તસમાખ્યાનરસિકસ્ય સુવાગ્મિનઃ ॥ ૩૭॥

વિધુરગ્રામવૃદ્ધસ્ય નિધિતુલ્યેયમાબભૌ ।
માત્રભાવમહાદુઃખમજ્ઞાત્વા વર્ધિતા ચ યા ॥ ૩૮॥

પશ્યન્તી વલ્લરીવૃક્ષાન્ નિજૈકોદરસોદરાન્ ।
કુશલોક્તીર્વદન્તી યા ડયતો નીડજાનપિ ॥ ૩૯॥

નાનલ્પં વક્તિ યા કિન્તુ સ્વીયવાચ્યાતિરિક્તતઃ ।
યન્નેત્રહૃદયસ્યોક્તિઃ સ્પન્દતે તટિદુજ્જ્વલા ॥ ૪૦॥

વાતેરિતદલચ્ચૂતફલે પતતિ યા દ્રુતમ્ ।
સુગન્ધિ તદ્ ગૃહીત્વા પ્રદાતું નિશ્શબ્દમુત્સુકા ॥ ૪૧॥

કિં તે નામેત્યેકદા યા પરિપૃષ્ટા નિરુત્તરમ્ ।
લિખન્ત્યાસીદ્ ભૂતલેઽસ્મિન્ ચરણાઙ્ગુલિભિર્મુહુઃ ॥ ૪૨॥

પરુષૈઃ પિઙ્ગલૈશ્ચાપિ મૃત્પિણ્ડૈર્નિર્મિતાદ્ ગૃહાત્ ।
બહિરાગત્ય મન્દં યા નિકટે તસ્ય વર્તતે ॥ ૪૩॥

પત્રે લિખિતમાવૃત્ય પઠનેનોચ્ચકૈઃ સ્વયમ્ ।
રસમાનં તં નિરીક્ષ્ય સા તિષ્ઠતિ સકૌતુકમ્ ॥ ૪૪॥ કુળકમ્
વર્ષાકાલો યથા કાન્તો વધૂચિકુરરાજિષુ ।

જાતીસુમં ચ બકુળમાલાં ધારયતીતિ યત્ ॥ ૪૫॥

નીરમૌક્તિકહારેણ રોમરાજિશ્ચ રાજિતા ।
કદંબકુસુમૈશ્ચારુ કર્ણભૂષાયિતં ચ યત્ ॥ ૪૬॥

તત્સર્વં વર્ણયિત્વોચ્ચૈર્ગાયત્યસ્મિન્ તયા સ્થિતમ્ ।
અર્થસ્ય વર્ણરેણૂનાં સશ્રદ્ધાદાનકૃદ્ યથા ॥ ૪૭॥

નિષ્કલઙ્કમુખાત્ પ્રશ્નઃ સમુદેતીદૃશો દ્રુતમ્ ।
ન કેનાપિ શ્રૂયમાણમુચ્યતે ભવતા કિમુ ॥ ૪૮॥

મયા યદુચ્યતે સર્વં ત્વયા તચ્છ્રાવ્યમેવ કિમ્ ।
ઇત્યેવમુક્ત્વા શાન્તોઽયં સુસ્મિતં કૃતવાન્ મૃદુ ॥ ૪૯॥

અસત્યમિત્યુચૂષીવાસત્યં તત્સ્વદતીવ સા ।
પ્રસન્નગણ્ડવદના સલજ્જસ્મિતમાસ્થિતા ॥ ૫૦॥

નખક્ષતાનભિજ્ઞાતનવપલ્લવસન્નિભા ।
અનાઘ્રાતપ્રસૂનાભા યદા સા નિકટે સ્થિતા ॥ ૫૧॥

તદાસૌ સ્મૃતવાન્ સેયં માળવસ્ય પ્રિયાત્મજા
કસ્યચિચ્છૈવલાવીતલાવણ્યસ્ય સરોરુહમ્ ॥ ૫૨॥ યુગ્મકમ્
ઉદ્યાનવલ્લિભિર્વન્દનીયા કિં વનવલ્લિકા ।
વિભૂષણવિહીના કિમુમા કિં ભૂમિકન્યકા ॥ ૫૩॥

મૃગશાબૈરેધિતા કિં મનોજ્ઞા મુનિકન્યકા ।
મનસ્યસ્યાશ્ચિત્રમેવં બહુધા પરિવર્તતે ॥ ૫૪॥

ન કિઞ્ચિત્ પદમુક્ત્વા સા મન્દં મન્દં પદાન્યધાત્ ।
ન કિઞ્ચિત્ સક્તમપ્યઙ્ઘ્રૌ કિઞ્ચિત્ સક્તમિવાકુલા ॥ ૫૫॥

નિવૃત્તગમના તિષ્ઠત્યન્વેષણપરાયણા ।
નિત્યદૃશ્યં કિં તદક્ષિ કિમધ્યેયમપૂર્વતા ॥ ૫૬॥

તાતે કથાઃ કથયતિ પરિતો નિહિતા જનાઃ ।
સર્વં વિસ્મૃત્ય તાસ્વેવ લીનચિત્તા ભવન્તિ યત્ ॥ ૫૭॥

તત્તયા દૃષ્ટમિષ્ટશ્ચ પૌરાણિકકથાશ્રવઃ ।
તસ્માદલબ્ધશ્ચાનન્દઃ કથં લભ્યો ભવેદિતઃ ॥ ૫૮॥ યુગ્મકમ્
પલ્લવાઢ્યવટસ્યાર્દ્રચ્છાયાયામુપવિશ્ય સઃ ।

પત્રેષુ યલ્લિખત્યેદદજ્ઞાતં કિલ યદ્યપિ ॥ ૫૯॥

ઉચ્ચારિતં તચ્છ્રુત્વા કિમપૂર્વાહ્ળાદ ઈદૃશઃ ।
કિન્નુ ચન્દ્રોદયં દૃષ્ટ્વા સમુદ્રોદ્વૃદ્ધિરીદૃશી ॥ ૬૦॥ યુગ્મકમ્
નિદાઘતપ્તે કસ્મિંશ્ચિન્નિષ્કળઙ્કમનસ્યપિ ।
આદ્યમેઘાસારલેશેનાર્દ્રહર્ષઃ કિમીદૃશઃ ॥ ૬૧॥

શરત્તથા ચ હેમન્તશિશિરૌ ચ મહીતલે ।
સર્વાન્ ચારુતરશ્રીકાન્ કુર્વાણો મધુરેવ ચ ॥ ૬૨॥

આવિર્ભાવતિરોભાવાવેષાં લિખતિ પત્રકે ।
તસ્મિન્ વટદ્રુશાખાયાં વિદ્રુમોઽભૂદ્ધુરિન્મણિઃ ॥ ૬૩॥ યુગ્મકમ્
પ્રભાતેઽદ્યાપિ બાલાતપોત્તરઙ્ગાપગારવે ।
માળવસ્ય વસન્તર્તુલાવણ્યં પશ્યતો મમ ॥ ૬૪॥

કાર્યકારણસંબન્ધં જ્ઞાતું યેષામસાધ્યતા ।
અસ્વાસ્થ્યાન્યાત્મનોઽગાધતાયાં જાગ્રન્તિ તાનિ કિમ્ ॥ ૬૫॥ યુગ્મકમ્
પશ્ચિમાભિમુખીભૂતગ્રામવીથ્યાં નિરન્તરમ્ ।
પાર્શ્વવૃક્ષવિતાનેષુ સમ્મિળન્ત્યત્ર યાત્રિકાઃ ॥ ૬૬॥

ઉચ્ચૈસ્તૈરુચ્યમાનાસુ ભાષાસુ વિવિધાસ્વપિ ।
લઘુકૌતુકવાર્તાનાં વિષયસ્તૂજ્જયિન્યભૂત્ ॥ ૬૭॥

ઉત્તિષ્ઠન્તી મહાકાળક્ષેત્રઘણ્ટારવૈઃ પુરી ।
પ્રત્યહં સા સ્વર્ગતુલ્યા યન્નૃપઃ કલ્પવૃક્ષવત્ ॥ ૬૮॥

રાજાઙ્ગણાનિ સઙ્ગીતકાવ્યાલાપનવેદયઃ ।
નૃત્તનૃત્યોત્સવાનાં ચ ધ્વજારોહો દિને દિને ॥ ૬૯॥

તત્પુરીદર્શનં મે સ્યાદિત્યાશા સમુદેતિ કિમ્ ।
પ્રાંશુલભ્યે ફલે લોભાદુદ્બાહુર્વામનઃ કિમુ ॥ ૭૦॥

સુમનોમિળિતે તસ્મિન્ સદસ્યઙ્ગત્વસિદ્ધયે ।
અર્હઃ કિમુ સ ભૂયોઽપિ સ્મરત્યાચાર્યભાષિતમ્ ॥ ૭૧॥

વિજેષ્યતે કદાચિત્તે સૂક્તિરુજ્જયિનીમપિ ।
ગુરુકારુણ્યમેવાસ્મિન્ વચસ્યપિ ભવિષ્યતિ ॥ ૭૨॥

યાવદાત્માન્તરં સ્પૃષ્ટ્વા પ્રબોધયતિ સાંપ્રતમ્ ।

તાવત્તદીયસૃષ્ટિશ્ચ ભવેત્ કિં વનસૂનવત્ ॥ ૭૩॥

ચિન્તાપ્રવાહપતિતઃ પ્રવહત્યેવ સ સ્વયમ્ ।
દૂરાત્તેન પથા વાહારૂઢાવાગચ્છતાં તદા ॥ ૭૪॥

અન્યસ્ય વટવૃક્ષસ્ય તતચ્છાયસ્ય મૂલકે ।
અશ્વૌ વિશ્રામ્ય તાવાસ્તાં દૃશ્યસૌન્દર્યદર્શિનૌ ॥ ૭૫॥

આગતાવુજ્જયિન્યાસ્તાવેતૌ કિં રાજસેવકૌ ।
દૌત્યં તયોઃ કિમિત્યેતદ્ જ્ઞાતુમૌપયિકં કિમુ ॥ ૭૬॥

સ્વચ્છાંબુનીક્ષુકાણ્ડાંશ્ચ મધુરાણિ ફલાનિ ચ ।
ઉપદાઃ કુર્વતે તાભ્યાં સાદરં ગ્રામવાસિનઃ ॥ ૭૭॥

સુપ્રીતાવલસં દેશવીથ્યા સઞ્ચરતો મુદા ।
મન્દં મન્દં યયોઃ પશ્ચાદ્ ગચ્છતિ ગ્રામકૌતુકમ્ ॥ ૭૮॥

ઉજ્જયિન્યાસ્ત્વધીશત્વમુદ્રાં યઃ કોઽપિ સેવતે ।
સર્વોઽસાવાદરાર્હઃ સ્યાન્માળવગ્રામવાસિનામ્ ॥ ૭૯॥

આસ્તામેતત્ કિમિતિ સા નાગતાસીદિતોઽવધિઃ ।
સલજ્જા તિષ્ઠતિ સ્વસ્ય પશ્ચાદ્ ગુપ્તતનુઃ કિમુ ॥ ૮૦॥

દયાર્દ્રા વાક્ સાનુકંપા દૃષ્ટિશ્ચાભિમુખીકૃતા ।
જ્યોત્સ્નાયાં પ્રસરન્ત્યાં કિમસૌ ચન્દ્રમણિર્દ્રુતા ॥ ૮૧॥

ભાવના સા કવેઃ કસ્માત્ કન્યકાયાઃ કરે મુદા ।
બિસતન્તૂનર્પયતિ કર્ણે ચારુ શિરીષકમ્ ॥ ૮૨॥

તસ્યા મૃદુપદન્યાસાત્ પુષ્પં વહતિ વઞ્ચુલઃ ।
વિજયં પ્રાપ સા નૃત્તમત્સરે કુત્રચિત્ સુખમ્ ॥ ૮૩॥

માળવસ્યાસ્ય સા ભાતિ નિષ્કલઙ્કપ્રભાતતિઃ ।
સૈવ ભૂમિં પ્રતિ પ્રેમ ચાપ્સરઃકન્યકાગતમ્ ॥ ૮૪॥

જન્માન્તરાગતં સાનુબન્ધિ ભાવસ્થિરં ચ સા ।
સ્નેહાતુરત્વમેવેતિ મુગ્ધાસીત્ તસ્ય ભાવના ॥ ૮૫॥

કેવલે કૌતુકેઽસ્મિન્ કિં સત્યમસ્તિ તથાપિ કિમ્ ।
સ્વગતાનીદૃશાનીહ વૃથૈવોદયમાપ્નુયુઃ ॥ ૮૬॥

ગતઃ કાલો હિ ન જ્ઞાતસ્તદા દૃષ્ટા જનાવલી ।
ગ્રામવૃદ્ધગૃહસ્યાસ્ય દ્વારિ સઙ્ગમતાં ગતા ॥ ૮૭॥

કસ્માદત્યાહ્ળાદવન્તશ્ચાપૂર્વોત્સાહિનો જનાઃ ।
એતન્મહાભાગ્યમિતિ પ્રાહુઃ કિં તે પરસ્પરમ્ ॥ ૮૮॥

ગૃહનાથો ગ્રામવૃદ્ધો નૃપદૂતૌ વિશેષતઃ ।
સભાજયામાસ કિં તન્નેત્રે હર્ષાશ્રુસઙ્કુલે ॥ ૮૯॥

માળવસ્ય ગ્રામહૃદ્યલાવણ્યપ્રતિબિંબિકામ્ ।
દદર્શ કિલ તૌ તસ્ય પ્રિયપુત્ર્યાં યથાગુણમ્ ॥ ૯૦॥

ઉજ્જયિન્યાશ્ચક્રવર્તી નિસ્સારાવકરેષ્વપિ ।
અતુલ્યરત્નં દૃષ્ટ્વા ચેત્ તત્ સ્વાયત્તં કરોત્યહો ॥ ૯૧॥

અઙ્કે નિધાય સ્વાં બાલાં માતૃહીનાં પુપોષ સઃ ।
પાણિર્વા વર્ધતે પાદશ્ચેત્યતીવ સમુત્સુકઃ ॥ ૯૨॥

તાં નિજપ્રેષ્ઠતનયાં દત્તમાદાતુમેવ તૌ ।
રાજ્ઞો નિયોગં પ્રત્યક્ષં નિવેદયિતુમાગતૌ ॥ ૯૩॥

સા ચોજ્જયિન્યાં શ્વોભાવિરાજ્ઞીતુલ્યા વિરાજતે ।
આયાસ્યન્તીહ તાં નેતું જનાઃ શિબિકયા સહ ॥ ૯૪॥

નિવેદયામાસતુસ્તૌ યાત્રાતિથિમુહૂર્તકૌ ।
આહ્ળાદાતિશયસ્તત્ર પ્રતિવેશિમનસ્સ્વપિ ॥ ૯૫॥

કથાનિષણ્ણા ગ્રામવૃદ્ધાશ્ચેક્ષુકેદારપાલકાઃ ।
નીવારાણાં યવાનાં ચ ફલેષુ મદહર્ષિતાઃ ॥ ૯૬॥

તેષામયં ચોજ્જયિન્યા ગ્રામો બન્ધુરિતઃપરમ્ ।
તદેતત્ સ્મૃતિજો હર્ષઃ સર્વત્ર પરિનૃત્યતિ ॥ ૯૭॥

તેષાં મધ્યેઽપિ કિંમૂલમેતત્સર્વમિતિ સ્થિતા ।
ગ્રીષ્માનિલપરિમ્ળાનલતેવ સ્તમ્ભિતેવ સા ॥ ૯૮॥

ક્ષેત્રાદસ્માદ્ રૂઢમૂલમુન્મૂલયતિ સસ્યકમ્ ।
અન્યત્ર પાલનાર્થં કો વેતિ કિં વેત્તિ કન્યકા ॥ ૯૯॥

ન વેત્યેષા બ્રવીત્યેવં જનકસ્ત્વન્તરાન્તરા ।
અતિહાસઃ સદાપ્યશ્રુપ્રવાહે પર્યવસ્યતિ ॥ ૧૦૦॥

આગતેન પથા વાહારૂઢૌ તૌ રાજસેવકૌ ।
ક્ષ્મોરસિ ખુરાઘાતનાદમુચ્છ્રાવ્ય જગ્મતુઃ ॥ ૧૦૧॥

જનબાહુલ્યહર્ષોન્માદાવેશેષુ ન ભાગભાક્ ।
એક એવ સ્થિતઃ કૈશ્ચિન્નાવધેયઃ કથઞ્ચન ॥ ૧૦૨॥

દૂરીભૂતખુરધ્વાનદિશં પ્રતિ ઝટિત્યસૌ ।
અસ્વસ્થ એવાવલોક્ય કવિર્નિશ્શબ્દમબ્રવીત્ ॥ ૧૦૩॥

આત્મનિ ત્વાં પ્રતિષ્ઠાપ્ય સમારાધિતવાનહમ્ ।
પ્રિયોજ્જયિનિ કિન્ત્વદ્ય દ્વેષ્મિ ત્વાં રત્નહારિણીમ્ ॥ ૧૦૪॥

---

તૃતીયઃ સર્ગઃ

નીડો ન જાનાતિ ખગસ્ય દુઃખમ્

અજ્ઞાતભાવાર્થકશબ્દજાતાત્
સમાવૃતાત્ સા હ્યભયાર્થિનીવ ।
નદ્યાસ્તટં પ્રાપ્ય નિષીદતિ સ્મ
યસ્માદિયં માતૃસમા યુવત્યાઃ ॥ ૧॥

યસ્યાસ્તરઙ્ગોદિતકાતરોક્તં
નિદ્રોચિતં ગીતમિવાનુભૂતમ્ ।
તતસ્તરઙ્ગાસ્તુ ત એવ તસ્યાઃ
કદાચિદાસન્નુરુભર્ત્સનાનિ ॥ ૨॥

પ્રહસ્ય વીચીભિરિહાહ્વયન્તી -
માશ્લિષ્ય યાં મન્ત્રયતિ સ્વદુઃખમ્ ।
યામેવ ચાદ્યાપિ વિહાસશોક -
સન્દિગ્ધતાયાં શરણં ગતેયમ્ ॥ ૩॥

વ્યાપ્યેવ શાલીનસુમાળવીય -
ગ્રામીણકન્યાત્મવિષાદજાતમ્ ।
શ્યામીકૃતં વ્યોમ ઘનેન યસ્ય
છાયા નદીમપ્યકરોત્ સિતાભામ્ ॥ ૪॥

પેતુસ્તરઙ્ગા નટનશ્રમેણ

ગાયત્યયં દીનતયા ખગઃ કઃ ।
ખગેન તેનાધિગતં સ્વદુઃખં
કોઽન્યસ્તથેત્યસ્મરદેવ કન્યા ॥ ૫॥

કેઽર્થાઃ પિતુર્મિત્રકૃતાશિષાં વા
હર્ષસ્ય તેષાં પ્રતિવેશિનાં ચ ।
તે મામહો ભાગ્યવતીં વદન્તિ
ભાગ્યં કિમિત્યાહિતવિસ્મયાભૂત્ ॥ ૬॥

યત્રાત્મનઃ ક્રીડનવર્ધનાનિ
નદ્યાસ્તટેઽસ્મિન્ પુરુપલ્લવાભાઃ ।
નૃત્યન્તિ ચૂતાશ્ચ પલાશકાશ્ચ
ગાયન્તિ યત્રોન્મદનીડજાતાઃ ॥ ૭॥

દૂરાત્ ત્રિસન્ધ્યા વપતીહ શાલીઃ
પઙ્કેષુ મગ્ના ઇવ યા ન દૃષ્ટાઃ ।
તીરાગતા રત્રિતરીતિ ગીતં
તાતસ્ય ગાનં ચ વિલંબવાચિ ॥ ૮॥

પિતુઃ કથાવાચનમિઙ્ગુદીપ્ર -
દીપપ્રભાયામપિ સર્વમેતત્ ।
ઇષ્ટં મમેષ્ટં હિ સદા યદેષાં
નષ્ટં તુ કિં ભાગ્યમિતિ પ્રવક્તિ ॥ ૯॥

વિકીર્ણનીવારકભક્ષણાર્થં
ગૃહાઙ્ગણપ્રાપ્તકપોતજાતાઃ ।
સ્નેહપ્રબદ્ધૈણગણસ્તટિન્યા -
સ્તીરે રુદચ્ચાતકચક્રવાકૌ ॥ ૧૦॥

તમાલશાખાપ્રવિલંબિનીલ -
માલાપતાકાભમયૂરકશ્ચ ।
અરણ્યજંબૂવિવરેણ જાલ -
દ્વારેવ નિર્વર્ણ્ય કદાચિદેવ ॥ ૧૧॥

આલોચ્ય કિઞ્ચિત્ કુશલં વદન્તી
શારી ચ મે કેવલસોદરૌઘઃ ।
બન્ધૂનિમાન્ સ્નિગ્ધહૃદો વિહાય

યાત્રાપરત્રૈવ કિમુ સ્વભાગ્યમ્ ॥ ૧૨॥ વિશેષકમ્
પિતા રસાદાહ કથાઃ સ્વવાટી -
તરુવ્રજાઃ સન્તિ સુરાવતારાઃ ।
ગ્રીષ્મર્તુસંસ્પર્શનનિર્વૃતોઽયં
દ્રુમોત્પલો ભાતિ સુવર્ણપુષ્પૈઃ ॥ ૧૩॥

પુરા ચ યો મૂલનિષણ્ણસીતા -
કેશાવમર્શપ્રસૃતસ્વહસ્તઃ ।
સ શિંશપાદ્રુઃ સ્તબકાશ્ચ લંબ -
પ્રદીપતુલ્યા વિલસન્તિ યસ્માત્ ॥ ૧૪॥

પિકાય દત્તે મધુ ચૂતવૃક્ષ -
શ્ચાવિદ્ધમુક્તા બકુળાઃ ક્ષિપન્તિ ।
પ્રહાસતઃ પ્રાપ્તસુપર્વશાપઃ
પુનર્હસંસ્તિષ્ઠતિ સપ્તપર્ણઃ ॥ ૧૫॥

દેવા અપીમે ચ ભવન્તિ સન્તો
ભૂમિપ્રિયાશ્ચાત્ર વિરૂઢમૂલાઃ ।
અંસોપરીમાંશ્ચ સમુહ્ય નેતું
સાન્દોળકઃ પ્રાપ્સ્યતિ નેહ કશ્ચિત્ ॥ ૧૬॥

સકુડ્મળા યે કુસુમૈશ્ચ યુક્તાઃ
ક્ષૌમં વસાના નટને નિમગ્નાઃ ।
આગન્તુકાન્ બાલસમીરણાન -
પ્યવ્યક્તગાનોત્કવિહઙ્ગમાંશ્ચ ॥ ૧૭॥

વદન્તિ માં ચાપિ કદાચિદેતે
પત્રાવલીબન્ધુરમર્મરોક્તીઃ ।
કથં ત્યજેયં સુદૃઢાર્દ્રબન્ધ -
મેતં કથં વા કથયામિ યાત્રામ્ ॥ ૧૮॥ યુગ્મકમ્
ગચ્છામિ યદ્યેષ સખા રસાલાઃ
કસ્મૈ પ્રયચ્છેત્ પ્રથમં ફલં સ્વમ્ ।
મયાંબુસેકૈઃ પરિવર્ધિતેયં
લતા ભવેત્ કુડ્મળિતા કદા નુ ॥ ૧૯॥

અમાતૃકન્યાહૃદયાતપોઽયં

ભાષાન્તરાલેખસમં સ્વપિત્રા ।
અજ્ઞાત એવાત્ર તદીયરમ્ય -
નેત્રાન્ત એવાસ્તમિતઃ ક્રમેણ ॥ ૨૦॥

ઉત્થાય તસ્માત્ તટિનીતટાત્ સા
માર્ગેણ તેનૈવ ચ ગચ્છતિ સ્મ ।
ક્ષણાદહો નાતિવિદૂરદેશે
વટદ્રુમોઽભૂદ્વિષયસ્તદક્ષ્ણોઃ ॥ ૨૧॥

ઈષન્નતસ્તસ્ય વટસ્ય મૂલે
ભાલસ્થલં પાણિતલેઽથવા સ્વામ્ ।
મનોગતાનાં ધુરમેવ ખિન્નો
વહન્નિષણ્ણોઽસ્તિ ક એષ વા સ્યાત્ ॥ ૨૨॥

સ્તબ્ધા ગતિસ્તત્ર સગદ્ગદાયા -
સ્તસ્યાઃ કિમજ્ઞાતનિમિત્તમેવ ।
સોઽયં દિદૃક્ષાવિષયસ્તથાપિ
સન્દિગ્ધપાદા ચ તથૈવ તસ્થૌ ॥ ૨૩॥

ગચ્છાથ તસ્મિન્ પ્રિયમાનસે ત્વ -
દસ્વાસ્થ્યભારાનવરોપય ત્વમ્ ।
ગચ્છેતિ મન્ત્રો ધ્વનતીવ તન્મા
ગચ્છેતિ કેન પ્રતિષિદ્ધ્યતે વા ॥ ૨૪॥

ઈષદ્દ્યાપૂર્ણપદપ્રયોગાત્
પરં ન કિઞ્ચિન્મમ તસ્ય ચાસ્તિ ।
લિખત્યસૌ પત્રતતૌ ચ કિઞ્ચિત્
પઠત્યથૈતચ્ચ સતાળમુચ્ચૈઃ ॥ ૨૫॥

પાઠોઽપ્યયં મચ્છ્રવણાર્થમેવે -
ત્યુક્તં ચ તેનૈકદિને તતઃ કિમ્ ।
ન કિઞ્ચિદેવેતિ ન કિઞ્ચિદેવે -
ત્યુક્તિર્હૃદઃ પઞ્જરકીરતુલ્યા ॥ ૨૬॥

પરન્તુ હા શ્રૂયત એવ હૃદ્ય -
સ્વરોઽપરસ્તુલ્યબલો યથૈવમ્ ।
અન્યસ્ય દુઃખાનિ સહાનુભૂત્યા

જાનાતિ યોઽન્યો ન ભવેત્ તવાસૌ ॥ ૨૭॥

તેજઃ કિમાભાતિ ચ તસ્ય નેત્રે
ગાનાત્મકત્વં ચ વચસ્યપૂર્વમ્ ।
શ્રુતં મયાત્યલ્પવચસ્તદોષ્ઠાત્
સદા તથાપિ શ્રવણોત્સુકાસ્મિ ॥ ૨૮॥

ગચ્છેહ લજ્જાં ત્યજ શઙ્કયિત્વા
મા તિષ્ઠ ગત્વા તવ રાગસૂનમ્ ।
તત્પાદયોરર્પય કિન્તુ તસ્યાઃ
પાદૌ કુતશ્ચિત્ સ્થગિતૌ સશઙ્કૌ ॥ ૨૯॥

સોઽયં ત્વદપ્રાપ્યવિચારણીય -
શ્રૌતોન્નતબ્રાહ્મણગોત્રજાતઃ ।
ક્વાસૌ યુવા ચ ક્વ પુરાકથાનાં
ગાતુશ્ચ સાધોસ્તનયા વરાકી ॥ ૩૦॥

કસ્માન્મયાલોચિતમેવ ચૈતત્
સર્વં નિષિદ્ધં ખલુ ધર્મશાસ્ત્રૈઃ ।
એવં પુનશ્ચિન્તનધર્મશઙ્કા -
કુલા ચ તસ્થૌ પરિશુદ્ધચિત્તા ॥ ૩૧॥

નિવર્તિતું સા ન શશાક ચૈકા -
ન્નિમન્ત્રણાત્ ક્ષોભકરાદતીવ ।
ઇષ્ટાનિ સર્વાણિ યદાત્ર યસ્યા
નષ્ટીભવેયુશ્ચ રહસ્તદાસ્મિન્ ॥ ૩૨॥

ઉદિત્વરામાન્તરચિત્તકોણે
સ્નેહપ્રભામાત્મન એવ મન્યે ।
સૂર્યં નિજં શ્લિષ્યતિ ગાઢમેવ
યાવન્મૃતિ પ્રાઘુણિકં હિમાણુઃ ॥ ૩૩॥ યુગ્મકમ્
યદેહ કન્યા ન યયૌ ન તસ્થૌ
તદા હયાનાં ખુરનાદરાજિઃ ।
તદ્રાજરથ્યાં પ્રચકંપ તામ -
પ્યાન્દોળશબ્દાઃ પ્રસરન્તિ વાયૌ ॥ ૩૪॥

ઉદેતિ ધૂળીપટલઃ સશબ્દો

મ્લાયન્ત્યનુષ્ણાતપરશ્મયશ્ચ ।
જનાઃ સમન્તાદિહ રાજવીથ્યાં
સોત્કણ્ઠચિત્તાઃ સહ સમ્મિળન્તિ ॥ ૩૫॥

કશ્ચિત્ ખગઃ સમ્પરિભીત એવ
નીડં વિશત્યસ્ય ચ રોદનસ્ય ।
રવોઽપિ નિર્લ્લીયત એવ ચગ્ચૌ
નીડો ન જાનાતિ ખગસ્ય દુઃખમ્ ॥ ૩૬॥

ગન્ધોળિસઙ્ઘશ્ચ યથા કુતોઽપિ
કોલાહલૈરેતિ યથા રવૌઘઃ ।
આન્દોળિકાનાં સમુપૈતિ યસ્ય
સંવર્ધને સંવસથો નિમગ્નઃ ॥ ૩૭॥

રવઃ સ મન્દાયત એવ ભૂમા -
વાન્દોળિકા સાપ્યવતીર્યતે ચ ।
દૂરે તુ કશ્ચિદ્ વટવૃક્ષપત્ર -
ચ્છાયાત્તિરોઽભૂદપરત્ર વેગાત્ ॥ ૩૮॥

તદ્ગ્રામવૃદ્ધાઙ્ગણકે નિશાયાં
ગાયન્તિ તન્મિત્રગણાશ્ચ ગીતમ્ ।
અસ્ત્યુજ્જયિન્યાં સુમહાપ્રતાપ -
શ્ચણ્ડોગ્રસેનાખ્યમહીનરેન્દ્રઃ ॥ ૩૯॥

તસ્યૈકદાસીદભિલાષ એકઃ
પ્રિયાત્મજાં વાસવદત્તકાં ચ ।
શ્રીવત્સરાજોદયનેન સાકં
વિવાહબદ્ધાં ચ વિધાતુમેવ ॥ ૪૦॥

પ્રયુક્તમેવૌપયિકં તદર્થં
પ્રીત્યા મહાગીતકલાવિદગ્ધઃ ।
નિજાત્મજાચાર્યપદં લભેતે -
ત્યુક્તં મુદા દૂતમુખેન રાજ્ઞા ॥ ૪૧॥

પરન્તુ તન્નાનુસસાર વત્સ -
રાજોઽભિમાની દૃઢનિશ્ચયશ્ચ ।
નેચ્છા નિરર્થાભવદુજ્જયિન્યા

વત્સેશ્વરોઽન્યેદ્યુરિહૈવ બન્દી ॥ ૪૨॥

શ્રુત્વૈવમેષા સ્વગૃહે કુમારી
કથાં વિનિદ્રં સમચિન્તયચ્ચ ।
બદ્ધામિમામપ્યુપનેષ્યતિ શ્વઃ
કિમુજ્જયિન્યેવમહો વિધત્સે ॥ ૪૩॥

કિમિત્થમીર્ષ્યાકુલદૃષ્ટયો મે
વયસ્યપુત્રીજનકા ભવન્તિ ।
કસ્માત્ પિતુર્મિત્રવરાશ્ચ માં શ્રા -
વયન્તિ ચાન્તઃપુરદિવ્યવાર્તાઃ ॥ ૪૪॥

સુવર્ણશૂન્યાપિ સુવર્ણકુમ્ભી -
ત્યેવં કુતો વા જનકોઽપિ વક્તિ ।
ગીતે વિષણ્ણોઽસ્તિ સ વત્સરાજઃ
સ્મૃત્વા પ્રિયાં સ્વાં મુહુરેવ વાદ્યમ્ ॥ ૪૫॥

ગતેઽર્ધરાત્રેઽફુણગાયકાસ્તે
સુપ્તાશ્ચ ગાનકળમતઃ પિતાપિ ।
પ્રભાતતારેણ સહોત્થિતું તત્
ક્ષોણીતલે સ્વપ્નનિમજ્જિતોઽભૂત્ ॥ ૪૬॥

નિશાસુમસ્યાર્દ્રતરે ગવાક્ષ -
દ્વારા સુગન્ધે સ્પૃશતિ સ્વગાત્રે ।
અદૃશ્યમાતુઃ કરશીતસાન્ત્વ -
સ્પર્શેન રોમાઞ્ચમધાત્ કિમેષા ॥ ૪૭॥

સુપ્તોત્થિતે ચારુનિશાવિહઙ્ગે
કળસ્વને ચાલપતીહ ગાને ।
સ્વર્ગસ્થિતાયા નિજમાતુરાર્દ્ર -
સ્વરં વિજાનાતિ કિમેતદાત્મા ॥ ૪૮॥

પુરા શકુન્તાઃ સમવર્ધયન્ કિં
પ્રસૂપરિત્યક્તશિશું મધૂળ્યા ।
કિમસ્તિ ચૈષા કરુણા મનુષ્યે
ત્યજત્યલં યઃ કિમિહાપ્તબન્ધૂન્ ॥ ૪૯॥

નિદ્રોત્થિતા મત્સ્યતતિસ્તટિન્યાં
શુક્રોઽપ્યુદેતિ પ્રસૃતેઽન્તરિક્ષે ।
નીડાઃ પ્રબુધ્યન્તિ ચ સ્વસ્તિવાચૈ -
રાયાત્યહશ્ચાત્ર સુકુંકુમાભમ્ ॥ ૫૦॥

ગ્રામોઽખિલો વર્ષતિ વત્સલાયાં
યાત્રામુહૂર્તે શુભકામનાનિ ।
સર્વત્ર પત્રેષુ તૃણેષુ નેત્રે -
ષ્વદૃશ્યતાત્મપ્રણયોદિતાશ્રુ ॥ ૫૧॥

યેનાત્મજાભાગ્યમિતીદમુક્તં
તેનાપિ પિત્રા ચ મુહૂર્તકેઽસ્મિન્ ।
પદં ન કિઞ્ચિદ્ વદિતું હ્યશક્તે -
નાનીયતે હસ્તધૃતા તનૂજા ॥ ૫૨॥

યત્સ્વર્ણપાત્રં તિલકાનપેક્ષિ
સૈવેયમસ્યૈ વિદધાતિ ભૂયઃ ।
નીરાજનં સાશ્રુવિલોચનૈઃ સ
ગ્રામીણશાલીનમહાજનૌઘઃ ॥ ૫૩॥

સમાગતાસ્તે નૃપકિઙ્કરાસ્તા -
માન્દોળિકામઙ્ગુલિભિર્દિશન્તિ ।
તાતં સમાશ્ળિષ્ય તુ તિષ્ઠતીયં
વિનમ્રમીદૃગ્વિરહાસહિષ્ણુઃ ॥ ૫૪॥

ભ્રમત્યથાસ્યા નયનં ભયાર્તં
વાટીષુ વિન્યસ્તપદાસુ બાલ્યે ।
સ્નેહાતુરં ચાઙ્ગણમલ્લિકાયા -
મશ્રૂદિતં કિં કુરવોઽરુણાક્ષઃ ॥ ૫૫॥

આરુહ્ય મન્દં નતશીર્ષકેયં
કર્ણીરથે તત્ર નિષીદતિ સ્મ ।
કૌશેયવસ્ત્રાવૃતપીઠકેઽસ્મિન્
ભૂયોઽપિ સર્વૈરવલોક્યમાના ॥ ૫૬॥

આમન્ત્રણાર્થં મુહુરક્ષિમાત્રે -
ણાસૌ સ્વતાતં સકૃદીક્ષતે ચ ।

અથાપિ ચાન્યં ... કમથાન્યમારાત્
સ આગતસ્તિષ્ઠતિ સાશ્રુ માર્ષ્ટિ ॥ ૫૭॥

જન્માન્તરં પ્રત્યથ ગચ્છતીવ
મન્દં ચલદ્દોળિકયા પ્રતસ્થૌ ।
શરીરમાત્રં પુરતઃ પ્રયાતિ
ચેતસ્ત્વનાથં દ્રવતીહ પશ્ચાત્ ॥ ૫૮॥

મેઘૈરથાગત્ય સમાવૃતૈઃ સ્વ -
નેત્રોદિતાર્કઃ સહસા તિરોઽભૂત્ ।
તાતઃ સ ગેહશ્ચ જનાવલી સા
ગ્રામોઽખિલઃ સ પ્રણયૈકપાત્રમ્ ॥ ૫૯॥

તિરોહિતં સર્વમભૂત્ તદન્તેઽ -
વ્યક્તં તુ પારાન્તરદૃશ્યભૂતમ્ ।
આવિર્બભૂવાથ સુચક્રવાળ -
પ્રાકારભિત્તિર્દિવમન્તરેણ ॥ ૬૦॥

ગ્રામશ્ચ પશ્ચાત્ પરિદૃશ્યતેઽયં
સમાપ્તનાટ્યાઙ્ગણવત્ પ્રશાન્તઃ ।
મમૈવ રત્નં હૃતમુજ્જયિન્યે -
ત્યહો કવિર્નિષ્ક્રમતે ચ રઙ્ગાત્ ॥ ૬૧॥

---

ચતુર્થઃ સર્ગઃ

કાવ્યપથિકસ્ય દૃશ્યાનિ

પદ્ભ્યાં ચરન્તમિહ માં પથિકં વિચિત્ર -
નાનાપથાઃ કરપુટેન નિમન્ત્રયન્તિ ।
દૂરે પરં પરિલસન્તિ સુચક્રવાળા -
દજ્ઞાતતીરતટિનીગિરિસાનવશ્ચ ॥ ૧॥

છત્રૈશ્ચ ચામરયુતૈઃ પરમાધિકાર -
મત્તાનિ તાનિ નગરાણિ મહોજ્જ્વલાનિ ।
મુન્યાશ્રમાશ્ચ પરિતઃ પરિપાવનાસ્ત
એકાકિનઃ કતિપયે જનસઙ્ઘમધ્યે ॥ ૨॥

દ્વીપાનિ વિક્ષુભિતસાગરસંવૃતાનિ

ભૂમૌ મનુષ્યહૃદયેષુ ચ કાલભેદાઃ ।
એવં નવાનિ વિવિધાનિ મનોહરાણિ
દૃશ્યાનિ માં પ્રતિપિપાલયિષન્તિ દૂરે ॥ ૩॥ વિશેષકમ્

જ્ઞાતા મયેયમિહ માળવભૂશ્ચ રમ્ય -
નીલાબ્જવદ્ વિકસદંબરમણ્ડલં ચ ।
સમ્મીલિતેઽક્ષિયુગળેઽપિ ચ ભિત્તિચિત્ર -
પઙ્ક્તીવ મન્મનસિ સુસ્ફુટમેવ ભાતિ ॥ ૪॥

શૈલાસ્તદીયભૃગવો રઘુવીરપાદ -
મુદ્રાઙ્કિતાવયવકાઃ સુમનોહરાશ્ચ ।
કોનાળકેરિતરુતા વનકુલ્યકાશ્ચ
નીડોદ્યમૈર્બલિભુજાં કલુષામ્રવાટાઃ ॥ ૫॥

જમ્બૂલપક્વફલનિર્ભરકાનનાન્તાઃ
માર્ગોપવાટવૃતિશોભનકેતકાશ્ચ ।
સીરૈઃ સુકૃષ્ટનવમૃન્મદગન્ધયુક્ત -
ક્ષેત્રાણિ બાલકસમીરણસુન્દરાણિ ॥ ૬॥

પર્ણારુણાર્દ્રરસમજ્જિતચર્મપાળી -
શોષપ્રદર્શનકવોષ્ણગૃહાઙ્ગણાનિ ।
અદ્યાપિ યદ્યપિ મદિન્દ્રિયમાદિકાસ્તદ્ -
ગન્ધશ્રુતીક્ષણભિદા વિવિધાસ્તથાપિ ॥ ૭॥

પૂર્વાપરાબ્ધિયુગળાન્તરિતં હિમાદ્રિ -
સેત્વન્તદૂરસુવિશાલપથં પ્રગચ્છેઃ ।
ઇત્થં હિ મન્ત્રયતિ માળવમાર્દ્રરાગં
સુસ્વાગતં કથયતીહ મહાપથશ્ચ ॥ ૮॥ કલાપકમ્
ગઙ્ગા ચ ધૂર્જટિશિરસ્થજટાવિમુક્તા
વારાન્નિધેરુરસિ ગાયતિ કિં પતિત્વા ।
તત્રત્યતાલવનમેચકતીરમેવ
ગચ્છત્યબોધત ઇવાત્મપદાબ્જયુગ્મમ્ ॥ ૯॥

સારાવમત્ર પતિતોત્પતિતાં ચ ગઙ્ગાં
વારાન્નિધિં ચ સુવિવેચયિતું ત્વશક્યમ્ ।
ગાઢાત્મવિસ્મૃતિયુતં લયનં તયોસ્ત -

દદ્વૈતરમ્યમપિ વાઙ્મનસોરતીતમ્ ॥ ૧૦॥

ભૂયઃ ક્રમાદચલતાં ગમિતે તરઙ્ગે
શાન્તિર્વિભાતિ મહતી સ મિમીલ નેત્રે ।
પૂર્ણં હરેણ હૃદયં ચ તદા સમાધિ -
નિષ્ઠેન વીચિરહિતાંબુધિસન્નિભેન ॥ ૧૧॥

જ્યોત્સ્નોદિતા ચલતિ વીચિરિહ ક્રમેણ
જાગર્તિ વારિધિરથૈષ ચ કાવ્યપાન્થઃ ।
અસ્વસ્થમાનસતયા કિલ પૂર્વતારા
દૂરાત્ પ્રકાશયતિ સા શુભદં પ્રદીપમ્ ॥ ૧૨॥

ગચ્છત્યસૌ પ્રવહતિ પ્રકૃતિપ્રસન્ન -
ગીતોપમા ચ કળમાત્ર તુ દાક્ષિણાત્યા ।
યત્રાસ્તિ કિઞ્ચિદનુરાગજમામનસ્ય -
મજ્ઞાતવૃત્તમપિ ચિત્તલયં સમાનમ્ ॥ ૧૩॥

ભગ્ને નિમજ્જતિ મનસ્યદસીયભાવઃ
શુદ્ધો ભવત્યથ સ ગચ્છતિ ભૂય એવ ।
સંભાષયેય કમૃતે તુ વિહાયસોઽન્યા -
દિત્યેવ તિષ્ઠતિ મહેન્દ્રગિરિર્ગરીયાન્ ॥ ૧૪॥

તસ્યોપરિ સ્થિતવતીહ મુનિત્વભાવે -
નોપત્યકોદિત ઇવારવ ઉગ્ર એકઃ ।
સમ્રાજ એવ પૃતના ચ દિશાં જિગીષોઃ
કસ્યાપિ દક્ષિણદિશં ત્વરિતં જગામ ॥ ૧૫॥

કોઽસ્મિન્ રથે રઘુરિહોદિતપૂર્વબોધાદ્
વંશીયગીતિનિવહઃ પ્રવિજાગરૂકઃ ।
સ્વપ્નાયિતં સકલમેતદિતીવ કિં વા
સર્ગવ્યથાકિરણકૈરભિવ્યજ્યતે વા ॥ ૧૬॥

આજન્મશુદ્ધિસહિતાશ્ચ મહાફલાન્ત -
કર્માણ એવ ચ સમુદ્રવૃતક્ષિતીશાઃ ।
આનાકતો રથચરાશ્ચ સવિક્રમાશ્ચ
ભૂમિં હ્યભુઞ્જત તથા તદનન્તરં ચ ॥ ૧૭॥

વાર્ધક્યમેત્ય મુનિવૃત્તિમિહાપુરેતે
વૈવસ્વતાન્વયગતા વસુધાધિપાલાઃ ।
જાજ્જ્વલ્યમાનમહિતાદ્ભુતનિર્ભરૈવ
યેષાં મહામહિમપૂરિતવંશગથા ॥ ૧૮॥ યુગ્મકમ્

ભાસ્વાનિવોદયમનૂજ્જ્વલવિક્રમસ્ય
પૂર્વાપરાહ્નસહિતોઽસ્તમિતઃ સ વંશઃ ।
યદ્વર્ણને સમુચિતં લયમાપ હૃદ્ય -
શબ્દાભિધેયયુગળં ગિરિજેશ્વરાભમ્ ॥ ૧૯॥

કશ્ચિદ્ વનાન્તભુવિ હન્ત મહર્ષિધેનું
સમ્રાટ્ સ્મ ચારયતિ કેસરિણં ચ હિંસ્રમ્ ।
શાન્તોઽયમાત્મતનુમામિષપિણ્ડવત્ સ્વી -
કૃત્યર્ષિધેન્વસુસુરક્ષણમાર્થયચ્ચ ॥ ૨૦॥

ત્રાણઃ ક્ષતાદિતિ હિ રૂઢિરિયં પદસ્ય
ક્ષત્રસ્ય ચેતિ વિવૃણોતિ હરિં નૃપાલઃ ।
પ્રાણાંસ્ત્યજામિ નહિ ધર્મમિતિ પ્રતિજ્ઞા -
દાર્ઢ્યમ્ ન કસ્ય ચ નમસ્કૃતિયોગ્યમસ્ય ॥ ૨૧॥

ઉન્મીલતીવ નયનં કુલસુપ્રભાતં
ભૂપસ્ય તસ્ય શિશુરાવિરભૂન્મનોજ્ઞઃ ।
નામાપિ તસ્ય રઘુરિત્યકરોચ્ચ યેન
ભૂમૌ ચ નાકભુવિ વંશયશશ્ચકાસ્તિ ॥ ૨૨॥

આત્મપ્રિયાનિધનતઃ સુતવિપ્રયોગાત્
સાધ્વીમણિપ્રિયતમાત્યજનાચ્ચ તીવ્રાત્ ।
દુઃખાગ્નિશુદ્ધહૃદયેષુ નૃપેષુ તેષુ
ભૂમિં યથાવિધિ પરં પરિપાલયત્સુ ॥ ૨૩॥

તદ્વંશકીર્તિરપિ ભૂરિતરપ્રતાપ -
પૂર્વાહ્નસૂર્યવદહો પરિભાસતે સ્મ ।
અન્તેઽવરોહણમભૂચ્ચ ગુણૌજસાં તુ
સૂર્યોઽગ્નિવર્ણસદૃશશ્ચરમાદ્રિમેતિ ॥ ૨૪॥ યુગ્મકમ્
પાર્થં શરીરમિહ ન સ્વયશઃશરીરં
મ્ળાનેતરં ત્વમલિનં પરિરક્ષિતું ચ ।

ત્યક્તં ધનં ધનમિતિ ધ્રુવતોઽધિગન્તુ -
માદાનતોઽપ્યધિકમન્યકૃતે પ્રદાતુમ્ ॥ ૨૫॥

યેઽધારયન્ મકુટદણ્ડયુગં ચ તે ક્વ
રાજાધિકારમધુમત્તમલીમસાઃ ક્વ ।
હા તદ્દિલીપચરિતાદિકમગ્નિવર્ણ -
રાજપ્રમત્તચરિતાવધિકં દુરન્તમ્ ॥ ૨૬॥

કાવ્યં યદા વિરચિતં પરિપૂર્ણમેવ -
માચાર્યવાગ્ ધ્વનતિ તદ્ધૃદયે પુરોક્તા ।
ભાવત્કસૂક્તિનિવહો રુચિરઃ કદાચિત્
પ્રાપ્સ્યત્યસંશયમથોજ્જયિનીહૃદન્તમ્ ॥ ૨૭॥ વિશેષકમ્
પ્રાપ્સ્યત્યહો કિમથ કોઽસ્ય નિગૂઢમર્થં
વેત્સ્યત્યસૌ નૃપપુરી નનુ રત્નકામા ।
શક્તિઃ કિમસ્તિ વચસઃ પરિહર્તુમેવ
ખડ્ગોગ્રનીતિમથ રક્ષિતુમાર્તવર્ગમ્ ॥ ૨૮॥

જાને ન વક્તુમુચિતોત્તરમસ્ય સર્વ -
સ્યૈતત્તુ વચ્મિ કરુણૈવ કવીન્દ્રવાણી ।
આયાહિ જાનકિ પિતુર્ગૃહમાશ્રમં મે
દેશાન્તરસ્થમિતિ ભાવય મા વિષીદ ॥ ૨૯॥

એતત્સુભાષિતનિદાનદયાપયોધ્યૈ
આક્રન્દિતાનુસરણૈકહૃદે નમોઽસ્તુ ।
શ્ળોકોઽભવદ્ધ્રુવકિરાતપૃષત્કવિદ્ધ -
ક્રૌઞ્ચાભિદૃષ્ટિજનિતઃ કિલ યસ્ય શોકઃ ॥ ૩૦॥

એતત્પથે કિલ રઘૂદ્વહદિગ્જયાભિ -
યાનં મહોત્સવસમં સમતીતપૂર્વમ્ ।
તાંબૂલપત્રરચિતાઞ્જલિભિર્નિપીય
કેરાસવં ભટજનોઽત્ર વિશશ્રમુઃ કિમ્ ॥ ૩૧॥

માર્ગં તમેવમનુસૃત્ય તદા ચ કાવ્ય -
પાન્થોઽપ્યયં ચરતિ કેવલપાદચારી ।
નાસ્ત્યેવ તસ્ય મનુજોઽનુચરશ્ચ કશ્ચિ -
ન્નાસ્ત્યેવ તસ્ય તુ રથશ્ચ તુરઙ્ગમાશ્ચ ॥ ૩૨॥

અસ્ત્યસ્ય ભૂર્જતરુપત્રમયોઽસલંબી
ભાણ્ડસ્તુ કેવલમમું ન સભાજયન્તિ ।
યુદ્ધે પરાજિતનૃપાશ્ચ પરન્તુ શુદ્ધ -
ગ્રામીણસૌહૃદમિયં પ્રકૃતિશ્ચ રમ્યા ॥ ૩૩॥

પૂગૈશ્ચ મારુતચલત્ફલભારનમ્રૈ -
રાવિઃપ્રભેણ પુરતોઽબ્ધિતટેન યાસ્યન્ ।
સોઽયં સમુદ્રચુળુકસ્મૃતિગન્ધવાહિ -
કાવેર્યુપાસિતતટૈઃ પરિગચ્છતિ સ્મ ॥ ૩૪॥

આકણ્ઠમજ્જનવતો બહુમુક્તકૈઃ સ -
ન્તુષ્ટાન્ કરોષિ કવિતે નનુ તામ્રપર્ણિ ।
મુક્તાવલીવ પતિતા સિતસૈકતે સા
ચક્ષુષ્મતાં પરમનિર્વૃતિમાતનોતિ ॥ ૩૫॥

પશ્ચાત્ તદા મલયસાનુમતો નિમન્ત્ર -
ણાવાહિ ચન્દનમરુત્ તમુપૈતિ મન્દમ્ ।
ભૂયોઽપિ તત્પરિસરપ્રકૃતિપ્રદત્ત -
સૌન્દર્યપૂરિતમનાઃ સ તુ યાતિ પાન્થઃ ॥ ૩૬॥

હારીતકૈર્ડયિતમૂષણવલ્લરીષુ
ચૈલાફલાહિતસુગન્ધતનુર્નભસ્વાન્ ।
દૃશ્યૌ પુરો મલયદર્દુરપર્વતૌ તા -
વુર્વ્યાઃ સ્તનાવિવ તટાર્દિતચન્દનૌ સ્તઃ ॥ ૩૭॥

સહ્યાદ્રિપઙ્ક્તિરથ દૃશ્યત એવ ભૂમ્યાઃ
સ્રસ્તાંશુકોદ્ધુરનિતંબસમાનરમ્યા ।
બાલાનિલૈશ્ચ મુરચીસુખશીતળોપ -
ચારં કરોતિ નવકેતકરેણુગન્ધૈઃ ॥ ૩૮॥

વેલાસમીરણસમીરિતરાજતાળી -
રાજિધ્વનિં સકુતુકં મુહુરેવ શ ૃણ્વન્ ।
સૌન્દર્યધામનિ દિશાભુવિ દક્ષિણસ્યાં
તીર્થાટકઃ કવિવરઃ સ મુદા પ્રયાતિ ॥ ૩૯॥

તસ્યોત્તરાયણદિનાત્ પથિકસ્ય પૂર્વા
રાત્રિસ્તદૈકવિપુલોજ્જ્વલસત્રશાલા ।

અલ્પપ્રકાશકશિલામયભિત્તિદીપ -
જ્વાલાપુરોભુવિ સ જાગ્રદવસ્થિતોઽસ્તિ ॥ ૪૦॥

અન્યેષુ સુપ્તિમુપયત્સુ સ નૈજભાણ્ડ -
બન્ધં વિમોચયતિ સન્નિહિતેષુ તત્ર ।
ભૂર્જત્વચાં શકલિતેષુ વિવૃત્ય સમ્પ્ર -
ત્યેકૈકમાહિતમુદં ચ પઠત્યથોચ્ચૈઃ ॥ ૪૧॥

પત્નીવિયોગપરિખેદવિલોલચિત્ત -
જન્યં શ્રુતં તદજદીનવિલાપવાક્યમ્ ।
કિઞ્ચિત્ પરં મૃદુલવસ્તુ નિહન્તુમત્ર
કાલઃ સદા વિતનુતે મૃદુમેવ વસ્તુ ॥ ૪૨॥

તસ્યાનુબન્ધિ કથિતં કવિના તુષાર -
સેકાહતં સરસિજં ત્વિતિ ગદ્ગદેન ।
સત્રાધિવાસિષુ ગતેષુ સશબ્દનિદ્રાં
શેતે પરં કવિરપીહ વિનિદ્ર એવ ॥ ૪૩॥

કોકસ્ય દીનરુદિતેન સમાનમેતત્ -
કાવ્યં પુનઃ પ્રવહતિ સ્રગિયં યદીત્થમ્ ।
જીવાપહા ભવતિ ચેત્ તદહં કુતો વા
જીવામિ યોઽધૃત હૃદિ સ્રજમેવ ચૈનામ્ ॥ ૪૪॥

પાષાણમપ્યમૃતતાં ભજતે કદાચિત્
પાષાણતાં વ્રજતિ ચામૃતમન્યદાપિ ।
એતત્તુ સર્વમપિ નૈવ મનુષ્યનિષ્ઠં
કિન્ત્વીશ્વરેહિતમિતિ પ્રજિગાય ચોચ્ચૈઃ ॥ ૪૫॥

સ્નેહાતુરસ્વરલયાત્મકગીતકેઽસ્મિન્
પાન્થાત્મદુઃખમથવાજવિલાપ એવ ।
ભૂષા નિરર્થવિકલા કિલ શૂન્યશય્યા
જાતા મમેતિ સહસાવસિતે તુ ગીતે ॥ ૪૬॥

પપ્રચ્છ કશ્ચિદથ મિત્ર વિરમ્યતે કિં
કર્તાસ્ય કો ભવતિ કિં સ હિ કાળિદાસઃ ।
કોઽસાવિતીહ પુનરપ્યથ કાવ્યકારઃ
કશ્ચિત્ તથોત્તરયિતું પ્રતિભાતિ તસ્ય ॥ ૪૭॥ યુગ્મકમ્

ભૂયોઽપિ તેન કથિતં ન હિ કાળિદાસં
જાને ન કેનચિદુદીરિતપૂર્વ એષઃ ।
કિન્તુ ત્વદાલપિતતત્કૃતકાવ્યખણ્ડ -
સંભાવનેન મમ તૃપ્તિરહો ન જાતા ॥ ૪૮॥

કાવ્યં તદાશુ લિખિતું પઠિતું મમાશા
જાગર્તિ તત્ ત્વમતિથીભવ મેઽદ્ય રાત્રૌ ।
ક્રોશદ્વયં ચરતિ ચેદ્ ગૃહમસ્તિ મે તદ્
ગૃહ્ણીષ્વ તે સખિનિમન્ત્રણમેતદેવ ॥ ૪૯॥

એવં મનોહરસુસંસ્કૃતભાષણેષુ
ચાત્માવબોધજનકેષ્વભિનન્દકેષુ ।
વિજ્ઞેન કાવ્યરસિકેન કૃતેષુ તેષુ
શ્રોત્રં ગતેષુ કવિરાત્મનિ તુષ્ટિમાપ ॥ ૫૦॥

અન્યેદ્યુરસ્ય સુમનસ્સુહૃદો નિકેતે
પીયુષવત્ પ્રવહતિ સ્મ સુકાવ્યગીતિઃ ।
નોક્તા તદાપિ નિજસત્યકથાતિથેયા -
યાસ્તાં કવિઃ ક ઇતિ કાવ્યમિદં તુ કાર્યમ્ ॥ ૫૧॥

વાચઃ સ ભૂર્જદલતોઽનુલિખત્યથ સ્વ -
નારાચકેન સુહૃદુત્તમતાલપત્રે ।
કાવ્યં સ્વકીયમિહ તત્ પ્રથમં શ◌ૃણોતિ
ભાવાર્દ્રકં શ્રુતિપવિત્રમહોઽન્યકણ્ઠાત્ ॥ ૫૨॥

આમન્ત્ર્ય તં તદનુ મિત્રવરં સ કાવ્ય -
પાન્થઃ સમારભત નૈજસુદીર્ઘયાત્રામ્ ।
ભૂયોઽપિ પર્વતતતિસ્તટિનીકદંબઃ
ક્ષેત્રાણિ મિત્રનિવહસ્તતસત્રશાલાઃ ॥ ૫૩॥

વક્ત્રાબ્જમદ્યલહરી યવનાઙ્ગનાનાં
યત્રાધિકં હરતિ નેત્રમયં પ્રદેશઃ ।
દ્રાક્ષાલતાવલિનિકુઞ્જવૃતાજિનેષુ
કાદંબરીરસરતાઃ સુમિળન્તિ યત્ર ॥ ૫૪॥

તેષાં મનોહરસુસૌહૃદસત્કૃતીસ્તાઃ
સ્વીકૃત્ય ચાપ્રકટિતસ્વયથાર્થભાવઃ ।

વૈરાગિવત્ સ તુ યુવા કવનાનિ કાળિ -
દાસસ્ય કસ્યચિદિહાલપતિ પ્રકામમ્ ॥ ૫૫॥ વિશેષકમ્
એવં સમાનહૃદયૈર્બહુભિર્મનુષ્યૈ -
ર્નાનાવિધૈઃ પ્રચલિતા કથનૈરથેયમ્ ।
વાગ્વલ્લરી બહુળપક્ષશશાઙ્કતુલ્યા
સંવર્ધિતાસ્ય કવિતાપથિકસ્ય કીર્તિઃ ॥ ૫૬॥

રાત્ર્યાગમે ભવતિ ચોત્તરદિગ્વિભાગે
દેવાલયેઽત્ર મહિતોજ્જ્વલકીર્તિયુક્તે ।
દીપાવલી વિરળકાન્તિરનુક્રમેણ
જાતાસ્તિ નિશ્ચલતરા પ્રકૃતીશ્વરી ચ ॥ ૫૭॥

આરાધનોપકૃતમન્ત્રતતિઃ પવિત્ર -
ઘણ્ટોદિતધ્વનિરપિ પ્રશમત્વમેતિ ।
મિષ્ટાન્નભોજનસમેધિતચિત્તહર્ષા
વિપ્રાસ્તદગ્રવસતિં પરિતો નિષણ્ણાઃ ॥ ૫૮॥

તેષાં સુનર્મવચનાન્ચલસં વિશ‍ૃણ્વ -
ન્નાસ્તે કવિઃ સ નિતરાં વિજને યથા સ્યાત્ ।
સંભાષણસ્ય વિષયસ્તુ કવેશ્ચ કાળિ -
દાસસ્ય દેશકવિતાસવિશેષતાદિઃ ॥ ૫૯॥

વઙ્ગં કલિઙ્ગમથ કુંકુમદેશમેવ -
માહુર્જના બહુવિધાઃ કવિજન્મદેશમ્ ।
કેચિદ્ વદન્તિ કવિજન્મ ન ચૈવ સપ્ત -
સ્વાજન્મપુણ્યનગરીષ્વિતિ નિર્વિશઙ્કમ્ ॥ ૬૦॥

ગોપોઽસ્તિ નિસ્સ્વકુલજઃ કિલ માળવસ્ય
ગ્રામસ્ય સૂનુરિતિ તદ્રસને ચ સાક્ષાત્ ।
કાળ્યા કૃતાક્ષરવરપ્રવિલેખનેન
ભેજે કવિત્વમિતિ ચ પ્રવદન્તિ કેચિત્ ॥ ૬૧॥

પ્રાદુર્બભૂવુરિહ તસ્ય ચ જાતિજન્મ -
દેશાનુબન્ધિતવિચિત્રકથાવિવાદાઃ ।
વાદેન કિં ફલમનેન જનિશ્ચ યત્ર -
કુત્રાપિ વા ભવતુ સા કવિતા સુધા નુ ॥ ૬૨॥

સૂનં તુ ન પ્રભવતિ સ્વસુગન્ધગુપ્ત્યૈ
સોઽયં બહિર્ગળતિ નિશ્વસિતચ્છલેન ।
વાયુર્ન તન્નિયમનાય ચ શક્તિભૂઃ સ્યાદ્
વ્યાપ્નોત્યયં પરિમળોઽપિ ચ વાયુમાર્ગે ॥ ૬૩ ॥

ભૂયોઽપિ ભૂર્જતરુચર્મવિલેખનેન
ચાવર્તનેન હૃદુપસ્થિતિકારકેણ ।
અન્યોન્યસંવિનિમયેન ચ તાનિ રમ્ય -
કાવ્યાનિ પાત્રમભવન્ કિલ કીર્તિરાશેઃ ॥ ૬૪ ॥

આસીત્ ક્રમેણ નિજભાણ્ડતલોપશાયિ -
કાવ્યાધ્વગસ્ય નયનં સુકૃતાશ્રુપૂર્ણમ્ ।
આયાતિ યં ભ્રમણકૌતુકિનં વિરાગાદ્
રાગાકુલા વરણમાલ્યધૃતાર્દ્રપાણિઃ ॥ ૬૫ ॥

આરાત્ સ્વયંવરવધૂરિવ કીર્તિલક્ષ્મી -
ર્ગોપાયતિ સ્વયમથાપ્યયમાત્મના તુ ।
શબ્દાભિધેયયુગળં તદુપાસિતં ચ
નૃત્યત્યથોજ્જ્વલમુમેશવદાત્મનીહ ॥ ૬૬ ॥ યુગ્મકમ્
કિઞ્ચિત્ તથાપિ વિરહોદિતલોલદુઃખ -
મુદ્વેલયત્યધિકમેવ મનસ્તદીયમ્ ।
કર્ણીરથાત્ તદનુ દૂરમપાગતાત્ ત -
દૃષ્ટિસ્તુ તં સમુપગચ્છતિ દીનદીનમ્ ॥ ૬૭ ॥

---

પઞ્ચમઃ સર્ગઃ

દેવતાત્મનોઽઙ્કતલે

પાન્થો ન જાનાતિ યાનમિદમવિરામ -
મસ્યાન્તરા સૂર્યયાનમ્ ।
ઉપરિગતમથ કિયદિતીત્થં ?
પૂર્વદિશિ પૂર્ણેન્દુમુકુટં સમુહ્ય કતિ
રાકાનિશાઃ સમાયાતાઃ ॥ ૧ ॥

ચરદશ્વનિકરતતસૈન્ધવતટાનાં
સ્ફુટિતકશ્મીરજક્ષેત્રનિચયાનાં

પરતઃ પ્રદૃશ્યતે પ્રાલેયશૈલઃ ।
ઉન્નિદ્રમર્મરિતહરિતપત્રેષુ
પુન્નાગપુષ્પસૌરભ્યોજ્જ્વલેષુ
પ્રસ્તરેષ્વત્રત્યમૃગનાભિસંસ્પર્શ -
ગન્ધવદ્ગિરિતટમુપેત્ય સ નિષણ્ણઃ ॥ ૨॥

વિકિરતિ હિમસ્તુઙ્ગશૃઙ્ગતો ગાયતિ ચ
કીચકો ભ્રમરકૃતરન્ધ્રઃ ।
ગન્ધર્વવલ્લકીતુલ્યા હિમાપગા
જાગર્તિ ગાનૈઃ કુતશ્ચિત્ ।
ભૂર્જતરુપત્રપુટપાળીષુ ધાતુરસ -
રક્તાભલિપિષુ રક્તાભિઃ ।
વિદ્યાધરાઙ્ગનાભિર્લિખિતમન્મથા -
લેખાઃ કિમેતેઽબ્દશકલાઃ ॥ ૩॥

પુન્નાગમન્દારનવપારિજાતકૈઃ
સંભૂય પુષ્પિતે તસ્મિન્ ભૃગૌ સદા -
પ્યુન્નિદ્રમાસ્તે વસન્તઃ ।
તસ્માતપોગ્રશૃઙ્ગે તત્ર નિષ્ઠુરં
પ્રજ્વલત્યૂષ્માગમર્તુઃ ।
ઉન્મુખં ચાતકં વાત્સલ્યબિન્દુભિસ્-
તર્પયત્સ્વબ્દનિકરેષુ ।
અન્તરાળસ્થલસ્યાન્તરા નર્તનં
ધત્તે ચ વર્ષામયૂરઃ ।
સુન્દરપરાગસુમસંકાશહિમધૂળિ -
સંકુલેષ્વચલકટકેષુ ।
આયાતિ કઃ શિશિરહેમન્તશારદે -
ષ્વેતે કિમાયાન્તિ સર્વે ?
સમ્મિળતિ યત્ર હા સર્વર્તુરમ્યતા
તત્રૈવ સમુપૈતિ પાન્થઃ ।
ઉત્તુંગહૈમવતશૃઙ્ગકૂટં સમા -
રૂઢવાનેકાન્તપાન્થઃ ॥ ૪॥

સ્વર્ગાયતે ભૂમિરત્ર શેતે સુખં

સ્વર્ગઃ ક્ષમાહુતટમેત્ય ।
ક્ષોણીતલેઽપિ વિહરદ્દેવભૂસ્તુહિન -
પૂરિતોઽયં સાનુદેશઃ ।
શ્રૂયતે પર્ણેષુ નાગભૂમ્યોઃ સુરત -
સલ્લાપમર્મરનિનાદઃ ।
અત્ર હિ સ્વર્ગીયહર્ષઃ ॥ ૫॥

ધત્તે તુષારકણિકાં શંભુભસ્મ વા
હ્યત્રત્યપર્વતબ્યૂહઃ ?
અરુણપ્રભોજ્જ્વલં હરનિટિલલોચનં
પ્રોન્મીલતીવ માર્તણ્ડઃ ।
હરજટાયાં ધવળગિરિકૂટકેઽથવા
ભાસતે સિતચન્દ્રલેખા ?
શ‌ૃઙ્ગેષુ સાન્દ્રં સમાધિસ્થધૂર્જટેઃ
શાન્તિપૂર્ણં મહામૌનમ્ ।
તસ્મિન્ વિલીયતે હૃદયં પ્રશાન્તમ્ ॥ ૬॥

સમુદેતિ કસ્માત્ કુતો વાનુમાત્રં વિ -
વર્ધમાનો ડમરુતાળઃ ?
શ્રીરઙ્ગકે નટનનિર્મગ્નનટરાજ -
કરગતમહાડમરુતાળઃ ।
નાસૌ દિવાસ્વપ્નમથવા મતિભ્રમો
હૃદયનયનેક્ષિતં સત્યમ્ ।
આકાશભૂમ્યૌ દિવારાત્રકારકા -
વાદિત્યચન્દ્રૌ ચ સકલભુવનાન્યપિ
સમ્પૂરયન્મહાકાળનટનં તદા
જાગર્તિ પથિકસ્ય પુરતઃ ।
નયનનળિનં પરમહર્ષેણ પૂરિતમ્ ।
નવસર્ગતાળસુસ્પન્દિતમિદાનીં
ડમરુરપરો ભવતિ હૃદયમ્ ॥ ૭॥

સાયન્તને રમ્યમન્દારપત્રવ -
ન્નેત્રે નિમીલિતે મન્દમ્ ।
તાર્તીયનેત્રં સમુન્મીલિતં યેન

પશ્યતિ ત્રિભુવનં પાન્થઃ ।
વૈરાગ્યમેત્ય કઠિને તપસિ લીનં
મારારિમાત્મનાથં લબ્ધુમાગ્રહાત્ ।
તીવ્રાનુરાગાર્દ્રચિત્તાં તપસ્વિનીં
પશ્યત્યપર્ણાં સ પાન્થઃ ।
ગુપ્તં નિબદ્ધસુમબાણં મધુપ્રિયં
લુપ્તધૈર્યં હરં તાર્તીયનેત્રાગ્નિ -
તપ્તં મૃતં પતિં સ્મૃત્વા કુરરીવ
ચાક્રન્દતીં રતિં
પશ્યતિ મુહુર્મનસિ પાન્થઃ ॥ ૮॥

પરિણામસુન્દરકથાયાં ચ તસ્યાં
શિવપાર્વતીવિવાહાર્થં સમાગતમ્ ।
આર્દ્રાક્ષતેન પદ્માતપત્રેણ મા-
ઙ્ગલ્યસ્તવેન ચાહ્લાદાર્દ્રમાનસં
લક્ષ્મીં ચ વાણીં ચ દેવીદ્વયં યથા
પત્રે લિખત્યસૌ સ્વયમેવ પાન્થઃ ॥ ૯॥

ગઙ્ગાકળિન્દજેઽસેવિષાતાં ચમર -
યુક્તે મહેશં ચ પાર્શ્વદ્વયેઽપિ ।
નિજભૂતગણસેવિતાતોદ્યઘોષઃ
સમુદેતિ સર્વતોઽતન્દ્રમ્ ।
કિઙ્કિણીહાસરુતવૃષભપૃષ્ઠે વ્યાઘ્ર -
ચર્માસ્તૃતેઽર્ધનારીશઃ પુરોભુવિ
આનન્દમૂર્તિરાયાતિ ।
નેતું તમેવ નિજપત્તનં પર્વતા -
ધીશે સમાગતે શ્રૂયતે ગીરિયમ્ :
ભૂમેર્દિવશ્ચ સંરક્ષકમસૌ સુતં
જનયિષ્યતિ ધ્રુવં સ્કન્દમ્ ॥ ૧૦॥

કલ્પદ્રુકામધેન્વમૃતાદિ સર્વં
સ્વર્ગે તે સ્વાધીનમેવ ।
યસ્ય પરિરક્ષાર્થમાવશ્યકં ભવતિ
મર્ત્યભુવિ કસ્યચિદ્ બાલસ્ય જન્મ ॥ ૧૧॥

સ્વર્ગશમ્માનાં કિમેષા ધરિત્રી ?
મર્ત્યસ્ય ભૂનિવાસઃ શાપ એવ કિમ્ ?
સુસ્થિરસ્નેહબન્ધા જન્મજન્મસુ
પુષ્પિતા તિક્તમધુરાણિ ચ ફલાન્યત્ર
યચ્છન્તિ લોકાન્તરં કિમેતાદૃશં
વર્તતેઽસ્મિન્ મહાબ્રહ્માણ્ડભાણ્ડે ?
પૃથિવી હ્યુદારરમણીયા ॥ ૧૨॥

તીવ્રપ્રણયોજ્જ્વલાત્મનાં મેળન -
સત્રં હિ હૈમવતભૂમિઃ ।
હેમકૂટાચલશ‍ૃઙ્ગાત્ સકૌતુક -
માયાન્તિ ભૂમૌ સુરાસ્તે ।
રઙ્ગે તુ નામસ્ખલિતાપરાધતો
ગુરુશાપહેતોઃ કદાચિત્
ઉર્વશી ચાગમત્ સ્વપ્નતુલ્યા
અસ્વર્ગજાં સુધામાસ્વાદયચ્ચ યા
વિક્રમનૃપાલહૃદયાનુરાગઃ ।
અપ્સરા અપ્યનુભુઙ્ક્તે સ્મ મર્ત્યસ્ય
સૌહાર્દશુદ્ધદૌર્બલ્યાન્યહો તદા ॥ ૧૩॥

સંભ્રમન્મેઘમાલા પુણ્યવાહિની -
હૃદયાદ્ ગૃહીત્વાંબુકણતતિં પુનરથ
માર્ગાન્તરેણ પ્રયાતિ ।
એવં સ પાન્થોઽપિ હૈમવતભૂમેઃ
સુરભિલશિલાશકલતુલ્યં
વંશનાળીપૂર્ણમધુસમાનં
હૃદયે ચ મધુરાનુભૂતીઃ સમાહૃત્ય
સોપાનતોઽવતીર્ણોઽસ્તિ ।
પથદર્શિકેયં વિભાતતારા ॥ ૧૪॥

ષષ્ઠઃ સર્ગઃ
પુનરપિ માળવે

જ્વલન્તિ માર્ગોભયપાર્શ્વભાજઃ
પલાશપુષ્પાગ્નિકણાઃ પ્રકામમ્ ।
યદ્દર્શનાત્ સોઽભિલલાષ પાન્થઃ
પ્રાપ્તું નિજગ્રામમપૂર્વરમ્યમ્ ॥ ૧॥

પરન્તુ તત્રાસ્તિ નિજં કિમેત -
શ્ચિન્તાન્તરા તં વિમનીકરોતિ ।
તતઃ સ ગૂઢાત્મકહૃત્ક્ષતાનાં
રક્તાર્દ્રબિન્દૂન્ પરિમાર્ષ્ટિ મન્દમ્ ॥ ૨॥

તુષારવક્ત્રાંશુકશારદર્તુ -
સન્ધ્યાનિભા કેયમુદેતિ તત્ર ।
ન કિઞ્ચિદુક્ત્વાપિ યદીયનેત્રં
સર્વં વદત્યેવ સદા સમાર્દ્રમ્ ॥ ૩॥

શનૈઃ શનૈરેવ તદીયરૂપં
તિરોભવત્યક્ષિપથાત્ કવેઃ કિમ્ ।
અવ્યક્તહેતોઃ સ ચ તત્કુમાર્યા
નામાકરોન્માળવિકેતિ હૃદ્યમ્ ॥ ૪॥

અસ્ત્યગ્નિમિત્રો વિદિશાધિપો યઃ
સોલ્લાસમાસ્તે નિજવલ્લભાભિઃ ।
યોઽભૂત્ પરં ચિત્રપટસ્થકન્યા -
લાવણ્યમાધ્વીસ્વદનેઽતિસક્તઃ ॥ ૫॥

તત્પ્રાપ્તિસિદ્ધૌ કલિતાક્ષતન્ત્રૈ -
ર્વિદૂષકોપાયશતૈશ્ચ રાજ્ઞા ।
જયાર્થમાત્તૈશ્ચ લઘૂપજાપૈ -
રાસૂત્રિતૈર્નાટ્યગુરુત્થયુદ્ધૈઃ ॥ ૬॥

અન્તઃપુરસ્થપ્રમદામદૈશ્ચ
યુક્તં વિભક્તાઙ્ગકમન્તરઙ્ગે ।
પ્રયુજ્યતે નાટકમત્ર સઙ્કુ -
લ્પાકલ્પિતા માળવિકૈવ ભાતિ ॥ ૭॥ યુગ્મકમ્
પાદાંબુજં માળવકન્યકાયાઃ
સખી ન વા તે હૃદયાભિવાઞ્છા ।

અલક્તરક્તં મણિનૂપુરાલ -
ઙ્કૃતં ચ રમ્યં ચ તનોતિ પાન્થ ॥ ૮॥

અપુષ્પિતસ્ય પ્રમદાવનસ્થા -
શોકસ્ય તાં દોહદકે નિયુઙ્ક્તે ।
દેવી દયાધામ ચ ધારિણી કિં
પાન્થાથવા તે હૃદયાભિવાઞ્છા ॥ ૯॥

સકુડ્મળઃ પઞ્ચદિનાન્તરેઽભૂ -
દશોકવૃક્ષોઽપિ નિતાન્તશોભઃ ।
ભૂર્જત્વચીત્થં લિખતસ્તવાત્ર
હર્ષાશ્રુધારા પતિતા મુહુઃ કિમ્ ॥ ૧૦॥

દેવીપદાર્હાં સુકુમારલોલા -
મેતાં સુકન્યાં પરિચારવૃત્તૌ ।
નિયુઞ્જતે યે સ્મ પુનસ્ત એવ
લજ્જાવનમ્રા નનુ સંબભૂવુઃ ॥ ૧૧॥

મનોહરોઽયં કિલ વિગ્રહઃ કિં
સિતેન નીપેન વિધીયતે સ્મ ।
સંકલ્પચિત્રાદથવા સજીવ -
સ્વરૂપમાધાય સમુત્થિતોઽભૂત્ ॥ ૧૨॥

યથા વિલોલેષુ દલેષુ મન્દ -
સમીરણસ્પર્શવિધૌ તથાસ્યાઃ ।
કરાઙ્ગુલીસ્પન્દમૃદુપ્રકમ્પો
વ્યાપ્નોતિ પક્ષ્માવૃતનીલનેત્રે ॥ ૧૩॥

નૃત્યત્પદે તે મણિનૂપુરાભ્યા -
મભઙ્ગુરં તાળતરઙ્ગિતે સ્તઃ ।
કદા નુ પશ્યામ્યહમસ્વતન્ત્રે -
ત્યુક્તં તયા કિં કવિમેવ ગીતમ્ ॥ ૧૪॥

વિતીર્ય ભૂયશ્છલિતાખ્યલાસ્ય -
માધુર્યકં માળવિકે તિરોઽભૂઃ ।
તિષ્ઠસ્યહો કિં વિદિશાધિપસ્યો -
જ્જયિન્યધીશસ્ય પુરોઽથવા ત્વમ્ ॥ ૧૫॥

હરિત્તૃણોઽયં સ્મરતીહ ભૂમૌ
નીલં નભો વીક્ષ્ય શયાન એવ ।
ખગો યદિ સ્યાં શરવેધિલુબ્ધઃ
કુતશ્ચિદસ્તીત્યવબોધહીનઃ ॥ ૧૬॥

ઉપર્યુપર્યુડ્ડયને પતિષ્યા -
મ્યેકેન રોદેન ચ મૃત્યુમેમિ ।
અસઙ્ખ્યબાણક્ષતજાક્તદેહો -
પ્યાયુર્વિવૃધ્યૈ હ્યભિલાષુકોઽસ્તિ ॥ ૧૭॥ યુગ્મકમ્
પૃષત્કમગ્ચે શયિતોઽપિ કશ્ચિત્
પ્રતીક્ષિતું જીવિતમીહતે હા ।
એકાભિલાષસ્તુ કવેરિહાસ્તિ
તદ્દર્શનં સ્નિગ્ધપવિત્રહૃદ્યમ્ ॥ ૧૮॥

પ્રતીક્ષયા શ્યામજડીકૃતાયાં
રાત્રૌ ચ દીર્ઘપ્રહરાકુલાભામ્ ।
સર્વં વૃથૈવેતિ હૃદન્તરાળે
મન્ત્રે શ્રુતેઽપિ ધ્વનતીવ કર્ણે ॥ ૧૯॥

અશબ્દમપ્યત્યધિકં સુશક્ત -
માહ્વાનમાપ્તં ત્વિહ શૂન્યતાયાઃ ।
ગૃહાતુરોઽયં પથિકઃ પ્રયાતિ
તં દક્ષિણાશાપથમેવ પશ્યન્ ॥ ૨૦॥ યુગ્મકમ્
કચ્ચિત્ તતઃ પૃચ્છતિ નિમ્નગાયા
વીચી -સ કુત્રાસ્તિ સુહૃદ્વરો નઃ ।
કચ્ચિત્ પ્રતીક્ષાભરિતઃ સ પાન્થ -
મશ્વત્થવૃક્ષોઽઙ્ગુલિભિશ્ચ તત્ર ॥ ૨૧॥

આસ્તે નિમેષાકલનેન કચ્ચિત્
પ્રત્યુદ્ગમાર્થં ચ પલાશવૃક્ષાઃ ।
તિષ્ઠન્તિ તત્રાતિમનોહરાભાન્
ધૃત્વા પ્રસૂનોજ્જ્વલસુપ્રદીપાન્ ॥ ૨૨॥ યુગ્મકમ્
વૃષ્ટિર્ન વા પર્યવસાનમાપે -

ત્યાહાત્ર મૃત્સામૃદુલોષ્ણગન્ધઃ ।
પ્રહસ્ય યક્ષીવ વિમુક્તકેશા
સ્થિતઃ પ્રસૂનૈઃ કુટજદ્રુમોઽસૌ ॥ ૨૩॥

પરોક્ષતસ્તિષ્ઠતિ કેતકીયં
લજ્જાનતા પુષ્પવતી મનોજ્ઞા ।
વેશ્યાકુમારીનિભહેમપુષ્પઃ
કિરાતિકાભો બકુળદ્રુમોઽપિ ॥ ૨૪॥

વિરાજમાનૌ કુસુમાંબરાણિ
ધૃત્વા મનોમોહનવાટિકાયામ્ ।
લોધ્રદ્રુમો માધતિ પુષ્પવૃદ્ધિ -
હર્ષાકુલોઽસૌ તિલકસ્તથૈવ ॥ ૨૫॥ યુગ્મકમ્
નભસ્વતોઽસાવભિલાવકાલ -
શ્ચિનોત્યયં માળવગન્ધરાજિમ્ ।
પ્રત્યુદ્વ્રજાભ્યાગતમત્ર સમ્યક્
સદાગતે વેત્સિ જનં કિમેનમ્ ॥ ૨૬॥

યઃ પૂરિતોદાત્તસુખોગ્રતાપ -
ચેતાશ્ચ યોઽદગ્ધવપુર્નિદાઘે ।
ગ્રસ્તોઽપિ શીતૈર્ન જડીકૃતો યઃ
સંવત્સરાન્ યો બહુ સઞ્ચચાર ॥ ૨૭॥

સર્ગસ્થિતો યો નિજચિત્તભારાન્
ભૂર્જત્વચેષ્વન્વવતારયચ્ચ ।
દીર્ઘપ્રવાસાત્પરમિષ્ટતીર્થં
પ્રાપ્યેવ યો નિઃશ્વસિતં કરોતિ ॥ ૨૮॥

મૃત્ત્વં ચ તન્માળવદેશકોણે
ભાગ્યાયતિં યો મનુતે સ્વકીયામ્ ।
સોઽયં સ્વભાણ્ડં વટવૃક્ષમૂલે
નિક્ષિપ્ય તત્રૈવ સુખં ચ શિશ્યે ॥ ૨૯॥ વિશેષકમ્
વટદ્રુપત્રાળ્યવકાશતોઽધો
દ્રવન્તિ કિં પુષ્કરનીલિમાનિ ।
અનેન ચોત્તાનશયેન દૃષ્ટે

નભો લસત્યેવ કિમપ્યપૂર્વમ્ ॥ ૩૦॥

બાલ્હીકપુષ્પાસ્તૃતકોમળાભં
કાશ્મીરદેશં સુરસિદ્ધસેવ્યમ્ ।
ગઙ્ગાપ્રપાતાર્દ્રહિમાદ્રિતુઙ્ગ -
શ‌ૃઙ્ગં ચ દૃષ્ટ્વા વિનિવર્તમાનઃ ॥ ૩૧॥

પાન્થોઽયમેતસ્ય મુખાવલોકાદ્
ગ્રામસ્ય કિં જાયત એવ બાઢમ્ ।
આર્દ્રાઞ્ચિતાક્ષશ્ચ સમુત્સુકશ્ચા -
પ્યાનન્દતાળદ્રુતમાનસશ્ચ ॥ ૩૨॥ યુગ્મકમ્
પઞ્ચેન્દ્રિયૈરપ્યનુભૂયતે સ્મ
ચાદ્યાન્નલાવણ્યરસોઽત્ર નૂનમ્ ।
અત્રૈવ દૃષ્ટા હ્યૃતુપર્યયાણાં
શોભાદ્ભુતૈરાદ્યમથાદરૈશ્ચ ॥ ૩૩॥

વર્ષૈરનેકૈસ્તમદૃષ્ટપૂર્વા
દિદૃક્ષવશ્ચાત્ર હિ વિસ્મયન્તે ।
સમાવૃતૈરાગત એવ કાળિ -
દાસોઽયમિત્યાત્મગતં તદુક્તમ્ ॥ ૩૪॥

ક્વ વા ભવાન્ કાલમિયન્તમાસી -
દસ્માન્ ન કિં વિસ્મૃતવાનસીતિ ।
ક્ષેમોક્તયઃ સ્નેહભરાદ્ભુતાર્દ્રાઃ
શ્રુતાઃ પરં તેન ગૃહાતુરેણ ॥ ૩૫॥

યાત્રાસુ મધ્યેઽત્ર વિશશ્રમુર્યે
વિદ્વદ્વરૈસ્તૈર્વિષયીકૃતોઽભૂત્ ।
કવીન્દ્રમુક્તામણિકાળિદાસ -
સ્તદીયકાવ્યાનિ ચ તત્પ્રશંસા ॥ ૩૬॥

કવિઃ સ કિંદેશ્ય ઇતિ પ્રકામં
શ્રુતોઽત્ર વાદપ્રતિવાદઘોષઃ ।
અત્રત્ય એવાસ્તિ સ કાવ્યકાર
ઇત્યાત્મતુષ્ટિપ્રભવશ્ચ શબ્દઃ ॥ ૩૭॥

તત્કાવ્યખણ્ડાઃ પ્રથિતાઃ કિલાસન્

કર્ણાનુકર્ણશ્રવણેન ચોક્ત્યા ।
નાસૌ તદવ્યાજમુખાનિ પશ્યન્
સ્વાપહ્નવેન પ્રભુરત્ર વક્તુમ્ ॥ ૩૮॥

તસ્થૌ વિનમ્રઃ સ યથાપરાધં
કૃત્વા પુનસ્તમ્રમનાશ્ચ જાતઃ ।
ગ્રામીણવૃદ્ધોદિતવત્સલત્વ -
માહ્ળાદમાલા હિ બભૂવ તસ્મિન્ ॥ ૩૯॥

ગ્રામે કિમત્રાસ્તિ મદીયમેત -
ચ્ચિન્તા તિરોઽભૂન્નિજબન્ધવો હિ ।
પરિસ્થિતાઃ સ્વસ્ય કૃતેઽભિમાન -
ભાજાસ્ત્વિમે ગ્રામજના વરાકાઃ ॥ ૪૦॥

કિં નો વિહાય ત્વમિતો ગમિષ્ય -
સ્યેવં હિ પૃચ્છત્યથ મિત્રમેકમ્ ।
ન નેત્યુવાચાપિ તુ ચન્દ્રકાન્ત -
તુલ્યં તદાત્મા દ્રવતીવ ભાતિ ॥ ૪૧॥

પાદે ચલત્યર્ધવિબોધવત્તદ્ -
ગ્રામે પુરા વૃદ્ધકુટીં નિશામ્ય ।
અન્તર્ન કોઽપીત્યનુયોગિ નેત્રં
શ્રુતં ચ વૃદ્ધઃ સ મૃતો બભૂવ ॥ ૪૨॥

નિજૈકપુત્રીવિરહાકુલોઽસૌ
ન કશ્ચિદૂચે કતિચિદ્દિનેષુ ।
અથૈકદા ચોડ્ડયતે સ્મ પક્ષી
શૂન્યં ત્વભૂત્ પઞ્જરમેષ ગેહઃ ॥ ૪૩॥

પુરાતનપ્રેમકથાશ્ચ કાશ્ચિ -
ન્નીડાદિતઃ શ્રોત્રપથં પ્રવિષ્ટાઃ ।
કિં તત્ સ્મરન્ત્યુજ્જયિનીસુવર્ણ -
નીડોપબદ્ધાસ્તિ વિહઙ્ગબાલા ॥ ૪૪॥

ન સન્તિ પાપાનિ વિમુક્તિસિધ્યૈ
કિં તાપશાન્ત્યૈ પ્રભવેન્નદીયમ્ ।
ગ્રામીણસંસ્કારવદેતદાપઃ

સ્વચ્છપ્રશાન્તસ્ફટિકાવદાતાઃ ॥ ૪૫ ॥

આકણ્ઠમસ્યાં વિનિમજ્જ્ય નદ્યા -
માલાપયામાસ પરસ્સહસ્રમ્ ।
ગાયત્રિકાં મૃત્સઘટસ્ય ચાન્ત -
રાકાશમસ્યાનિશમર્કદીપ્તમ્ ॥ ૪૬ ॥

તેન પ્રકાશેન તુ નીયમાન -
માત્માનમાશંસ્ય વિનીતિપૂર્વમ્ ।
સ્થિતેઽપિ કુત્રાપ્યભિયન્તિ નૈકે
પૂર્વે સતીર્થ્યાઃ સમમેવ ભૂયઃ ॥ ૪૭ ॥

તેષાં કવેઃ સર્ગતપઃફલાના -
માસ્વાદકાસ્તે મિળિતા વદન્તિ ।
ન કેવલં સોજ્જયિની ત્વદુક્તિં
પ્રત્યુદ્વ્રજિષ્યન્ત્યપિ તુ ત્રિલોકી ॥ ૪૮ ॥

અશ્વત્થવૃક્ષે હૃદયાકૃતિં ચ
સહસ્રશઃ શ્યામળપર્ણરાજિમ્ ।
નિસ્તન્દ્રમાસ્પન્દચલાં વિલોક્ય
નિશ્શબ્દમેવેહ કમાહ સોઽયમ્ ॥ ૪૯ ॥

અસ્વસ્થમેતદ્ધૃદયં કિલૈકં
મર્ત્યસ્ય હા દુસ્સહમેવ વૃક્ષ ।
એતાન્યહો તે હૃદયાન્યસઙ્ખ્યા -
ન્યસ્વસ્થિતાન્યત્ર સદા ભવન્તિ ॥ ૫૦ ॥

સમીરણૈરાળુલિતાનિ તાનિ
સર્વાણિ સર્વર્તુષુ તુલ્યમેવ ।
દૃષ્ટ્વા નિષીદામ્યખિલં તવૈત -
ચ્છાયાતટે વિસ્મિતમાનસોઽહમ્ ॥ ૫૧ ॥

અસ્વાસ્થ્યમેતન્મહદસ્તુ તેઽહ -
મિચ્છામિ શાન્તિં ત્વદનાતપેઽસ્મિન્ ।
સર્ગાત્મકાવિષ્કરણાકુલસ્ય
શાન્તિસ્તુ લભ્યા મરણેઽથવા સ્યાત્ ॥ ૫૨ ॥

ગ્રીષ્મો ગતશ્ચાતકશાબકેન
કેકારવેણૈતિ સ વર્ષકાલઃ ।
પુનસ્સમાયાતિ વસન્તમાસો
વનપ્રિયાણાં મધુરસ્વરેણ ॥ ૫૩॥

યદા વિકંપ્રપ્રવિલોલચઞ્ચૂ -
પુટેન મન્દં ચટકા વિરૌતિ ।
તદા સમાગચ્છતિ નગ્નપાદઃ
સવેપથુશ્ચાપિ તુષારકાલઃ ॥ ૫૪॥

ભજન્તિ સાક્ષ્યં હ્યૃતુભેદભાવે
ખગા ઇમેઽશ્વત્થતરુઃ કવિશ્ચ ।
કવેર્મનસ્યાર્તવસઙ્ક્રમાંસ્તાન્
જાનન્તિ નેમે તરુપક્ષિવર્ગાઃ ॥ ૫૫॥

સ્વકીયભાણ્ડસ્થિતપત્રખણ્ડા
વહન્તિ તેષાં કરલાઞ્છનાનિ ।
ઇદં કિલૈતિહ્યમહો કવિં તત્ -
પશ્ચાત્સ્થિતં પશ્યતિ કસ્સચેતાઃ ॥ ૫૬॥

મૂર્તીભવત્પ્રાક્તનનૈજપુણ્યાં
લજ્જાવનમ્રાં સમુપસ્થિતાં તામ્ ।
સ્વપ્નેષુ જાગ્રત્સ્વપિ ચાર્ધબોધે -
ષ્વયં સદા પશ્યતિ ચત્વરસ્થઃ ॥ ૫૭॥

પ્રશ્નઃ સ તસ્યાઃ પ્રથમઃ સ્મિતં ત -
દનુત્તરં હા પુળકપ્રદાયિ ।
નિવૃત્ય સા ચ સ્થિતિરપ્યપાઙ્ગ -
દૃષ્ટિર્વિલજ્જાઞ્ચિતતીક્ષ્ણપાતા ॥ ૫૮॥

આમન્ત્રણં દૂરવિનીતદોળા -
ગવાક્ષતોઽક્ષિપ્રહિતં ચ મૂકમ્ ।
ધાવદ્રથાશ્વોત્થખુરારવસ્સો -
પ્યનારતં સન્ત્યનુવર્તમાનાઃ ॥ ૫૯॥ યુગ્મકમ્
સંશ્રૂયતે કિં સ ખુરારવોઽદ્યા -
પ્યેતન્નુ કિં સત્યમુત સ્મૃતિર્વા ।

ભૂયોઽત્ર તેઽપ્યુજ્જયિનીમહીન્દ્ર -
દૂતાસ્સમાયાન્તિ હયાધિરૂઢાઃ ॥ ૬૦॥

તેષાં કુતો વા વિજનાઙ્ગણેઽસ્મિન્
પક્ષીન્દ્રચક્ષૂંષિ પરિભ્રમન્તિ ।
અત્રૈક એવાસ્તિ વટદ્રુમૂલે
સમાગતાસ્તે કિમિહૈવ દેશે ॥ ૬૧॥

યથાગતં તે પ્રતિયાન્તુ વેગા -
દિત્યાનતાસ્યોઽયમિહૈવ તસ્થૌ ।
નિમીલિતાક્ષશ્ચ વટદ્રુવૃક્ષે
સમર્પિતાઙ્ગોઽર્ધસુષુપ્તિમાપ ॥ ૬૨॥

આહત્ય ભૂમૌ સ્વભુજોગ્રદણ્ડે -
નૈતે દૃઢં તસ્ય પુરોઽવતસ્થુઃ ।
અલં સુષુપ્ત્યા કિમુ મૂઢ કાળિ -
દાસઃ કવિઃ કશ્ચિદિહાસ્તિ દૃષ્ટઃ ॥ ૬૩॥

દૃષ્ટ્વાપ્યસૌ ભૂપતિદૂતચિહ્ના -
ન્યાચારપૂર્વં ન ચ તાન્ સિષેવે ।
અયં તુ નિશ્શેષનિવીતભીત્યા -
દરાક્ષ ઇત્યદ્ભુતમાપ્નુવંસ્તે ॥ ૬૪॥

કોઽયં વિમૂઢો બધિરોઽથ મૂકઃ
પ્રષ્ટું ચ તેઽન્યત્ર જવેન જગ્મુઃ ।
પ્રત્યાગમિષ્યન્તિ કિમેત એવ
દૂતા મુદા ગ્રામજનોપનીતાઃ ॥ ૬૫॥

તં તે ક્ષમસ્વેત્યભિવન્દ્ય ભૂપ -
સન્દેશમિત્થં કથયાંબભૂવુઃ ।
ઉત્તિષ્ઠમાન પ્રિયસત્કવે ત્વા -
મિહોજ્જયિન્યાં વિનિમન્ત્રયામઃ ॥ ૬૬॥

આચાર્યવાક્યં ધ્વનતિ સ્મ ભૂયો -
પ્યેતત્સ્મૃતૌ મન્દ્રગભીરરમ્યમ્ ।
અબોધતઃ સાઞ્જલિરન્તરાસૌ
ગુરુસ્મૃતૌ પુણ્યજલે નિમગ્નઃ ॥ ૬૭॥

ન કાઞ્ચિદૂચે પ્રતિવાચમેષ
સ્વકીયરત્નં તુ જહાર પૂર્વમ્ ।
અવન્ત્યુદારા ચ કિમર્થમેત -
શ્ચિન્તોત્તરઙ્ગં હૃદયં બભૂવ ॥ ૬૮॥

નૈવાગમિષ્યામ્યહમેવમેવ
વદેતિ વક્ત્યાન્તરધર્મરોષઃ ।
નિમન્ત્રણં વિક્રમભૂપદત્તં
ન ત્યાજ્યમત્રૈવ શૃણોતિ ચેત્થમ્ ॥ ૬૯॥

જાજ્જ્વલ્યમાનજ્વલનદ્વિપાર્શ્વો
યથા મહાઘોરવને તથાયમ્ ।
તસ્થૌ કવિસ્તદ્ ઘનમૌનજન્ય -
પ્રત્યુત્તરાશઙ્કિતમાનસેષુ ॥ ૭૦॥

અસ્વસ્થિતેષુ ક્ષિતિપેન્દ્રદૂતે -
ષ્વેવં નિજગ્રામસુહૃત્સુ ચાત્ર ।
તિષ્ઠત્સુ મા ગચ્છ વિહાય ચાસ્મા -
નિત્યુક્તપૂર્વશ્ચ સુહૃદ્વરો યઃ ॥ ૭૧॥

સ એવ ચાગત્ય પુરોઽથ વાચ -
મૂચે કવિં તં વિનિરુદ્ધકણ્ઠઃ ।
ગન્તાસિ ચેન્નસ્ત્વભિમાન એવ
ગ્રામીણશૈલીયમહો વિશુદ્ધા ॥ ૭૨॥ વિશેષકમ્
પુષ્યત્યશોકઃ કિલ દોહદેન
તથા કવેરઙ્કુરિતા પ્રતીક્ષા ।
દ્રષ્ટું મુખં તત્ સકૃદપ્યહં કિં
શક્નોમિ યદ્યુજ્જયિનીં ગતશ્ચેત્ ॥ ૭૩॥

અથાહ નૈજોજ્જયિનીપ્રયાણ -
વાઞ્છાં કવિઃ સ્વલ્પવચોભિરેવ ।
તદા ચ તદ્ગ્રામમનોઽભિમાન -
હર્ષૈસ્તરઙ્ગાયિતમેવ બાઢમ્ ॥ ૭૪॥

સ્નેહાતિવર્ષેણ સમાર્દ્રચિત્તો -

સ્ત્યેષાં ચ નિર્વ્યાજહૃદાં તથાપિ ।
શઙ્કાવશિષ્ટા ભવતીહ પારં
પરાજિતોઽસ્મીતિ નિતાન્તશલ્યા ॥ ૭૫॥

પરાજયં ચાપ્યસકૃદ્ વરિષ્યે
યદીહજન્મન્યતુલપ્રિયાર્દ્રમ્ ।
પ્રિયામુખાબ્જં સકૃદપ્યહો તદ્
ભવેન્મુહુર્મે નયનસ્ય પાત્રમ્ ॥ ૭૬॥

ગત્વોચ્ચતાં દોળકસેવકાદિ -
વૃન્દં વિના યાસ્યતિ કાળિદાસઃ ।
પ્રશાન્તિમાપ્નોત્યપરાહ્ણસૂર્યા -
તપોઽનિલઃ સાન્ત્વયતીવ મન્દમ્ ॥ ૭૭॥

---

સપ્તમઃ સર્ગઃ

ઉજ્જયિનીં પ્રતિ

કિમાદ્યદૃષ્ટિપ્રણયોઽત્ર શિપ્રા -
પુરોઽવતસ્થૌ કવિરાર્દ્રચિત્તઃ ।
શીતાનિલસ્યાથ નિમન્ત્રણેન
સ્નેહોદયે તત્ર ચ ગાહતે સ્મ ॥ ૧॥

ક્લમઃ ક્રમાલ્લીયત એવ શૈત્યે
સ્નાત્વોપવિષ્ટોઽસ્તિ શિલાતલેઽસ્મિન્ ।
શીતોપચારં કુરુતે સ શિપ્રા -
વાતોઽબ્જગન્ધાકલિતાંબુબિન્દુઃ ॥ ૨॥

અજ્ઞાતમેતં પથિકં ચ કસ્મા -
જ્જન્માન્તરસ્થાપિતગાઢબન્ધાત્ ।
સ્વપ્રત્યભિજ્ઞાવિષયીકરોષિ
ત્વમુજ્જયિન્યુજ્જ્વલરમ્યહર્મ્યે ॥ ૩॥

દીર્ઘાયતે પત્તનરાજવીથી
પાર્શ્વસ્થસૌધેષુ સમુત્પતન્તિ ।
સંગીતવાદ્યધ્વનિભિશ્ચ સાર્ધં
નૃત્તાન્તરે નૂપુરશિઞ્જિતાનિ ॥ ૪॥

ધૂપેન કાલાગરુચન્દનાભ્યાં
સુસંસ્કૃતેનોષ્મળચુમ્બનૌઘૈઃ ।
સંવૃણ્વતા કામપિ કેશિનીં તૈ -
ર્ગવાક્ષરન્ધ્રૈર્નિભૃતં ગતે તુ ॥ ૫॥

વ્યાપ્નોતિ કો માદકગન્ધપૂરઃ
સઙ્ક્રીડયન્તી ગૃહશારિકા કા ।
ઉદેતિ દેવેન્દ્રધનુર્વળભ્યાં
મયૂરપિઞ્છાચલનૈર્મનોજ્ઞમ્ ॥ ૬॥ યુગ્મકમ્
ભૂમાવયં ગચ્છતિ પાદચારી
સ્વર્ગસ્ય વક્ત્રં પુરતો વિભાતિ ।
સ્વર્ગોઽત્ર સક્ત્યા સમુદેતિ તત્ર
વૈરાગ્યચન્દ્રોદય એવ ભાતિ ॥ ૭॥

દયૈવ ગઙ્ગા મદભઙ્ગરૂપો
વહ્નિશ્ચ નિત્યં શરણં પ્રયાતઃ ।
યન્મસ્તકં યસ્ય ચ વીર્યબિન્દૌ
શેતે વિશાલં ગગનં સુખેન ॥ ૮॥

સુધાયતે યસ્ય ગળે વિષં ચ
તસ્યાલયે ચણ્ડમહેશ્વરસ્ય ।
પ્રભાતપૂજાસુ ચ ઘણ્ટિકાયાઃ
શ્રોત્રં ગતો મન્દ્રગભીરનાદઃ ॥ ૯॥ યુગ્મકમ્
વિન્યસ્ય પાદં શિશુવત્ સલીલં
સોપાનમારુહ્ય યથાક્રમેણ ।
જગત્પિતુસ્તસ્ય પુરઃ સ્થિતોઽસૌ
કૃતાઞ્જલિર્મીલિતલોચનોઽભૂત્ ॥ ૧૦॥

મુખે ચ યા સૃષ્ટિરુદેતિ મન્દ્ર -
સ્થાય્યાં શુભાશીર્વિશદાક્ષરા સા ।
પુનઃ સ સાક્ષાત્કુરુતે ત્રિલોકી -
સમ્રાજમાકાશમહાધિપં તમ્ ॥ ૧૧॥

ગન્તું તતો વિક્રમરાજધાની -
મૈચ્છત્ કવિસ્તં પ્રતિપાલયન્તીમ્ ।

સૂક્તિઃ પુરૈવોજ્જયિનીં ગતા તા -
મન્વેતિ કર્તાદ્ય યથાગુરૂક્તિ ॥ ૧૨॥

પુષ્પાઙ્ગણં પ્રાપ્ય સ ગોપુરેણ
મુખ્યસ્ય સૌધસ્ય પુરો જગામ ।
દ્વાઃસ્થસ્તદા તત્પદચારિપાન્થ -
ક્ષીણાર્તભાવં તુ નિરીક્ષતે સ્મ ॥ ૧૩॥

સ્નાનેન શુદ્ધોઽપિ કુચેલકોઽયં
કો વા ભવેદંસવિલમ્બિભાણ્ડઃ ।
અથાગતશ્ચાહ નૃપાય કાળિ -
દાસં પુરદ્વારિ વદ સ્થિતં મામ્ ॥ ૧૪॥

કિં કાળિદાસઃ શ્રુતપૂર્વમેવ
તન્નામ નામૈવ તતોઽધિકં ન ।
અથાન્તરાનીતકવિઃ સ રાજ -
દૂતાનુયાતશ્ચરતીહ મન્દમ્ ॥ ૧૫॥

ગચ્છત્યસૌ પક્ષિમૃગાદિશિલ્પ -
હૃદ્યોન્નતસ્તૂપશતાનિ તાનિ ।
પુસ્તાનિ ચિત્રાઞ્ચિતપાર્શ્વભિત્તીઃ
પશ્યન્ સુવૃત્તાન્તરરમ્યવીથ્યા ॥ ૧૬॥

સમ્પૂર્યતે વેણુમૃદઙ્ગવીણા -
નાદૈઃ શ્રુતિઃ સિક્તમથાક્ષિ વર્ણૈઃ ।
દૃષ્ટં ચ સર્વં રમણીયમેવ
શ્રુતાશ્ચ સર્વે મધુરાર્દ્રશબ્દાઃ ॥ ૧૭॥

ગ્રામપ્રિયોઽયં તુ તથાપિ રાજ -
હર્મ્યં જનાકીર્ણમિદં ગભીરમ્ ।
ઘોરાનલેનાવૃતવાસગેહ -
સમાનમેવેતિ વિમન્યતે સ્મ ॥ ૧૮॥

જાલં કિલેદં પરપુષ્ટનામ્નો -
પ્યતન્ત્રસઞ્ચારિવિહઙ્ગમસ્ય ।
તથાપિ નાકાનુકૃતિઃ પૃથિવ્યાં
મનુષ્યસૃષ્ટેયમનન્યરમ્યા ॥ ૧૯॥

સુદીર્ઘમાર્ગક્ળમતપ્તપાદઃ
સ વેત્રવત્યાઽઽદરતોઽનુયાતઃ ।
ઉપૈતિ સોપાનમશેષવિદ્ધ -
દભ્યર્થિતં મણ્ડપસન્નિધિસ્થમ્ ॥ ૨૦॥

તિષ્ઠત્યસૌ વિસ્મિતનેત્રયુગ્મઃ
કવિઃ પરં વિક્રમચક્રવર્તી ।
સિંહાસનસ્યોપરિ સન્નિવિષ્ટો
વિરાજતે સૂર્યસમાનતેજાઃ ॥ ૨૧॥

સ્વર્ણચ્છદૈઃ કેસરિભિશ્ચતુર્ભિ -
ર્ધૃતં હિ સિંહાસનમસ્ય પશ્ચાત્ ।
શુક્ળાભ્રશુભ્રાભસુવર્ણદણ્ડ -
ચ્છત્રં ચ શૈત્યપ્રદચામરે ચ ॥ ૨૨॥

સુચિત્રિતં યેન રસાર્દ્રવાચા
રઘૂત્તમાનાં ચરિતં સુધીરં ।
કવિઃ સ પશ્યત્યધુનૈવ કઞ્ચિ -
ન્મહીપતિં હ્યેષ તુ વિક્રમાર્કઃ ॥ ૨૩॥

શકારિમેતત્સદૃશં વ્યચિન્તિ
પૂર્વં તથા નેત્યવધાર્યતેઽદ્ય ।
અયં ન તીક્ષ્ણવ્રતવાન્ દિલીપો
રઘુર્ન યો દિગ્વિજયી યશસ્વી ॥ ૨૪॥

અજોઽપિ નાર્દ્રાકુલમાનસસ્તત્ -
પુત્રોઽપિ નો યઃ પ્રિયવલ્લભાયૈ ।
ગૃહીતમૃત્યુર્ભવતિ સ્મ નૈવ
ત્યાગૈકશીલઃ સ ચ રામચન્દ્રઃ ॥ ૨૫॥

અનન્વયો વિક્રમભૂમિપાલ -
સ્તથાપિ કામપ્યકળઙ્કકન્યામ્ ।
સ્વીયાં વ્યધાદ્ યો વિનિગૂઢતન્ત્રૈ -
સ્સ ચાગ્નિમિત્રઃ સ્મરણે પ્રવિષ્ટઃ ॥ ૨૬॥ કલાપકમ્

એષા કથા યદ્યપિ વિક્રમાર્ક -

કીર્તીન્દુમધ્યેઽસ્તિ કળઙ્કરેખા ।
તથાપિ હસ્તાહિતચામરાભિ -
સ્તન્વીભિરુત્પક્ષ્મળતૂલિકાભિઃ ॥ ૨૭॥

અદૃશ્યપત્રેષુ શકોગ્રયુદ્ધે
વિજેતુરેતન્નૃપવિક્રમસ્ય ।
પ્રતાપશૌર્યાદિકથાવિશેષો
વિલિખ્યતેઽદ્યાપિ નિરન્તરાળમ્ ॥ ૨૮॥

નક્ષત્રમાલાધવળાન્તરીક્ષ -
મધ્યે યથા પૂર્ણશશાઙ્કબિમ્બમ્ ।
વિભાતિ તદ્વત્ ખલુ વિક્રમાર્ક -
રાજાધિરાજઃ સ હિ ભીમકાન્તઃ ॥ ૨૯॥

જાનાતિ નાચારમસૌ તથાપિ
રાજ્ઞે જયાશીર્વચનાનિ દત્વા ।
આનમ્રશીર્ષઃ કવિરત્ર તસ્થૌ
શુભાય વા પ્રાર્થિતવાન્ મહેશમ્ ॥ ૩૦॥

જયાલુરાદ્યોજ્જયિનીપુરીયં
યસ્યાઃ શિરો વા મન એવ રાજા ।
સ્મશ્રુપ્રવૃદ્ધે ક્ષિતિપાલવક્ત્રે
સ્મિતં તુ કિઞ્ચિત્ સમુદેતિ મન્દમ્ ॥ ૩૧॥

યથામ્બરે શ્રાવણમેઘપુર્ણે
મનોહરા ચન્દ્રકલાવતીર્ણા ।
દૃષ્ટ્વૈતદસ્મિન્ કવિમાનસેઽપિ
વિશ્વાસલેશઃ સ્ફુટિતઃ ક્રમેણ ॥ ૩૨॥

રજઃપ્રભાવોડુવિલોચને તે
નવાગતં તં સ્પૃશતઃ સુખેન ।
આરોઢુમત્રોન્નતપીઠમેનં
નિમન્ત્રયત્યાઙ્ગ્યવશાત્ સભાયામ્ ॥ ૩૩॥

ક્ષીણઃ કવિર્નમ્રશિરાઃ સ નન્દ્યા
સમગ્રહીદાસનમાદરેણ ।
શરીરમેતદ્દયનીયમસ્ય

વેષશ્ચ ભૂષાપ્યપરિષ્કૃતા ચ ॥ ૩૪॥

સુસંસ્કૃતઃ કિં પરમાત્મદીપઃ
પ્રકાશતે વા લઘુમૃદ્ઘટેઽસ્મિન્ ।
દત્તો વરોઽયં કવિકીર્તિરૂપઃ
કેનોન્મિષદ્યૌવનધારિણેઽસ્મૈ ॥ ૩૫॥

જાનીમહેઽત્રાદ્ય ચરન્ સુદૂરં
સમાગતો માળવદેશતસ્ત્વમ્ ।
તદ્ ગચ્છ વિશ્રામય ચાવિળમ્બં
સ્વચ્છન્દમિત્યાહ નૃપઃ પુનશ્ચ ॥ ૩૬॥

નૈવાતિથિસ્ત્વં મમ રાજધાન્યાં
મદાત્મમિત્રં ભવસીતિ વિદ્ધિ ।
મૈત્રી કથં નિસ્સમચિત્તયોરિ -
ત્યન્તઃ કવેશ્ચિન્તિતમસ્તિ કસ્માત્ ॥ ૩૭॥ યુગ્મકમ્
ક્વ ચાતપત્રસ્ય ચ ચામરસ્ય
છાયાં ગતોઽધીશપદાધિકારાત્ ।
ઉન્મત્તચિત્તો નૃપતિઃ ક્વ ચાયં
કવિઃ કલાલોલમનાશ્ચ નિસ્સ્વઃ ॥ ૩૮॥

શાન્તિં ન કાઞ્ચિલ્લભતે ચ ચિત્ત -
મસ્મિન્ નિકેતેઽધિકશાન્તિલક્ષ્યે ।
ક્ષૌમાસ્તૃતેયં મૃદુરમ્યશય્યા
વિચિત્રપર્ણાન્યુપબર્હણાનિ ॥ ૩૯॥

વિતાનકાલંકૃતમઞ્જુમઞ્ચઃ
પીઠાનિ રૂપ્યાવપનેષુ તત્ર ।
માધુર્યધુર્યાણિ ફલાનિ નૈક -
મદ્યાનિ ચ સ્ફાટિકભાજનેષુ ॥ ૪૦॥

કવિં શુભાશંસનયા ચ સાકં
પ્રલોભકાનિ પ્રતિપાલયન્તિ ।
કિન્ત્વત્ર ચેતો વિજનેઽત્યગાધ -
દુઃખહ્રદે હા પતતીવ ભાતિ ॥ ૪૧॥ વિશેષકમ્
સત્રે નિશાયાં ચ વટદ્રુમૂલે -

પ્યબાધનિદ્રાસુખમાર્જિતં કિમ્ ।
ભદ્રેઽત્ર કોષ્ઠે મૃદુમઞ્ચકેઽસ્મિન્
નિશ્શબ્દરાત્રેઽપ્યમલપ્રશાન્તે ॥ ૪૨॥

નિદ્રાં વિદૂરીકુરુતે ચ કો વા
નિસ્તન્દ્રમસ્વાસ્થ્યમિહાન્તરા કિમ્ ।
અશાન્તચિત્તસ્ય કુતઃ સુખં કિં
મથ્નાતિ ચાસ્વસ્થમનોઽવશં વા ॥ ૪૩॥ યુગ્મકમ્
કવેર્મનો યોઽત્ર સમાચકર્ષ
નિશ્શબ્દમોહો વિફલઃ સ કિં સ્યાત્ ।
કરોષિ કિં ગ્રામસુતે મનોજ્ઞે
હ્યન્તઃપુરેઽસ્મિન્ કુહચિદ્ વસન્તી ॥ ૪૪॥

ક્વ વાધુના ત્વં સુમવાટિકાયાં
લીલાગૃહે વા પ્રમદાવને વા ।
કિં તે સ્મૃતૌ તાઃ કનકાભસન્ધ્યાઃ
ગ્રામાપગાસૈકતશીતવાતાઃ ॥ ૪૫॥

અપિ સ્મરસ્યેકવટદ્રુમં ત -
ચ્છાયાગતં તં કતિચિલ્લિખન્તમ્ ।
દિદૃક્ષસિ ત્વં સકૃદપ્યહો ત -
ન્મુખં તવેક્ષાવિહિતાનુયાત્રમ્ ॥ ૪૬॥

ચિત્તં કવેરાત્મગતેષ્વશાન્તે -
ષ્વામગ્નમદ્ધા પુનરુત્થિતં તત્ ।
સ્પૃષ્ટારરઃ કશ્ચિદિહાર્ધબોધે -
નાન્તઃપ્રવેશાય કૃતાનુવાદઃ ॥ ૪૭॥

દ્વારં વિવૃત્ય પ્રવિવેશ સૌમ્યો -
દારસ્મિતઃ સાઞ્જલિરન્તરાસૌ ।
શુશ્રૂષણાર્થં ચ કવેર્નિયુક્તો
નૃપેણ યોઽગ્ર્યો વયસા દયાવાન્ ॥ ૪૮॥

સ્નેહાર્દ્રવાગ્દર્શનસેવનાદ્યૌ -
ત્સુક્યં કવિં તોષયતિ સ્મ યસ્ય ।
સપ્રશ્રયં પલ્લવનામકોઽહ -

મિત્યબ્રવીદ્ યોઽથ તમન્વિયેષ ॥ ૪૯॥

અભીષ્ટભોજ્યાનિ ચ નિત્યનૈમિ -
ત્તિકાનિ કર્માચરણાનિ તસ્ય ।
સ્મિતેન મૌનં સ સમાચરંસ્ત -
દનન્તરં ગૌરવયુક્તમાહ ॥ ૫૦॥

ન તાનિ વક્તું પ્રભવામ્યહં તુ
ગ્રામીણ એવાત્ર ચ પાર્થિવાનિ ।
ધાન્યાનિ મૂલાનિ ફલાનિ સર્વા -
ણીષ્ટાનિ મેઽન્યત્ કિમિતિ બ્રવીમિ ॥ ૫૧॥ વિશેષકમ્
ક્ષણં વિચિન્ત્યાહ કવિઃ સદાપિ
દ્રષ્ટું ચ મામર્હસિ પલ્લવ ત્વમ્ ।
તસ્યેષ્ટકાર્યાણિ સદાનુતિષ્ઠન્
સ પલ્લવોઽભૂત્ કવિમિત્રમાપ્તમ્ ॥ ૫૨॥

અન્યત્વબુધ્યા પ્રતિભાન્તમેતં
રાજાલયં મામિહ પલ્લવોઽયમ્ ।
બધ્નાતિ યસ્તં નિજસન્નિધાનં
નેતું નૃપાજ્ઞાં વિનિવેદ્ય તસ્થૌ ॥ ૫૩॥

પ્રણમ્ય ભૂપં કવિરાસ્ત નાના -
રત્નાઞ્ચિતેઽન્યત્ સદસીવ રત્નમ્ ।
નાન્દીં મહાકાળપરાં જિગાય
કોઽન્યઃ કવેરસ્તિ ચ વન્દનીયઃ ॥ ૫૪॥

અત્યુન્નતૈશ્વર્યધરોઽપિ સર્વં
દત્ત્વાશ્રિતેભ્યો ધૃતકૃત્તિવાસાઃ ।
કાન્તાર્ધદેહોઽપિ વિરક્તચિત્તો
યતીશ્વરોઽષ્ટાઙ્ગકળેબરેણ ॥ ૫૫॥

બિભ્રત્પ્રપઞ્ચોઽપ્યભિમાનહીનો
મહેશ્વરો મઙ્ગલસત્પથેષુ ।
નિરુધ્ય વૃત્તિં ચ તમોમયીં વો
નયત્વિતિ પ્રોચ્ય સમાપયત્ સઃ ॥ ૫૬॥ યુગ્મકમ્
ઈશસ્તવેઽપ્યત્ર કિમાન્તરાર્થઃ

કટાક્ષ્યતેઽચિન્તિ ન કૈશ્ચિદેવમ્ ।
નૃપોઽપિ ધન્યોઽદ્ય તુ કાળિદાસ -
સૂક્ત્યા સભા મે સમલઙ્કૃતેતિ ॥ ૫૭॥

દ્વેધા સભાં મે નવરત્નભૂતા -
મલઙ્કુરુ ત્વં વિદુષાં મનોજ્ઞામ્ ।
એવં નૃપે વક્તરિ સાધુવાદૈઃ
સભાતલં હર્ષસમૃદ્ધમાસીત્ ॥ ૫૮॥

અસૌ તુ ભાગ્યપ્રણયૈકપાત્રં
વાણીપ્રસાદં કથમેષ લેભે ।
વાગસ્ય માયાશિખિબર્હ એવે -
ત્યાસીત્ સભા મિશ્રવિકારરમ્યા ॥ ૫૯॥

પપ્રચ્છ રાજા કવિનોક્તપદ્યં
કસ્મિંશ્ચ કાવ્યે ભવતીત્યથેદમ્ ।
સ્વનિર્મિતે નૂતનનાટકે ચ
નાન્દીત્યવોચત્ કવિરાદરેણ ॥ ૬૦॥

તદ્દર્શનાયાત્તકુતૂહલોઽસા -
વાહ પ્રયોગઃ ક્રિયતાં ચ તસ્ય ।
આગામિચૈત્રોત્સવ એવ તત્રા -
સ્ત્યાજ્ઞા ન વાશીર્વચનં ચ રાજ્ઞઃ ॥ ૬૧॥

ભાસાદિપૌરાણિકકાવ્યકર્તૄન્
વિહાય કિં સ્નિહ્યતિ કાળિદાસે ।
સભેયમિત્યસ્તિ કવેર્વિશઙ્કા
સભાસદાં ચાપિ નૃપસ્ય નૈવ ॥ ૬૨॥

સ્મરાન્તરાચાર્યવરં વિનીતો
વન્દસ્વ ચેત્યાત્મનિ મન્ત્રિતે તુ ।
કવિર્નિજસ્થાનગતોઽસ્તિ કાવ્યં
ધ્વનિપ્રદીપ્તં લળિતં યથા સ્યાત્ ॥ ૬૩॥

ઉદ્યત્સમાહ્ળાદસુપૂર્ણિમાયા -
મપ્યસ્તશક્ત્યા હસિતું યથાબ્ધિઃ ।
સર્વાત્મહૃષ્ટઃ કથમાતપત્ર -

ચ્છાયાગતશ્ચામરવાતશીતઃ ॥ ૬૪॥

કક્ષ્યાપ્રદીપં નિભૃતં પ્રકાશ્ય
શુશ્રૂષિકાયાં તુ બહિર્ગતાયામ્ ।
આયાતિ દેવાહુતિધૂમગન્ધે
સન્દૃશ્યતે હા સ્મૃતિસાનુસીમ્નિ ॥ ૬૫॥

અપુષ્પિતાશોકતરોરધસ્તા -
ન્મઞ્જીરશિઞ્જામનુ પુષ્પમેળા ।
અસ્ત્યત્ર સર્ગાત્મકભદ્રમૂર્તિ -
શ્ચિત્તં તુ ભગ્નં વ્યથિતં ચ યસ્ય ॥ ૬૬॥ યુગ્મકમ્

---

અષ્ટમઃ સર્ગઃ

રઙ્ગોત્સવસ્ય ધ્વજારોહઃ

લતાનિકુઞ્જે રસિકોઽઙ્ગનાનાં
પુંસ્કોકિલો ગાયતિ લીનદેહઃ ।
અન્તઃપુરાન્તાત્ પ્રવહન્તિ તન્ત્રી -
લયાન્વિતપ્રેમસુગીતકાનિ ॥ ૧॥

નવીનવાસન્તમહોત્સવસ્ય
ધ્વજાધિરોહં દધતેઽતિમોદાઃ ।
સપલ્લવાશોકપલાશચૂતા -
સ્તદોજ્જયિન્યસ્તિ વસન્તરથ્યા ॥ ૨॥

સુગન્ધતૈલજ્વલદગ્નિદીપા
વસન્તપુષ્પાણ્યભવન્ નિશાયામ્ ।
આતોદ્યગીતાનિ ચ નાટ્યગેહે
નાન્દીં બ્રુવન્ત્યત્ર મહોત્સવસ્ય ॥ ૩॥

સર્વેન્દ્રિયામોદવિશેષહેતુઃ
સામાજિકાનાં ચ સતાં મનોજ્ઞમ્ ।
પ્રયુજ્યતેઽદ્ય પ્રથમં હિ કાળિ -
દાસપ્રણીતં નવનાટકં તત્ ॥ ૪॥

રાજાધિરાજઃ પુરતો નિષણ્ણઃ
પશ્ચાત્ કલાતત્ત્વવિદો રસજ્ઞાઃ ।

આર્દ્રાશયાશ્ચાન્યસુખાસુખજ્ઞાઃ
શઙ્કાવિલોલાઃ સુસમાનચિત્તાઃ ॥ ૫॥

નવ્યેષુ સર્વેષુ પરાઙ્મુખાશ્ચ
ભવન્તિ દોષૈકદૃશશ્ચ કેચિત્ ।
પ્રતિક્ષણં વર્ધત એવ કૌતૂ -
હલં તદેકાગ્રલયં વિચિત્રમ્ ॥ ૬॥ યુગ્મકમ્
યદાગ્નિમિત્રસ્ય પુરો નિજાત્મા -
ર્પણં પદં માળવિકા વિગીય ।
નૃત્તં વિધત્તે ચ તદા પ્રહર્ષ -
વર્ષઃ કિયાન્ વિક્રમભૂપચિત્તે ॥ ૭॥

ઇયં પુરો માળવિકાપરાસ્તિ
નિવેદયન્તી પદમેવ તન્મે ।
ચિન્તાકુલોઽભૂન્નૃપતિસ્તદાયં
કવીશ્વરઃ કિન્નુ પરેઙ્ગિતજ્ઞઃ ॥ ૮॥

યતો હ્યહં માળવિકાનુરક્ત
ઇત્યેતદત્યન્તનિગૂઢમેવ ।
રાજાલયસ્થં ચ રહસ્યમેવં
કવિર્વિજાનાતિ કથં ન જાને ॥ ૯॥

કવેસ્તૃતીયં નયનં ચકાસ્તિ
યેનૈકહસ્તામલકપ્રકાશમ્ ।
જગત્ત્રયં પશ્યતિ યસ્ય સર્વ -
મન્તર્નિવિષ્ટં સુતરાં સુતાર્યમ્ ॥ ૧૦॥

મદીયસત્યાન્યત એવ મન્યે
મમ પ્રિયસ્વપ્નશતાનિ ચાસૌ ।
કવિઃ સમાવિષ્કુરુતે યથા મે
હૃદિ પ્રવિષ્ટોઽતિનિગૂઢદેહઃ ॥ ૧૧॥

પુરોઽત્ર ચેટી બકુળાવલીયં
રાજ્ઞીપ્રદત્તેન ચ નૂપુરેણ ।
કરોત્યલં માળવિકાપદાબ્જ -
માલક્તકાર્દ્રારુણકોમળાભમ્ ॥ ૧૨॥

અનુક્ષણં સર્વમિદં વિલોક્ય
તિષ્ઠત્યસૌ વૃક્ષલતાનિલીનઃ ।
નૃપોઽગ્નિમિત્રસ્તરળાકુલાઙ્ગઃ
સભાસ્થિતોઽયં ચ નૃપસ્તથૈવ ॥ ૧૩ ॥

સૂક્ષ્માણિ રઙ્ગે ચલનાનિ નાના -
સભાસદાં ચ પ્રતિભાવભેદાન્ ।
સમં નિરીક્ષ્ય ક્વચિદત્ર કોણે
કવિર્નિષણ્ણો વિનિગૂઢહર્ષઃ ॥ ૧૪ ॥

તથાપિ ગૂઢં નિહિતં યદન્ત -
ર્દુઃખં બહિસ્તત્પ્રવહત્યબાધમ્ ।
ઇયં ચ મે માળવિકાઽવરોધે
વિભાતિ યા માળવરમ્યશોભા ॥ ૧૫ ॥

વિરાજતેઽસૌ હિમશુભ્રપુષ્પં
રાજ્ઞી ચ ધારિણ્યતિમાત્રશુદ્ધા ।
ઇરાવતીયં મધુમત્તલોલા
ચામ્પેયસૂનં પ્રવિલોભનીયમ્ ॥ ૧૬ ॥

એતત્પ્રસૂનદ્વયમગ્નચિત્તો
નૃપાલભૃઙ્ગઃ કલિકાં નવીનામ્ ।
કન્યામિમાં માળવિકાં વિલોક્ય
ગુઞ્જન્નિહાસ્તે મધુલોલુપોઽયમ્ ॥ ૧૭ ॥

યદા મયૈતદ્વિટભૃઙ્ગમોહઃ
પ્રશંસિતોઽભૂદ્ વિમલાનુરાગઃ ।
તદાહમાત્માનમનિન્દ્યમેવે -
ત્યવૈમિ નિષ્પક્ષવિમર્શનેન ॥ ૧૮ ॥

અતીવ નિન્દ્યા વિટવૃત્તિરેષા
સાધારણાનાં યદિ માનવાનામ્ ।
ગ્રાહ્યો હિ ધર્મો વિહિતો હિતશ્ચા -
સાધારણાનાં ધરણીપતીનામ્ ॥ ૧૯ ॥

અહો વસન્તોત્સવ એવ તેષાં
રાજ્ઞામિદં જીવિતમસ્તિ યસ્મિન્ ।

ન કેવલં ચૈકસુમેન દેયા
માધ્વી સહસ્રૈઃ કુસુમૈઃ પરન્તુ ॥ ૨૦॥

પ્રત્યક્ષદૃશ્યં ત્વિદમેવ ચાતઃ -
પરં વિશેષાન્તરિકાર્થજાતમ્ ।
જાનન્તુ તેઽજ્ઞાતવચાંસિ ચૈવં
સત્યસ્ય તાસ્તાઃ પરભાગશોભાઃ ॥ ૨૧॥

ઉદ્યાનરઙ્ગે પરિતોઽગ્નિમિત્રો
ભ્રમત્યલં કામવિકારમૂઢઃ ।
કર્તું મનશ્શાન્તિવિભઙ્ગમસ્મિન્
સ્મરોઽદ્ય કિં પાતયતિ પ્રકામમ્ ॥ ૨૨॥

મન્દારજાતીસહકારપુષ્પ -
બાણાનથાસ્યા નિશિતાન્ કટાક્ષાન્ ।
કામાતુરો માળવિકાપદાબ્જ -
સ્પર્શામૃતં પ્રાર્થયતે નરેન્દ્રઃ ॥ ૨૩॥ યુગ્મકમ્
વિન્ધ્યં ચ વિદ્યુલ્લતયા નિહન્તુ -
મભ્યુદ્યતેવામ્બુદમાલિકા સા ।
ઇરાવતી રોષકષાયિતા સ્વ -
કાઞ્ચ્યા નૃપં તાડયિતું પ્રવૃત્તા ॥ ૨૪॥

તસ્યાસ્તુ પાદગ્રહણેન રાજા
માં દણ્ડયેત્યાહ શમાભિલાષી ।
ગૃહ્ણીષ્વ તૌ માળવિકાપદાવિ -
ત્યુક્ત્વા ગતા સા જ્વલદગ્નિકલ્પા ॥ ૨૫॥

પશ્યામિ નાટ્યે મુકુરે મદીયં
સત્યં કિલેત્યેવમમંસ્ત ભૂપઃ ।
નિર્વર્ણ્ય રઙ્ગં ત્વિદમાત્તહર્ષા
સભાપિ હૃષ્ટં ચ કવિં કરોતિ ॥ ૨૬॥

યથાનૃપેચ્છં તરુણીં વિવોઢું
કરોત્યુપાયાન્ બહુધા રસેન ।
યો ગૌતમો નર્મસુહૃત્ સ એવે -
ત્યલં વિજાનાતિ નૃપાલવર્યઃ ॥ ૨૭॥

વિના તુ ગત્યન્તરમત્ર રાજ્ઞો
નવેષ્ટવધ્વૈ પ્રિયધારિણી સા ।
સુસ્વાગતં વક્તિ સશઙ્ખનાદં
સમાપ્યતે ચાન્તિમપઞ્ચમોઽઙ્કઃ ॥ ૨૮॥

તત્સૂચકો મઙ્ગળમઞ્જુગાના -
લાપશ્ચ હૃદ્યો વિદુષાં સમાજે ।
સમુત્થિતં તત્ કરઘોષણં ચ
સન્તોષયામાસતુરદ્ય ભૂપમ્ ॥ ૨૯॥

અન્વિષ્યતે સર્વજનૈઃ કવીન્દ્રો
રાજ્ઞાપિ સાર્દ્રસ્વરભાવભાજા ।
આનીયતેઽયં પુરતશ્ચ તસ્ય
સંતૃપ્તિસમ્પૂરિતનેત્રયુગ્મઃ ॥ ૩૦॥

કરેઽસ્ય રાજા નવરત્નરમ્યાં
સુશૃઙ્ખલામર્પયતિ દ્રુતં સા ।
પતત્યથાત્મન્યતિગૂઢમસ્મિન્
ભુજેઽથવેતિ ક્ષણમાલુલોચ ॥ ૩૧॥

આસ્તાં ન જાનાતુ કદાચિદસ્ય
ભારં નિષણ્ણોઽસ્તિ કવિર્વિનમ્રઃ ।
આભૂષ્યતે કિં મકુટેન તસ્ય
શીર્ષઃ પ્રકામં વિનયાભિધેન ॥ ૩૨॥

આરાધનાપ્રોજ્જ્વલનીલનેત્રૈ -
ર્નિરાજ્યતેઽયં તરુણઃ કવિઃ કિમ્ ।
દગ્ધાઃ કિમીર્ષ્યાઘનસારખણ્ડાઃ
સવિસ્મયાલોકનભાજનેષુ ॥ ૩૩॥

હર્ષાતિરેકેષુ સભાખિલા સા
નિમજ્જનોન્મજ્જનમાતનોતિ ।
તતઃ સમુદ્ભૂય ચિરાદ્ ધ્વનન્ત્ય -
વિચ્છિન્નધારોજ્જ્વલહસ્તઘોષા ॥ ૩૪॥

નવાગતો નાટકકૃત્ તથાપિ
તન્નાટકં પ્રીતિદમાબભૂવ ।

વિદ્વજ્જનાનામિતિ નાટ્યકારાઃ
પરસ્પરં સમ્પ્રતિ મન્ત્રયન્તિ ॥ ૩૫॥

પ્રીતા વયં સાંપ્રતમિત્યવાદી -
ન્નૃપાલકો યન્મહતી પ્રશંસા ।
પ્રસાદરૂપેણ વિરાજતે સ્મ
પ્રત્યક્ષમેવાસ્ય વિલોચનાન્તે ॥ ૩૬॥

રઙ્ગે સ્થિતાં નાટકનાયિકાં સ
દૃષ્ટ્વા તુ રાજા લળિતાશયાં તામ્ ।
પ્રોવાચ નૃત્તં છલિતં તવેદં
દ્રષ્ટું ચ ભૂયોઽપિ મમાભિલાષઃ ॥ ૩૭॥

કૃતાઞ્જલિર્મન્દમથો જગામૈ -
વાધોમુખી સા ન વિલોક્ય કઞ્ચિત્ ।
અન્તઃપુરં પ્રાપ નૃપાલકો નિ -
શ્શૂન્યસ્ત્વભૂન્નાટ્યગૃહાઙ્ગણોઽપિ ॥ ૩૮॥

એકાન્તસઙ્કેતમવાપ નૈજં
ચિન્તાન્તરં વા સ કવિઃ કિમર્થમ્ ।
સન્દિગ્ધચિત્તોઽભવદેષ તસ્યાં
સંવૃત્ય દૃષ્ટ્વેમમિહ સ્થિતાયામ્ ॥ ૩૯॥

અચિન્તિ યન્માળવિકા મમેયં
કિમુ ક્ષણાત્ પ્રાક્ તદભૂદ્ યથાર્થમ્ ।
યદ્યેકમત્રાનુવિચારયેત્ ત-
મેવાથ પશ્યેદિતિ કિન્નુ માયા ॥ ૪૦॥

ઇયં ચ તે માળવિકેતિ ગૂઢં
દૌત્યં વહન્તી ચ કપોતિકૈકા ।
સમેત્ય સન્માનસનીડકં તત્
પ્રવિશ્ય સઞ્જલ્પતિ કિં મનોજ્ઞમ્ ॥ ૪૧॥

હર્ષસ્તદાકસ્મિકદર્શનેન
ખેદોઽથવા તત્ક્ષણિકત્વદૃષ્ટેઃ ।
ન કિઞ્ચિદૂચે મિથ ઇત્યતુષ્ટિ -
ર્દૃષ્ટોઽપ્યભિજ્ઞાત ઇવેતિ શઙ્કા ॥ ૪૨॥

અપશ્યદિત્યેવ યથાર્થમિત્થં
વિભિન્નચિન્તામથનેન જાતે ।
દન્દહ્યમાનો જ્વલનેઽતિઘોરે
લાક્ષાગૃહોઽભૂત્ કવિચિત્તમદ્ય ॥ ૪૩॥ યુગ્મકમ્
અસ્માદશક્યં તુ પલાયનં હા
તપૈવમેકાન્તદુરન્તતાયામ્ ।
ભાગ્યાતિરેકં મમ ચિન્તયિત્વા
નિદ્રાં ત્યજેયુર્બહવોઽત્ર રાત્રૌ ॥ ૪૪॥

એકાન્તનિર્ભાગ્યહતોઽસ્મિ નિદ્રા -
વિહીન એવેતિ ન કોઽપિ વેત્તિ ।
દ્વારેઽસ્તિ કઃ પલ્લવ એહિ કિં વા
સ્વરે તુ કાતર્યમબોધપૂર્વમ્ ॥ ૪૫॥

અસ્ત્યદ્ય યુષ્મદ્દિનમુજ્જયિન્યાં
સાર્વત્રિકં તે શુભનામ ચૈવ ।
ગતેષુ સભ્યેષુ સમેષુ કર્ણે
ધ્વનત્યસૌ હર્ષરવો ગભીરઃ ॥ ૪૬॥

કિમેતદાસ્યે ન સ હર્ષરાશિઃ
કિમત્ર ચિન્તાકુલિતસ્ત્વમાસ્સે ।
તદાપિ દૃષ્ટો ન ચ મન્દહાસો
ભવન્મુખે કશ્ચન યન્મુહૂર્તે ॥ ૪૭॥

અસ્મિન્ કરે વિક્રમભૂમિપેન
સમાર્દ્રચિત્તેન દયાધિકેન ।
વિભૂષિતે વીરસુશૃઙ્ખલેન
ભવાનભૂન્મુખ્યવિશિષ્ટરત્નમ્ ॥ ૪૮॥

વિદ્વત્સભાયાં મહિતોજ્જયિન્યાં
તથાપ્યયં ગૌરવભાવ એવ ।
ઇત્યાહ વેલાતટમેત્ય ફેનાન્
ભિન્દન્નિવોર્મિઃ સ ચ પલ્લવોઽપિ ॥ ૪૯॥ વિશેષકમ્
ગતે મુહૂર્તે તુ નિતાન્તમૂકે

સસ્માર દીનં કવિરાકુલાત્મા ।
અસ્મિન્ રહસ્યે કિલ ભાગભાક્ત્વં
કોઽન્યો ભજેત્ પલ્લવતોઽપ્યમુષ્માત્ ॥ ૫૦॥

રાજ્ઞા નિયુક્તો મમ સૌખ્યચર્યાં
નિર્વોઢુમેવાયમતઃપરં યઃ ।
મદિઙ્ગિતજ્ઞોઽભવદેષ મે ચ-
જ્જાનાતુ તદ્દુઃખજમાન્તરાર્થમ્ ॥ ૫૧॥

અથાહ મન્દં સ તુ પલ્લવસ્યા-
કાઙ્ક્ષાં પ્રગાઢાં શમયન્ કવીન્દ્રઃ ।
નિજપ્રિયગ્રામટિકાસુતાયાઃ
કથાં સ્વકીયાં ચ વિકારરમ્યામ્ ॥ ૫૨॥

કથાનુબન્ધઃ કવિનોચ્યતેઽય-
મિહૈવ જન્મન્યનુરાગમુગ્ધમ્ ।
દ્રષ્ટું સકૃત્ તન્મુખપદ્મમેત-
ન્નિમન્ત્રણં સ્વીકૃતમુજ્જયિન્યાઃ ॥ ૫૩॥

સર્વાભ્યસૂયાપદમદ્ય સર્વૈઃ
સમાદૃતોઽસૌ કવિરેવ કિં વા ।
અગાધતાયાં બડવાગ્નિદગ્ધ-
સમુદ્રવચ્છાન્તમના ઇવાસ્તે ॥ ૫૪॥

વિશ્વાસ્યભૂમેરતિવર્તતે હા
સત્યસ્ય નાનાવિધસૂક્ષ્મતત્ત્વમ્ ।
સ્મૃત્વા પરં પલ્લવ આહ ભૂયઃ
કથાવિશેષં તમનુક્રમેણ ॥ ૫૫॥

સ્મરામિ પદ્મેવ મનોજ્ઞકન્યા
કાચિત્ તતો માળવતઃ કદાચિત્ ।
અન્તઃપુરસ્યાઙ્ગણસીમ્નિ ચાસ્મિ-
ન્નાન્દોળિકાતોઽવતતાર મન્દમ્ ॥ ૫૬॥

સ્મરામિ ચાદ્યાપિ મુખં તુ તસ્યા
લુબ્ધેન પશ્ચાદનુધાવિતાયાઃ ।
મૃગ્યા ઇવોપેતભયં ન ચાન્યા

નૃત્તં ચકાર ચ્છલિતાભિધાનમ્ ॥ ૫૭॥

અભ્યસ્ય નૃત્તં લળિતં ચ ગીતં
વને લતોદ્યાનલતા ચ જાતા ।
એવં ચ સા નેત્રકનીનિકાભૂ-
ન્નાટ્યોત્તમાચાર્યપરમ્પરાણામ્ ॥ ૫૮॥

અન્તઃપુરે નૃત્તખળૂરિકાયા-
મેકાકિની સા નિષસાદ નિત્યમ્ ।
તસ્થૌ પરાસાં બહુનર્તકીનાં
મધ્યે ચ નિશ્શબ્દતરઙ્ગતુલ્યા ॥ ૫૯॥

કમપ્યસૌ પશ્યતિ નો તથાપિ
સમ્પશ્યમાના ભવતીહ સર્વૈઃ ।
અનન્તરં પલ્લવ આહ મન્દ-
મેતત્સુકન્યામુખદર્શનેન ॥ ૬૦॥

સ્વપ્નદ્રુમઃ પલ્લવિતો બભૂવ
શ્રીવિક્રમસ્યેતિ તુ કિંવદન્તી ।
પાષાણભિત્તેરપિ ચાસ્તિ કર્ણો
રહસ્યવેદીહ સમીરણોઽપિ ॥ ૬૧॥ યુગ્મકમ્
કવિઃ સ મૌનં ન બભઞ્જ સાલ-
ભઞ્જેવ નિશ્ચેષ્ટશરીરમાસ્તે ।
સ પલ્લવઃ સ્નેહવિલોલમંસે
સ્પૃશન્ કરેણૈવમુવાચ હાર્દમ્ ॥ ૬૨॥

કરોમિ કિં વા વદ માં યથેષ્ટં
મમાભિલાષસ્ત્વયમેક એવ ।
તયા સહૈકાન્તભુવિ સ્થિતસ્તાં
સમ્ભાષિતું કેવલમીક્ષિતું વા ॥ ૬૩॥

જાનાતિ યોઽન્તઃપુરગં ચ સર્વં
સ પલ્લવસ્તં કવિમેવમૂચે ।
સમ્ભાવયે સ્નેહમિમં પવિત્રં
ત્વદીયદૌત્યં ચ વહામિ ભદ્રમ્ ॥ ૬૪॥

નવં ચ રત્નં નવસૂજ્જ્વલં ચ

રત્નેષુ તેઽસ્મ્યુજ્જયિનિ પ્રકામમ્ ।
કીર્ત્યૈતયા વક્ષ્યસિ લબ્ધવાને-
વાસ્મિન્નસૂયાનિશિતાન્ પૃષત્કાન્ ॥ ૬૫॥

ભવદ્યશોરત્નમનોજ્ઞપેટા-
મેવં સદા પૂર્ણતરાં વિધાતુમ્ ।
તમસ્યનેકે પ્રવિનષ્ટસર્વા-
શ્ચરન્તિ નિશ્શબ્દવિલાપપૂર્ણાઃ ॥ ૬૬॥

સર્વેઽપ્યદૃશ્યાયતશ◌ૃઙ્ખલાભિ-
ર્બદ્ધા બલાન્નિષ્ઠુરબન્ધનેઽસ્મિન્ ।
એતેષુ મધ્યેઽન્યતમોઽપ્યહં ચે-
ત્યયં કવીન્દ્રઃ શયને પપાત ॥ ૬૭॥

સ્વચ્છન્દસઞ્ચારસુખેચ્છુરાત્મા
યોઽસ્યૈવ સાક્ષાદસહાયતાસૌ ।
કચ્ચિન્નિધિં હા પરિપાલયન્તઃ
સ્નેહેન વીથ્યાં તુ લસન્તિ દીપાઃ ॥ ૬૮॥ યુગ્મકમ્

---

નવમઃ સર્ગઃ

શ્યામયામાઃ

શ્યામપક્ષે કિમેતસ્મિન્ જ્યોત્સ્નાગમવિળમ્બનમ્ ।
યામિનીહૃદયં વ્યગ્રં તિતિક્ષારહિતં યથા ॥ ૧॥

પર્ણરાજિર્નિશ્ચલાસ્તિ કુત્રાગચ્છત્ સમીરણઃ ।
પ્રદીપાશ્ચાન્તરાળેષુ નિમિષન્તિ મુહુર્મુહુઃ ॥ ૨॥

અન્તઃપુરં ચ નિદ્રાલુ પ્રશાન્તં સુખસાન્દ્રિતમ્ ।
તથાપિ કવિરેકાકી નિદ્રાહીનો નિષીદતિ ॥ ૩॥

અજ્ઞાત્વા ભૂતલેનાપિ પાદં વિન્યસ્ય કશ્ચન ।
આગત્ય કવિમેવં તત્કર્ણે મન્ત્રયતે કિમુ ॥ ૪॥

ઉત્તિષ્ઠાગચ્છ ગચ્છાવો મામેવાનુવ્રજ ક્ષણમ્ ।
સુજ્ઞાતઃ પલ્લવસ્યેહ માર્ગઃ સર્વોઽપિ દુર્ગમઃ ॥ ૫॥

અન્તઃપુરેઽલ્પવિવૃતં ગવાક્ષં ચ તદન્તિકે ।

કવિં દ્રષ્ટું તરળિતં નેત્રં વિન્યસ્ય સાઽઽધુના ॥ ૬॥

પ્રતિપાલયતીત્યુક્તેઃ પૂર્વમેવ સમુત્થિતઃ ।
અવિશ્વાસપ્રતીત્યેવ કવિસ્તત્રૈવ તિષ્ઠતિ ॥ ૭॥

વર્ધિતૈર્હૃદયસ્પન્દૈર્દીર્ઘૈર્નિઃશ્વસિતૈરપિ ।
મન્દં મન્દં સ ચલતિ પલ્લવેન સમં કવિઃ ॥ ૮॥

તિષ્ઠત્સ્વપદ્રજવરવૃન્દવન્નિશ્ચલાભયા ।
વૃક્ષપઙ્ક્ત્યા વિચિત્રાભિર્વિશાલાઙ્ગણવીથિભિઃ ॥ ૯॥

આલેખિતાનેકવર્ણચ્છાયાચિત્રમનોહરૈઃ ।
લતાકુટીરૈર્યુક્તાભિરન્તરઙ્ગણવીથિભિઃ ॥ ૧૦॥

સઞ્ચરન્તૌ નોદિતાયાં ચન્દ્રિકાયાં પુરોભુવિ ।
અન્તરિક્ષપ્રભાદૃષ્ટમાર્ગેણેહ કથઞ્ચન ॥ ૧૧॥

શિલાશૃઙ્ખલિકાદીર્ઘરાજગેહસમુચ્ચયે ।
ગેહસ્યૈકસ્ય પૃષ્ઠાન્તે તસ્થતુસ્તાવુભાવપિ ॥ ૧૨॥ કલાપકમ્
તત્ર ભિત્તિષુ સર્વત્ર વ્યાપ્તપુષ્પિતવલ્લિકા ।
તયોર્નિગૂઢસ્થિત્યર્થં છાયાગૃહમભૂત્ કિમુ ॥ ૧૩॥

કુટજાનાં પુષ્પિતાનાં સુગન્ધેનાખિલં નભઃ ।
સુવાસિતં ચ ચિત્તે તુ સપ્તસિન્ધૂચ્ચલદ્ધ્વનિઃ ॥ ૧૪॥

સોત્કણ્ઠિતં કવિસ્તસ્થૌ સાન્દ્રચ્છાયે સ પલ્લવઃ ।
નિરીક્ષતે ક્વ વા દૃશ્યમીષદ્વિવૃતજાલકમ્ ॥ ૧૫॥

તનુક્ષૌમેનાવૃતં તત્ પુરતો દૃશ્યતે કિમુ ।
પ્રતિપાલયિતા પશ્ચાત્ કવિદૃષ્ટિપ્રલોભિની ॥ ૧૬॥

ગવાક્ષસુષિરેણાથ કઞ્ચિદ્ ગુપ્તં દિદૃક્ષુણી ।
દૃશ્યેતે તારકાદીપ્તમનોહરવિલોચને ॥ ૧૭॥

છાયારૂપં પલ્લવસ્ય પ્રત્યભિજ્ઞાય સા દ્રુતમ્ ।
પપ્રચ્છોદ્વેગસહિતા -સોઽયં -મૌનમથાચરત્ ॥ ૧૮॥

આહ્વયેઽત્રૈવાસ્તિ પશ્ચાદિત્યસ્મિન્નુક્તવત્યહો ।
ધૂમાયિતનિશાલોકે ચાન્વિયેષાક્ષિયુગ્મકમ્ ॥ ૧૯॥

પુનઃસમાગમારમ્યસન્મુહૂર્તપરમ્પરા ।

વર્ણિતા યેન સોઽધીરો જાયતેઽસ્મિન્ મુહૂર્તકે ॥ ૨૦॥

પુરા વટદ્રુચ્છાયાયાં કિઞ્ચિત્ સ્વસ્મિન્ લિખત્યહો ।
આરાદુપેત્ય તસ્થૌ યા પ્રિયકૌતુકસન્નિભા ॥ ૨૧॥

નીવારસ્તમ્બકાકીર્ણકેદારક્ષેત્રસીમસુ ।
નદીતીરેઽપિ શારીવ ભ્રમતિ સ્મ તદા ચ યા ॥ ૨૨॥

નષ્ટીભૂતપિતૃસ્નેહવાત્સલ્યમધુકઙ્ગુકા ।
સન્ત્યજ્ય યા પ્રિયં સર્વં ગ્રામાદિહ સમાગતા ॥ ૨૩॥

સાસ્મિન્નન્તઃપુરોદારરમ્યકાઞ્ચનપઞ્જરે ।
અન્યૈવ તિષ્ઠતીદાનીં - મિથોદર્શનમીદૃશમ્ ॥ ૨૪॥ કલાપકમ્
કવૌ તસ્ય ગવાક્ષસ્ય છાયામાશ્રિત્ય તિષ્ઠતિ ।
સ્ફુટિતં કિં ચન્દ્રિકાયાઃ પ્રથમં માલતીસુમમ્ ॥ ૨૫॥

સ્તબ્ધનિઃશ્વાસવેગા સા બદ્ધાઞ્જલિરવસ્થિતા ।
અશ્રુપૂર્ણં તન્નયનમુન્મિષત્યેવ સસ્પૃહમ્ ॥ ૨૬॥

તતો મન્દં પતત્રીહારાર્દ્રપત્રનિભં વચઃ ।
ગળિતં- વિસ્મૃતૈવાહં ભવતેતિ વ્યચિન્તયમ્ ॥ ૨૭॥

વિસ્મર્તું નૈવ શક્નોમિ ત્વામિત્યસ્મત્સુદુર્ગતિઃ ।
ઇત્યુવાચ કવિશ્ચિત્તનિર્ગતં શ્વસિતં યથા ॥ ૨૮॥

દીપ્તયોર્નેત્રયોસ્તસ્યાઃ પશ્યન્ તિષ્ઠત્યસૌ કવિઃ ।
તત્ર તસ્થાવિયં કિઞ્ચિદવિશ્વાસ્યાદ્ભુતં યથા ॥ ૨૯॥

નિજમાનસસન્તાનભૂતા માળવકન્યકા ।
રઙ્ગસ્થા દીપિકા સાક્ષાન્નૈવ ચ્છાયા ન સંશયઃ ॥ ૩૦॥

પુરા વરાકી યા ગ્રામકન્યકા નૈવ સાઽઽધુના ।
યથાશાસ્ત્રં સમભ્યસ્તનૃત્તગીતેયમઙ્ગના ॥ ૩૧॥

ઇતિવક્તવ્યતામૂઢો નૈવ કિઞ્ચિદુવાચ સઃ ।
તતઃ સા કન્યકાતીવ વિષણ્ણા પરિપૃચ્છતિ ॥ ૩૨॥

અથ કિં જનકો દૃષ્ટઃ - ન ચોત્તરમયં દદૌ ।
પિતુરન્ત્યં ચિન્તયિત્વા નમ્રૈવાશ્રુ મુમોચ સા ॥ ૩૩॥

એકતારાં સમાશ્લિષ્ય વક્ષસિ શ્રુતિનિર્મલમ્ ।

દુરન્તપ્રેમચરિતં ગાયન્તં તં વયોઽધિકમ્ ॥ ૩૪॥

એકપુત્રીવિયોગોત્થસન્તાપેનાસ્થિમાત્રકમ્ ।
અપશ્યદન્તે યત્ સ્મૃત્વા તેન નિઃશ્વસિતં તદા ॥ ૩૫॥ યુગ્મકમ્
અશક્તઃ સાન્ત્વનાયાસૌ કવિસ્તત્રૈવ તિષ્ઠતિ ।
ભાષાયા નિસ્સહાયત્વમાદ્યં જાનન્નિવ ક્ષણમ્ ॥ ૩૬॥

અત્રૈવ સ્યાત્ કિમુ ભવાન્ યદ્યેવં તુ કદાચન ।
દ્રષ્ટું લભ્યેત સન્દર્ભશ્ચેતિ મૌનં બભઞ્જ સા ॥ ૩૭॥

ત્વદ્દર્શનાભિલાષેણૈવોજ્જયિન્યા નિમન્ત્રણમ્ ।
મયા સ્વીકૃતમદ્યૈતત્ સુકૃતં મે - વચઃ કવેઃ ॥ ૩૮॥

સુકૃતં તન્મમેત્યુક્ત્વા સહસા પુનરાહ સા ।
યત્ત્વયા લિખિતં તસ્ય શ્રવણેઽર્થાવબોધનમ્ ॥ ૩૯॥

નાસીન્મે કિન્તુ કુતુકાત્ તત્ર તસ્થૌ પુનર્મયા ।
તદર્થબોધે હૃદયમર્પિતં ત્વયિ સાદરમ્ ॥ ૪૦॥

દર્શં દર્શં ત્વન્મુખં તત્ કાવ્યં શ્રોતુમતઃપરમ્ ।
ન સ્યાત્ સૌભાગ્યમિત્યેવ મત્વા ચાહમરીરુદમ્ ॥ ૪૧॥

એકદા યત્ ત્વમાગચ્છસ્તન્મે સુકૃતમેવ કિમ્ ।
શબ્દં તવ શ ૃણોમિ સ્મ ગુપ્તાહં પુનરપ્યમુમ્ ॥ ૪૨॥

ભાવત્કભાવનાસૃષ્ટકન્યકાત્વેન સાંપ્રતમ્ ।
રઙ્ગેઽતિષ્ઠં તદા યત્તદપિ મે સુકૃતં ન કિમ્ ॥ ૪૩॥

એકશ્વાસેનૈવમુક્ત્વા સ્વસ્તિકેન નિજોરસિ ।
સ્થિતા સા પઞ્જરગતા શારિકેવ મનોહરી ॥ ૪૪॥

તદીયં વચનં સ્નેહસાન્દ્રં કર્તુમજાયત ।
યોઽસૌ તપતિ નૈજસ્નિગ્ધાત્મનઃ પુરતઃ સ્વયમ્ ॥ ૪૫॥

દર્શને પુનરપ્યાશા દર્શનાયેતિ કન્યકા ।
કિયન્તં કાલમેતન્મે દર્શનં - પ્રત્યુવાચ સઃ ॥ ૪૬॥

નષ્ટસ્નેહપ્રદીપૈકવર્તિકાદીપ્તિવત્ તદા ।
આગતા ચન્દ્રિકા ત્યક્તનિદ્રા રત્રિરિવોજ્જ્વલા ॥ ૪૭॥

આચ્છાદ્યતાં ગવાક્ષોઽત્ર જ્યોત્સ્ના સર્વત્ર સંસૃતા ।

કેવલં પલ્લવોઽયં નૌ સહાયઃ - સાધયામ્યહમ્ ॥ ૪૮॥

અસહ્યો વિરહઃ કિન્તુ વિરહસ્ય મુહૂર્તકે ।
પુનર્દર્શનસૌભાગ્યં મનસા પ્રાર્થયત્ કવિઃ ॥ ૪૯॥

છાયાનુગામિનં યત્તં કવિમેવાનુવર્તતે ।
તદાર્દ્રનેત્રં ગણ્ડેઽસ્યા મુક્તાબિન્દૂનધારયત્ ॥ ૫૦॥

ચારચક્ષુરગમ્યેન માર્ગેણ વિચરન્ કવિઃ ।
ઉવાચ પલ્લવં તેઽહં કૃતજ્ઞોઽસ્મ્યેવ સર્વદા ॥ ૫૧॥

કતિ સાહસકર્માણિ કૃતાનિ સુહૃદા ત્વયા ।
નિસ્સારં તદિતિ- સ્નેહપારસ્પર્યં મનોહરમ્ ॥ ૫૨॥

પલ્લવે ગચ્છતિ કવિરેકઃ શય્યાગૃહં ગતઃ ।
કથમાયાતિ વા નિદ્રા ચિન્તામગ્ને તુ માનસે ॥ ૫૩॥

II

પુનશ્ચ કૃષ્ણપક્ષાસ્તે બહુવારં સમાગતાઃ ।
શ્યામયામેષુ ભૂયોઽપિ બભૂવુસ્તત્સમાગમાઃ ॥ ૫૪॥

સાન્ત્વનાતીતદુઃખસ્ય મૂર્તિમદ્ભાવસમ્મિતા ।
તિષ્ઠતીયં સમાગત્ય મન્દં વાતાયનાન્તિકમ્ ॥ ૫૫॥

રક્ષ મામિતિ તન્નેત્રે પ્રાર્થના કિમુ વિદ્યતે ।
કા રક્ષેતિ ન જાનાનઃ કવિસ્તિષ્ઠતિ દુઃખિતઃ ॥ ૫૬॥

યદાસ્યા નૃત્તગીતેષુ યથાવિધ્યનુશીલનમ્ ।
પૂર્તીકરોતિ ભૂપસ્તદ્દિનમેવ પ્રતીક્ષતે ॥ ૫૭॥

તદનન્તરમસ્યાન્તઃપુરરમ્યવધૂગણે ।
લપ્સ્યતે સાપિ પદવીમિત્યેષા તુ જનશ્રુતિઃ ॥ ૫૮॥

નૃપસ્ય પ્રીતિપાત્રં ત્વમિત્યાચાર્યોઽન્તરાન્તરા ।
તં બ્રવીત્યભિનન્દોક્તિસ્વરેણ પ્રીતિપૂર્વકમ્ ॥ ૫૯॥

સાક્ષાદ્ દદર્શૈવ તસ્યા નૃત્તં વિક્રમભૂમિપઃ ।
હૃદ્યં છલિતનૃત્તં તદભિનન્દિતવાંશ્ચ સઃ ॥ ૬૦॥

કથાઃ સર્વાશ્ચ શુશ્રાવ કવિસ્તસ્યા મુખાત્ પરમ્ ।
હૃદયં દર્શયન્તીવ સર્વમેવાબ્રવીદસૌ ॥ ૬૧॥

વિદ્વત્સભાસુ સર્વત્ર જયશીલા ગિરસ્તદા ।
અન્તર્લીના ઇવાભાન્તિ કવેર્મૂકં તુ તિષ્ઠતઃ ॥ ૬૨॥

દર્શનેઽસ્યા વિષાદોઽસ્તિ દિદૃક્ષૈવ તતઃ પરમ્ ।
તદન્તરે સમ્ભવેયુઃ સ્વલ્પમાત્રસુખાનિ ચ ॥ ૬૩॥

કદાચિત્ કવિરાહ હ્યઃ સ્વપ્ને ત્વાં દૃષ્ટવાનહમ્ ।
કણ્વપુત્રીવેષભૂષાધારિણીં સુમનોહરીમ્ ॥ ૬૪॥

સ્વપ્નો યથાર્થતામાપ હ્યનન્તરમહામહે ।
શાકુન્તળપ્રયોગોઽભૂદ્ રાજાજ્ઞાનુસૃતં તદા ॥ ૬૫॥

મૃગૈશ્ચ સાકં સંવર્ધમાનાં તાપસનન્દિનીમ્ ।
તસ્યામાત્તપુનર્જન્માં દૃષ્ટ્વાશ્રૂણિ મમાર્જ સઃ ॥ ૬૬॥

વિટે મધુકરે તસ્યાઃ સમાગમ્ય મુખામ્બુજમ્ ।
સ્પૃષ્ટ્વાઽસ્પૃષ્ટ્વા ચ સંભ્રમ્ય ધિક્કૃતિં પરિકુર્વતિ ॥ ૬૭॥

દુષ્યન્તમેવાક્રન્દ ત્વદ્રક્ષણે કેવલે ત્વિમે ।
એવં સખ્યોર્હસત્યોઃ સ કવિર્નમ્રમુખો બભૌ ॥ ૬૮॥

વિટાદ્ રક્ષિતુમાક્રન્દેન્નૃપમેવ સુરક્ષકમ્ ।
નૃપોઽપિ વિટ એવાત્ર - જહાસ કવિરન્તરા ॥ ૬૯॥

તુષારબિન્દુવચ્છુભ્રલાવણ્યદ્યુતિવત્ તથા ।
સમાયાન્તીં મુનિસુતાં સ્વાન્તિકં સુકુમારિકામ્ ॥ ૭૦॥

દૃષ્ટ્વાશ્રુપૂર્ણનયનઃ પીતચિન્તામધુદ્રવઃ ।
નિષીદતિ સ્મ ભૂપાલઃ સદસ્યગ્રાસને રસાત્ ॥ ૭૧॥ યુગ્મકમ્
સ્વકીયમબલાજન્મૈવાસ્ય દુઃખસ્ય કારણમ્ ।
નિન્દાવમાનયોશ્ચેતિ ક્રન્દત્યેષા કુમારિકા ॥ ૭૨॥

ગૃહ્ણીષ્વ માતર્મામેવં ભૂમિદેવીં પ્રતિ દ્રુતમ્ ।
હસ્તં પ્રસાર્યાશ્રુપૂર્ણનેત્રા ચોચ્ચૈઃ પ્રરોદિતિ ॥ ૭૩॥

તદામંસ્ત કવિઃ કણ્વપુત્રી ચાત્રૈવ તિષ્ઠતિ ।
ઇમાં ન કાપિ સ્વીકર્તુમપ્સરા હ્યાગમિષ્યતિ ॥ ૭૪॥

નાટકેઽવસિતે રાજા સાક્ષીકૃત્ય સભાસદઃ ।

કાળિદાસમલઙ્ચક્રે સ્વર્ણશૃઙ્ખલયા કરે ॥ ૭૫॥

હસ્તનિર્ઘોષમુખરં નાટ્યગેહમભૂત્ તદા ।
અથ ક્રમાત્ સદસ્યેષુ ગતેષ્વસ્તમિતો રવઃ ॥ ૭૬॥

રાજસન્નિધિમાનીતા નાટ્યાચાર્યૈર્યથાક્રમમ્ ।
અભિનેતૃવરા યેઽવતસ્થુઃ સાઞ્જલયસ્ત્વિહ ॥ ૭૭॥

ધૃતકણ્વસુતાવેષામભિનેત્રીં નૃપાલકે ।
અભિનન્દતિ સસ્નેહં તસ્થૌ નિસ્સઙ્ગમેવ સા ॥ ૭૮॥

ભયં કિં વા પરિભ્રાન્તિરિતિ જ્ઞાતુમશક્નુષી ।
સાદરં સાઞ્જલિકરા સાલભઞ્જીવ સા સ્થિતા ॥ ૭૯॥

કટાક્ષવીક્ષણેનાપિ તન્મુખં ન દદર્શ સા ।
પતગઃ પતિતઃ કિં વા નૃપાન્તર્નયને તદા ॥ ૮૦॥

નિરીક્ષ્ય સર્વમુત્તસ્થૌ ન નિરીક્ષ્યેવ શીઘ્રતઃ ।
નિદ્રાગારમવાપ્તું સ નિશ્ચક્રામ ચ ભૂમિપઃ ॥ ૮૧॥

III

જ્યોત્સ્નાકણવિહીનાયાં નિશાયામપિ ગચ્છતિ ।
અશાન્તોઽપિ કવિસ્તેન પથા શીલવશાત્ સ્વયમ્ ॥ ૮૨॥

અદૃશ્યરાત્રિકુસુમતમનિઃશ્વાસસૌરભમ્ ।
અન્ધકારેઽપિ સાન્નિધ્યં પ્રસારયતિ સર્વતઃ ॥ ૮૩॥

પ્રકાશનેચ્છુરપ્યન્ધતામિસ્રે સ્થિતયે વિધિઃ ।
અત્રાસ્મ્યહમિતિ પ્રાહેવાર્દ્રગન્ધપ્રસારણાત્ ॥ ૮૪॥

કશ્ચિત્ પ્રતીક્ષ્યાન્ધકારે તિષ્ઠદક્ષીવ વર્તતે ।
ગવાક્ષો વિવૃતો યસ્ય મૂકશાન્તે પુરોભુવિ ॥ ૮૫॥

કવિસ્તિષ્ઠતિ તદ્દીર્ઘનિઃશ્વાસોષ્મળમારુતે ।
કિઞ્ચિચ્ચઞ્ચલિતં કિં વા વિલોલં જાલકાંશુકમ્ ॥ ૮૬॥ યુગ્મકમ્
અપ્રખ્યાપિતમપ્યસ્યાગમનં પ્રતિપાલ્ય સા ।
નિર્વાપિતપ્રદીપા તદાહ્વાનોત્કા સ્થિતા નુ કિમ્ ॥ ૮૭॥

ન વિશેષઃ કશ્ચિદત્રાગન્તુમૈચ્છમ્- ઉવાચ સઃ ।
નૂનમાયાસ્યસીત્યેવ ભાતિ મે સ્મેતિ સા દ્રુતમ્ ॥ ૮૮॥

પૂર્ણમૌનેષુ નિઃશ્વાસૈર્વ્રણિતેષુ કથઞ્ચન ।
સહસાસ્યાઃ કણ્ઠનાળાદ્ વચોધારા પ્રસારિતા ॥ ૮૯॥

અસૂયાલુભટૌઘેન પરીતો વર્તતે ભવાન્ ।
ગૂઢતન્ત્રૈર્વિજેતું ત્વાં યો મુહૂર્તં પ્રતીક્ષતે ॥ ૯૦॥

સન્તિ કાપટ્યગર્તાનિ ભવન્માર્ગેષુ સર્વતઃ ।
યદિ કાચિદ્ વિપત્ સ્યાત્ તામશક્તા સ્મર્તુમપ્યહમ્ ॥ ૯૧॥

ન હિ શક્નોષિ માં ત્રાતું મમ જન્મેદૃશં કિલ ।
હવિરસ્મિ મદર્થં મા જુહોત્વિહ ભવાન્ સ્વયમ્ ॥ ૯૨॥

ગચ્છ ત્વં યત્રકુત્રાપિ ન ચિરાન્મા વિશઙ્કયા ।
ત્વત્પાદરેણુસ્પર્શાર્થી દેશઃ કો વા ન વિદ્યતે ॥ ૯૩॥

ભવતો હૃદયસ્યાસ્ય મહાસામ્રાજ્યસીમ્નિ મે ।
સ્નેહસિંહાસનં દત્તમેકમિત્યસ્તિ ધન્યતા ॥ ૯૪॥

ઇતઃપરં કામ્યમસ્ય વનપુષ્પસ્ય કિં પ્રભો ।
અગ્નિદગ્ધમિમં ગેહં ત્યક્ત્વા યાતુ ભવાન્ દ્રુતમ્ ॥ ૯૫॥

ઘનવર્ષવદુચ્ચૈઃ સા પ્રરુરોદ તતઃ કરમ્ ।
પ્રસાર્ય જાલરન્ધ્રેણ તસ્થૌ સા ભાવનિર્ભરા ॥ ૯૬॥

સ્પૃષ્ટ્વાસૌ મૃદુલં હસ્તમસ્યા મન્દં પરામૃશત્ ।
કવેસ્તદઙ્ગુલીસ્પર્શઃ સુધાવર્ષોઽભવત્ તદા ॥ ૯૭॥

ન ભવિષ્યતિ કિઞ્ચિન્મે કસ્માત્ તેઽશુભચિન્તિતમ્ ।
કિઞ્ચિન્નિઃશ્વસ્યાબ્રવીત્ સઃ- ત્વાં હિત્વા કુત્ર યામ્યહમ્ ॥ ૯૮॥

વિન્યસ્યોપરિ તત્પાણિપલ્લવં નિટિલે તથા ।
મુખેઽપિ નિખિલે તસ્થૌ ચિત્સુખામૃતપો યથા ॥ ૯૯॥

સમીપે ન વિદૂરે ન - પાદન્યાસરવઃ કિમુ ।
અન્ધકારો વૈરિણોઽપિ બન્ધુઃ સ્યાદિત્યમન્યત ॥ ૧૦૦॥

સ્તબ્ધં મનસ્તથાપ્યન્તર્નયચ્છન્નિજસંભ્રમમ્ ।
વાતાયનં પિધેહીત્થમુક્ત્વામન્ત્ર્ય જગામ સઃ ॥ ૧૦૧॥

પુનર્દર્શનસૌભાગ્યં નાશશંસોપચારતઃ ।
પાદચારેણ સઙ્કેતં પ્રાપ શીઘ્રમસૌ કવિઃ ॥ ૧૦૨॥

ઉત્કણ્ઠયા તદા યત્ર દ્વારિ તિષ્ઠતિ પલ્લવઃ ।
ભયં ભવતિ તદ્દૃષ્ટૌ કોઽપૂર્વોઽયં પરિભ્રમઃ ॥ ૧૦૩॥

---

## દશમઃ સર્ગઃ

### રત્નપરીક્ષા

શ્યામયામૈરત્ર સૂક્ષ્મચારનેત્રાણિ તાન્યપિ ।
તયોઃ સમાગમાનાં સમભવન્ ગૂઢસાક્ષિણઃ ॥ ૧॥

મરુત્તરઙ્ગિતે પત્રવ્રાતે મર્મરસન્નિભમ્ ।
કર્ણાકર્ણિકયા સા ચ વાર્તા પ્રચલિતા દ્રુતમ્ ॥ ૨॥

સચિવેષ્વન્તતો ગત્વા સત્યં તન્મન્ત્રયત્યહો ।
અશક્નુવન્ વિશ્વસિતું તસ્થૌ તત્રૈવ ભૂમિપઃ ॥ ૩॥

યસ્ય સત્કીર્તિચન્દ્રસ્ય શીતરશ્મિશતૈરભૂત્ ।
ધવળોજ્જ્વલવર્ણાભા સ્વકીયોજ્જયિનીપુરી ॥ ૪॥

તસ્ય કાવ્યકૃતસ્તન્વી સા કિં પ્રણયભાજનમ્ ।
તથાપિ વિક્રમાર્કસ્ય સા કથં વિસ્મૃતા ભવેત્ ॥ ૫॥ યુગ્મકમ્
સ્વમનોહારિણી કન્યા પક્ષે તિષ્ઠતિ સાંપ્રતમ્ ।
પ્રતિપક્ષે તુ ધન્યોઽસૌ કવિમિત્રં ચ તિષ્ઠતિ ॥ ૬॥

અનયોસ્તુ પરિત્યક્તુમેકં શક્નોમિ હા કથમ્ ।
ઇતિ ધર્મવ્યથામગ્નો મધ્યે તિષ્ઠતિ ભૂપતિઃ ॥ ૭॥

કેવલં ગ્રામકન્યા સા તથાપિ સુરમાર્ગતઃ ।
અપ્સરા ઇવ ચાન્દોળાદસ્મિન્ રાજાઙ્ગણે યદા ॥ ૮॥

અવતીર્ણા તદારભ્ય તસ્યાં સક્તં મનો મમ ।
નિરક્ષરા સાધ્ય પુનર્નાટ્યસઙ્ગીતકોવિદા ॥ ૯॥ યુગ્મકમ્
તાદૃશીં તાં વધૂકર્તું પ્રત્યુદ્ગન્તું યથાવિધિ ।
શુભાવહાં તિથિં રાજા મુહૂર્તં ચ પ્રતીક્ષતે ॥ ૧૦॥

કથામિમાં રાજધાન્યાં કો ન જાનાતિ પૂર્ણતઃ ।
અજ્ઞાત્વા હિ કવેશ્ચિત્તં તત્સક્તં નૃપમાનસમ્ ॥ ૧૧॥

અત્યુદારમના ભૂત્વા યમસૌ સમભાવયત્ ।

સ એવ કવિરત્રૈવમવજાનાતિ ભૂમિપમ્ ॥ ૧૨॥

ઇદં તુ સર્વં જાનન્નેવૈકાન્તે ચ તયા સહ ।
સમાગમાય ધિક્કારં કુર્વન્ યોઽસૌ સુહૃત્ કથમ્ ॥ ૧૩॥

રત્નં સા સ કવીન્દ્રોઽપિ રત્નં વર્ધિતમૂલ્યકમ્ ।
અતસ્તં મા ત્યજેત્યેતદુપદેશોક્તિસાન્ત્વનમ્ ॥ ૧૪॥

વિક્રમાર્કસ્ય કર્ણે તુ કુર્વન્તિ સચિવાઃ સદા ।
સામદાનાદ્યતિક્રમ્ય દણ્ડઃ કિં નુ વિચાર્યતે ॥ ૧૫॥ યુગ્મકમ્
સચિવૈસ્તન્ત્રનિપુણૈર્મનઃસન્તુલનાન્વિતૈઃ ।
મન્ત્રયન્મોચનોપાયં પશ્યત્યવનિપાલકઃ ॥ ૧૬॥

ન કિઞ્ચિદપિ જાનામીત્યેવંભાવનયા નૃપઃ ।
આસનસ્થોઽભવદ્ યસ્ય પુરતો નીયતે કવિઃ ॥ ૧૭॥

વિશ્વાસશીતળજ્યોત્સ્નાં હૃદયે સમ્પ્રસારયન્ ।
કુશલં પૃચ્છતિ કવિં રાજા સ્મેરમુખામ્બુજઃ ॥ ૧૮॥

શ્રોતું વાર્તામતિક્રૂરાં સ્વીકર્તું દણ્ડનં તથા ।
પીડનં ચાનુભોક્તું નિસ્સઙ્ગભાવેન ચેતસા ॥ ૧૯॥

સન્નદ્ધઃ કાવ્યકારોઽત્ર નિષણ્ણો રાજસન્નિધૌ ।
સન્ને યસ્ય મુખે નાસીત્ કિન્તુ મન્દસ્મિતોદયઃ ॥ ૨૦॥

અકાલસમ્ભવત્કાલમેઘવર્ષો યથા તથા ।
અભિનન્દનવાગ્ધારાં વર્ષત્યસ્મિન્ કવૌ નૃપઃ ॥ ૨૧॥

છત્રસ્યાધશ્ચામરસ્ય વાતો મે વાતિ પાર્શ્વતઃ ।
તથાપિ મિત્ર તે સ્નેહશૈત્યમેવાભિકામયે ॥ ૨૨॥

કવેઃ સ્વચ્છન્દવાસોઽત્રૈવેતિ મે પુળકપ્રદમ્ ।
તુષ્ટ્યા તૃપ્ત્યા કિન્તુ સર્ગાસ્વાસ્થ્યેનેહ સમાવસ ॥ ૨૩॥

પુનરાહ નૃપઃ શ્રીમન્નગાયત પુરા ભવાન્ ।
અહૈતુકીં પ્રાણવતામવ્યક્તમધુરાં વ્યથામ્ ॥ ૨૪॥

આત્માનુભૂતં સત્યં તત્ કિં તે તસ્માદ્ વિમુક્તયે ।
પ્રયતેઽહં કિં કરોમિ તદર્થં સદયં વદ ॥ ૨૫॥

વિમૂકં પુનરપ્યત્રોપવિષ્ટં કવિકુઞ્જરમ્ ।

નિમિમીતે નિર્નિમેષં રાજાથોવાચ સુસ્મિતમ્ ॥ ૨૬॥

ભવતોઽયં પુરીવાસો ભવતૂલ્લાસવાન્ સદા ।
રમ્યવસ્તૂનિ નાન્વિષ્યસ્યેતૈસ્ત્વન્વિષ્યસે પરમ્ ॥ ૨૭॥

ઉપહારાન્તરં વીરશૃઙ્ખલાધિકમોહનમ્ ।
સમર્પયે કરે ચાસ્મિન્નચિરેણ મહાકવે ॥ ૨૮॥

એતેષાં શ્રૂયમાણાનામજ્ઞાત્વાર્થમસૌ કવિઃ ।
કિમુ વક્તવ્યમિત્યેતદપિ નો વેત્તિ કિઞ્ચન ॥ ૨૯॥

સામગાનસમં રાજભાષણં તન્નિશમ્ય સઃ ।
આદરેણ સમામન્ત્ર્ય જગામ વસતિં કવિઃ ॥ ૩૦॥

ઉપહારાન્તરં વીરશૃઙ્ખલાધિકમૂલ્યકમ્ ।
કિં સ્યાત્ પરીણામગુપ્તકથેવ પ્રતિભાતિ તત્ ॥ ૩૧॥

તદુત્તરં પ્રતીક્ષ્યાસ્મિન્ કવૌ તત્ર નિષીદતિ ।
વિલીયતેઽન્ધકારે તત્કક્ષ્યાગતદિનપ્રભા ॥ ૩૨॥

કવાટસ્યાર્ધપિહિતસ્યોદ્ઘાટનરવસ્તદા ।
શ્રૂયતે પાદનિઃસ્વાનં કઙ્કણક્વણિતં તથા ॥ ૩૩॥

નાપૃચ્છત્ કેયમિત્યેષ મણિનૂપુરશિઞ્જિતમ્ ।
સ્ફુટં વદતિ નૈવેયં સ્વકીયપરિચારિકા ॥ ૩૪॥

અથેયમસ્તિ વા કન્યા રમ્યા સા પ્રિયમાનસા ।
નૈવેયં સેત્યાહ સર્વવ્યાપીદં મદસૌરભમ્ ॥ ૩૫॥

કસ્યા વસ્ત્રાઞ્ચલસ્યાયં શબ્દો વિલુળિતસ્ય વા ।
કસ્યા વા તરળોલ્લોલવલયોદિતશિઞ્જિતમ્ ॥ ૩૬॥

કસ્યા વા વિકિરન્ત્યત્ર નિઃશ્વાસાર્દ્રદલાન્યહો ।
પસ્પર્શ કા કવેરસ્ય મનઃસૂનરજઃસ્વપિ ॥ ૩૭॥

કવિઃ ક્રમેણ તાં નીચામુદ્દીપયતિ વર્તિકામ્ ।
પુરતો દૃશ્યમાનેયં કા પુનર્મેનકા કિમુ ॥ ૩૮॥

અગ્નિપઞ્ચકમધ્યસ્થામદ્રિકન્યાં તપસ્વિનીમ્ ।
અચઞ્ચલાઞ્ચન્તરવદસ્માન્ યોઽદર્શયત્ પુરા ॥ ૩૯॥

કલ્પદ્રુપતિતોત્ફુલ્લપુષ્પાયાપ્સરસે પુરા ।
વાઙ્મયેન પુનર્જન્મ દદૌ યોઽતીવ સુન્દરમ્ ॥ ૪૦॥

અન્યસ્યામપ્સરઃપુત્ર્યાં પૃથિવ્યાઃ પરિશુદ્ધતામ્
લાવણ્યં ચ સમન્વીય પ્રાદર્શયદિહૈવ યઃ ॥ ૪૧॥

સ કવિશ્ચિન્તયામાસ સાક્ષાદેવાપ્સરાસ્ત્વિયમ્ ।
કસ્યાજ્ઞયેયમાગચ્છદત્ર કિં વાસ્ય કારણમ્ ॥ ૪૨॥ કલાપકમ્
નૈવાત્ર વિક્રમો નૈવ વિશ્વામિત્રોઽપિ તાપસઃ ।
વર્તતેઽત્ર વરાકોઽયં કવિરેવ હિ કેવલમ્ ॥ ૪૩॥

વશ્યેન સુસ્મિતેનેહ તિષ્ઠતીયં મનોહરી ।
નિસ્ત્રપં સ્વયમેવાસ્મૈ સમર્પયિતુમુદ્યતા ॥ ૪૪॥

રાજોપહારોઽમૂલ્યોઽયમિદાનીમેવ ચાભવત્ ।
સ્પષ્ટા કથાપરીણામગુમ્ફિરાસૂત્રિતા તદા ॥ ૪૫॥

રાજધાન્યાં વિશિષ્ટાનામતિથીનાં મહીભૃતામ્ ।
સત્કારાય સુનૈવેદ્યં વિક્રમાર્કનૃપાહૃતમ્ ॥ ૪૬॥

પ્રાંશુલભ્યં ફલમિયં તિષ્ઠતીહ કરાગ્ચલે ।
કવિં પ્રણમ્ય સા પ્રાહ- દાસીયં તવ ગૃહ્યતામ્ ॥ ૪૭॥ યુગ્મકમ્
સુહૃદ્રાજવરૈસ્તુલ્યં કવિમેનં ચ નિર્ધનમ્ ।
સાક્ષાત્ સ વિક્રમાદિત્યઃ સત્કરોતીહ સાદરમ્ ॥ ૪૮॥

અતઃપરં ચારિતાર્થ્યપ્રદમન્યત્ કિમસ્તિ હા ।
અભિનન્દનસમ્માનમપ્યન્યત્ કિમુ વિદ્યતે ॥ ૪૯॥

ઇત્થં સન્તોષધવળજ્યોત્સ્ના નોદેતિ તન્મુખે ।
તત્ર પ્રત્યુત રોષોઽભિમાનજઃ સમુદેતિ કિમ્ ॥ ૫૦॥

અન્તઃક્ષોભં તુ સંયમ્ય કવિરાસ્તે વિમૂકવત્ ।
ચિન્તાબ્ધિવીચીઃ શમયન્નાત્મશક્તિં ચ વર્ધયન્ ॥ ૫૧॥

સુતાર્યક્ષૌમવાસોઽસ્યાઃ સ્રસ્તં ભવતિ ચ સ્વયમ્ ।
સ્પન્દતે તદુરઃકગ્ચુકાવૃતં કોરકદ્વયમ્ ॥ ૫૨॥

દ્રવિતું સ્વયમેવાત્ર સવિતુઃ કિરણોષ્મણિ ।
હિમશીકરનિર્મુક્તવિકસત્સુમસન્નિભમ્ ॥ ૫૩॥

સ્વવિગ્રહં સુનિર્માલ્યં વિધાતું સ્વયમેવ સા ।
નિજસૌવર્ણભૂષાસ્તા વિનિર્મોક્તું સમુદ્યતા ॥ ૫૪॥ યુગ્મકમ્

અથ મેતિ પ્રશાન્તં તન્નિષેધતિ કવિસ્તદા ।
સમેત્યાલસમસ્યોપસ્થિતિમાપ વિલાસિની ॥ ૫૫॥

તટભિત્તટિનીવીચીસમાઘ્રાતવિલોભિની ।
સાહ રાજનિયુક્તાહં ભવત્પ્રિયહિતૈષિણી ॥ ૫૬॥

પાનપાત્રં પૂરયેઽહં કેન દ્રાક્ષારસેન વા ।
દેવપ્રિયેણ કિં બ્રૂહિ સાક્ષાત્ સોમરસેન વા ॥ ૫૭॥

કેન રાગેણાલપામિ મદશક્તિપ્રદેન વા ।
કેન નૃત્તેન માયૂરપિઞ્છિકાં વિતનોમ્યહમ્ ॥ ૫૮॥

અલૌકિકં માદકં કિમૈન્દ્રિયસ્વર્ગગોપુરમ્ ।
પ્રોદ્ઘાટયામ્યહં હર્ષાદ્ ભવદર્થં પ્રભો વદ ॥ ૫૯॥

સારઙ્ગીમધુરે તસ્મિન્ સ્વરરાગસુધાઝરે ।
ક્ષીરે સિતેવ મૃદુલં મનો લીયેત કસ્ય વા ॥ ૬૦॥

ધ્યાનલીનં મહાકાળમુપાસ્તે યત્ સદૈવ તત્ ।
આનન્દલયમગ્નં ન ત્વલીયત મનઃ કવેઃ ॥ ૬૧॥

દૃઢદીપ્તેન નેત્રેણ નિર્વર્ણ્યાહ કવિઃ સ તામ્ ।
સર્વસમ્મોહનં રૂપમેતત્ પ્રત્યઙ્ગસુન્દરમ્ ॥ ૬૨॥

ઉન્માદકં વિશાલેઽસ્મિન્ પ્રપઞ્ચહૃદયાન્તરે ।
વશ્યવાઙ્મયરૂપેણાલિખિતં ચાસકૃન્મયા ॥ ૬૩॥

પ્રમાદોઽભૂત્ તવાયં - ન તેષાં યેઽસ્મિન્ નિશામુખે ।
પ્રૈષયન્ પુરતો મે ત્વાં સત્યં મે જાનતે ન તે ॥ ૬૪॥

રુદન્તિ યદિ મે દીનં પ્રત્યેકં પરમાણવઃ ।
પરિત્યજેયુર્માં તેઽપિ સ્નેહાર્દ્રાયાત્મનઃ કૃતે ॥ ૬૫॥

સુવર્ણનિર્મિતો રત્નખચિતશ્ચ કૃપાણકઃ ।
મારકઃ કિં પાતિતશ્ચેત્ સુદૃઢેઽપિ હૃદન્તરે ॥ ૬૬॥

અધિકારોગ્રહસ્તેન ક્ષિપ્રં માં પ્રતિ સમ્પ્રતિ ।
વિદ્યુલ્લતોજ્જ્વલં શસ્ત્રં ત્વમિતિ પ્રતિભાતિ મે ॥ ૬૭॥

એતસ્માદુદ્ભવિષ્યન્તી ક્ષતિર્મે ખલુ દુર્ગતિઃ ।
જીવતો મૃતિરેવાત્મહતિરેવેતિ મન્મતમ્ ॥ ૬૮॥

ક્ષત્રવીર્યાણ્યનેકાનિ નિર્જિતાનિ યયા પુરા ।
નગ્નસૌન્દર્યશક્તિઃ સા નિઃસહાયા નિરાકૃતા ॥ ૬૯॥

તતો દુઃસહદુઃખેન પ્રતિગન્તું સમુદ્યતા ।
તિષ્ઠેતિ કવિનોક્તા સા તસ્થૌ શ્રુત્વેવ તદ્વચઃ ॥ ૭૦॥

કવિરાહાર્દ્રમેનાં- ન ત્વય્યનાદૃતિરસ્તિ મે ।
ત્વામિહ પ્રૈષયન્ યે તે વાચ્યા વિનયપૂર્વકમ્ ॥ ૭૧॥

ત્વયિ સમ્પ્રીતિમાંશ્ચાહં સુતૃપ્તો લીન એવ ચ ।
દૌત્યં તે સફલં સમ્યક્ ત્વયા નિર્વ્યૂઢમિત્યપિ ॥ ૭૨॥

નિવૃત્ય સા નિમેષાર્ધં નિર્વર્ણ્ય ચ કવેર્મુખમ્ ।
શાન્તેન સુદૃઢેનાપિ સ્વરેણૈવમભાષત ॥ ૭૩॥

અસત્યકથનાયેમાં મા નિર્દિશ મહાપ્રભો ।
કુલકર્મણ્યસત્યત્વં નાદ્યાવધિ કૃતં મયા ॥ ૭૪॥

રાજ્ઞો દાસીયમાજ્ઞાનુસારિણી નાભિસારિણી ।
ઇતિ સત્યોદિતા વાચો હૃદયાન્નિર્ગતા ઇવ ॥ ૭૫॥

અથારુદત્ સંવૃતાસ્યા કવિશ્ચાભૂત્ સવિસ્મયઃ ।
નવબોધોદયેનેવ તીક્ષ્ણસત્યોપદર્શનાત્ ॥ ૭૬॥

ક્ષમસ્વ ભદ્રે સદયં યદ્યહં ત્વામખેદયમ્ ।
અથાશક્ત્યા ન કિઞ્ચિત્તામવદત્ કવિકોવિદઃ ॥ ૭૭॥

તસ્યાં ગતાયાં તદ્દાસ્યદૈન્યનિન્દનકર્મણિ ।
પશ્ચાત્તાપેન દગ્ધોઽભૂત્ કવિઃ કારુણ્યવાનસૌ ॥ ૭૮॥

નાસત્યવાદિની સૈષા તેન યત્ સુતિરસ્કૃતા ।
તદપ્યવનિપેન્દ્રઃ શ્વો જ્ઞાસ્યત્યેવ ન સંશયઃ ॥ ૭૯॥

તસ્માદાવિષ્કરિષ્યન્તિ તે રાજપુરુષાદયઃ ।
કથાવિશેષાન્ વિવિધાન્ સામદાનવૃથાત્વતઃ ॥ ૮૦॥

રોષોદયો ભવેચ્ચક્રવર્તિનશ્ચ ભવત્વયમ્ ।
સર્વં કિલાત્ર હા છત્રચામરાજ્ઞાનિયન્ત્રિતમ્ ॥ ૮૧॥

નિદ્રાં ગચ્છેત્ પલ્લવોઽત્ર નિશાપિ બહુશો ગતા ।
પ્રાપ્યસ્થાનં નાસ્તિ નૈવ શ્રોતવ્યઃ કશ્ચનાપિ વા ॥ ૮૨॥

કક્ષ્યાદ્વારં વિધાયાન્તરાળવીથ્યા સુદૂરતઃ ।
વિના લક્ષ્યસ્થલં મન્દમન્દં ગચ્છત્યસૌ કવિઃ ॥ ૮૩॥

નૃત્યદ્વાતોઽપિ નિદ્રાપિ વૃક્ષશાખાસુ કિં શનૈઃ ।
ગાયકઃ કુકરાટઃ કિં ક્ષીણો મૌનં ભજત્યસૌ ॥ ૮૪॥

જગામાન્વિષ્ય પિહિતં ગવાક્ષં કામુકઃ કવિઃ ।
કુત્ર વા કામિની સા સ્યાત્ પ્રતીક્ષાનિર્ભરાશયા ॥ ૮૫॥

અર્ધબોધ ઇવાત્રત્યરાજવીથ્યા સ ગચ્છતિ ।
અજ્ઞાતલક્ષ્યં ભૂયોઽપિ ગચ્છત્યેવ કવિઃ સ્વયમ્ ॥ ૮૬॥

ભવન્તિ નિદ્રાહીનાનિ જ્વલદ્દીપયુતાનિ ચ ।
ગણિકાનાં ગૃહાણ્યત્ર પાર્શ્વયોરુભયોરપિ ॥ ૮૭॥

વીણા ચ તન્વીકણ્ઠશ્ચ સમ્ભૂયૈકં સુગીતકમ્ ।
ગાતું સ્પર્ધાં કરોતીવ કુત્રચિદ્ ભવનાતરે ॥ ૮૮॥

અન્યત્ર કામુકોન્માદો હસત્યુચ્ચૈશ્ચ ગર્જતિ ।
કસ્યાશ્ચિન્નૃત્તસુન્દર્યા નૂપુરાશિઞ્જિતૈઃ સહ ॥ ૮૯॥

પુરો મકરરથ્યા સા બોધહીનેવ વર્તતે ।
કામાગ્નિદગ્ધબલિપુષ્પાણાં ગન્ધેન સન્તતમ્ ॥ ૯૦॥

નેતિ નેતીતિ મનસા મન્ત્ર્યતે વીથિકા તુ યા ।
મૃગ્યતે કવિના સાન્યા- દૂરે કિમનલપ્રભા ॥ ૯૧॥

ચિતા પ્રશાન્તજ્વાલાસૌ ખ્યાતા પિતૃવનાખ્યયા ।
યત્રાન્તે પ્રાપ્યતે સર્વૈરર્ધરાત્રે મયાપ્યહો ॥ ૯૨॥

સક્તોઽસક્તો નૃપો દાસશ્ચૈકતલ્પં ભજન્નિહ ।
શાન્તિં ગચ્છેત્ સામ્યદૃષ્ટિસારસૌન્દર્યસદ્મનિ ॥ ૯૩॥

અત્રૈવ સર્વદુઃખાનિ વિસ્મૃત્યાનન્યચિન્તયા ।
તિષ્ઠત્યુન્મીલિતેનાન્તર્લોચનેન મહાકવિઃ ॥ ૯૪॥

કાળમેઘજટાજૂટાદર્ધચન્દ્રસ્ત્વધસ્તલમ્ ।

નિરીક્ષતે તદા ભૂતિં જ્યોત્સ્નાભસ્મ વિલિમ્પતિ ॥ ૯૫॥

પાવકનેત્રં મીલય સદયં
હે હર વર્ષય ચન્દ્રમરીચીઃ ।
ચિતાસમીપે તસ્થૌ કવિરુ-
ન્નમ્ય કરૌ ચ પ્રર્થયતીવ
મહેશપાવકનેત્રનિમીલન-
તુલ્યં ચિત્યામનલા વિગતાઃ ।
તરવઃ પિતૃવનસીમનિ જાતા-
શ્છાયા જ્યોત્સ્ના તદન્તરાળે ।
શકલીભૂયાકાશસ્યાન્તે
બોધાબોધતલાનિ મિળિત્વા ।
ભઙ્ગ્યાન્યોન્યં લિખિતમપૂર્વલ-
યસ્યાલેખ્યમિવાસ્તિ મનોજ્ઞમ્ ॥ ૯૬॥

કસ્મિન્ પટહે ચોચ્ચૈઃ શ્રુત્યા
કાલં કો વા પરિમાત્યત્ર
આદિવિળમ્બિતતાળમનુક્ષણ-
માહા ચટુલદ્રુતગતિરાસ્તે ।
પવનાલુળિતજટા ઇવ વટતરુ-
શાખાસ્તત્ર વિલુળિતાઃ સન્તિ ।
કૃષ્ણભુજઙ્ગફણોન્નયનેન સ-
મં તદનાતપનટનં લસતિ ।
શિવતેજોમયરૂપં વિકસિત-
મથ હા ગગનાપૂર્ણં દૃષ્ટ્વા ।
કવિરિહ ગાયતિ- મમ હૃદયેન તુ
રસિતોગ્રં કુરુ નટનં ભગવન્ ॥ ૯૭॥

નૃત્તં કુરુ નટનાયક ભવદા-
નન્દશ્રીનટનદ્રુતતાળઃ
કાનનવૃક્ષલતાસ્વથ નીચ-
સ્થિતતૃણકોટિષુ સર્વાસ્વપિ ચ ।
આર્દ્રમનસ્સ્વનુશાસનનિર્દે-
શાજ્ઞાનામવિધેયા યે વા

તેષાં હૃદયેષ્વપિ ચ સિરાસુ ચ
નિત્યસ્પન્દં કુરુ તવ ચરણ-
ધ્વનિરિહ મૃત્યુઞ્જયમન્ત્રધ્વનિઃ ॥ ૯૮॥

અર્ધોક્તૌ વિરરામેદં ગાનમેષ કવિસ્ત્વિહ ।
ભૂમાવુત્તાનતઃ ક્ષીણશરીરો નિપપાત હા ॥ ૯૯

---

એકાદશઃ સર્ગઃ

આમન્ત્રણમુજ્જયિન્યૈ

વિભાતમાયાતિ કવેશ્ચ સમ્યગ્
બાલાતપશ્ચુમ્બતિ ભાલદેશમ્ ।
નિદ્રોત્થિતોऽયં ત્વચિરાદ્ વિજાના-
ત્યાત્માનમેતત્પિતૃકાનનસ્થમ્ ॥ ૧॥

સુપુષ્પિતોऽસૌ તરુણાર્કવૃક્ષઃ
સદાગતિસ્તમ્રમરુદ્વિશેષઃ ।
ભસ્માકુલેયં ભયદા ચિતા ચ
કાવ્યાધ્વગં પ્રશ્નમિમં ત્વપૃચ્છત્ ॥ ૨॥

અકાલ એવાત્ર કિમાગતસ્ત્વં -
સ્વયં તદાવર્તનલોલુપોऽભૂત્ ।
વિભ્રામકસ્વપ્ન ઇવેહ કસ્માત્
પૂર્વેદ્યુરાગચ્છમહો નિશાયામ્ ॥ ૩॥

ઉપૈતિ કશ્ચિત્ સુગભીરઘણ્ટા -
નાદોऽત્ર શિપ્રાસરિદમ્બુપાયી ।
શ્મશાનસંશ્ળેષ્યનિલોપનીતો
ઘુષ્યન્મહાકાળસમર્ચવેળામ્ ॥ ૪॥

ચિતાન્તરાળાદિવ મન્દમન્દં
સમુત્થિતો યાતિ કવિસ્ત્વતાન્તઃ ।
અથેહ શિપ્રાપરિમજ્જનેન
શૈત્યં ભજેતાં તનુમાનસે તે ॥ ૫॥

અબોધતો મે હૃદયે ચિતૈકા
કૃતાદ્ય નિર્વાપય તાં તુ શિપ્રે ।

ભવત્કરસ્પર્શવશાદ્ દયાર્દ્રા -
ચ્છાન્તિં ભજેત્ તાપશતાનિ ભદ્રે ॥ ૬॥

નિમજ્જયામાસ કવિશ્ચ શિપ્રા -
સ્નેહાર્દ્રશીતામ્બુષુ નૈકવારમ્ ।
સર્વંસહે યં નિયતેર્નિયોગં
ભયં વિનેત્યાપ સુધીરતાં ચ ॥ ૭॥

સ્મૃતાવિવાનાતપકાન્તિપૂરે
શનૈઃ શનૈર્ગચ્છતિ કાવ્યકારે ।
અન્વિષ્ય ગન્તાસ્મિ ભવન્તમેવં
વદન્ પુરસ્તિષ્ઠતિ પલ્લવશ્ચ ॥ ૮॥

શબ્દોપલબ્ધિર્ન ભવેદ્ વિકારૈ -
ર્હૃદન્તરાળે પરિપૂરિતાભે ।
પરસ્પરં યૌ મનસૈવ વિત્ત -
સ્તયોસ્તુ મૌનં બહુલાર્થપૂર્ણમ્ ॥ ૯॥

સ પલ્લવસ્તેન કવીશ્વરેણ
સાકં સ્વસઙ્કેતગૃહં જગામ ।
ઉપેત્ય સૈષા પરિચારિકાપિ
ખાદ્યાન્નપેયં રુચિરં નિનાય ॥ ૧૦॥

સમશ્યતાં પ્રાતરિહાશનં દ્રા -
ગિહૈવ વિશ્રામ્યતુ ચિત્સુખેન ।
બાલં યથૈવં પ્રિયવાચમુક્ત્વા
તતો જગામાશુ સ પલ્લવોઽપિ ॥ ૧૧॥

પ્રકમ્પનઃ કશ્ચિદિવ પ્રશાન્તઃ
કશ્ચિદ્ ઘનાસાર ઇવાન્ત્યમાપ્તઃ ।
સર્વં બહિઃ શાન્તમિવ પ્રતીતં
ભવેદિદં વા પ્રતિભાસમાત્રમ્ ॥ ૧૨॥

સ્ફુટત્સ્મૃતેર્ગન્ધશતાનિ ભૂયો -
પ્યાશ્ળેષ્ટુકામં મન એવ શત્રુઃ ।
સર્વર્તુસૌન્દર્યવિલેખનાર્થં
વટદ્રુમૂલે મયિ સન્નિવિષ્ટે ॥ ૧૩॥

માર્ગેણ તેનૈવ કિમર્થમાયાત્
સા મે મનઃ સોત્કમભૂત્ કિમર્થમ્ ।
શ્રોતું ચ કાવ્યં મમ સન્નિકર્ષે
તસ્થૌ કિમર્થં નુ નિરક્ષરા સા ॥ ૧૪॥ યુગ્મકમ્
કમપ્યુદારપ્રણયાર્દ્રબન્ધં
વિનાર્થબોધં ધૃતવાન્ કુતોઽહમ્ ।
દ્રક્ષ્યામિ નૈવેતિ સુનિશ્ચિતં તદ્ -
વક્ત્રં કિમર્થં પુનરપ્યપશ્યમ્ ॥ ૧૫॥

સુવર્ણનીડે સ્વયમેવ કસ્માત્
પ્રવેશયામાસ વિચારશૂન્યઃ ।
નીડાન્તરસ્થસ્ય ખગસ્ય દૈન્ય -
જ્ઞાનં વિના લબ્ધમનેન કિં સ્યાત્ ॥ ૧૬॥

ભિત્વાર્ગળં પ્રોડ્ડયનેઽપિ શિષ્ટા -
ન્યથાર્ગળાન્યત્ર બહૂનિ સન્તિ ।
સર્વોઽપિ દાસઃ ક્રિયતે વિલોભૈ -
સ્તિક્તામ્ળકાન્તૈર્મધુભિઃ ફલૈશ્ચ ॥ ૧૭॥

દાસેતરોઽસ્મિન્ ભુવને સમેઽપિ
રાજાધિરાજોઽસ્તિ સ એક એવ ।
પ્રત્યક્ષતો જ્ઞાનમિદં ચ સર્વ -
મન્તેઽખિલં યત્ ખલુ દિવ્યદુઃખમ્ ॥ ૧૮॥

કાવ્યાનિ સર્વાણિ ચ જીવરક્ત -
જન્યાનિ ભૂર્જત્વચિ ભાવિતાનિ ।
સઞ્ચિત્ય નૈજે તુ પુરાણભાણ્ડે
કવીશ્વરો નિક્ષિપતિ ક્રમેણ ॥ ૧૯॥

સમૃદ્ધપુષ્પૈશ્ચ પલાશવૃક્ષૈ -
રુપેતપાર્શ્વદ્વયયા સરણ્યા ।
સુકેતકીસૂનમનોહરેણ
નીવારકેદારહૃદન્તરેણ ॥ ૨૦॥

મધુદ્રવાર્દ્રં સહકારપુષ્પ -

ગન્ધં સ પીત્વા લળિતં યથેષ્ટમ્ ।
મુદા ચરન્મારુતસન્નિભોઽયં
કવિશ્ચ ભૂયોઽપિ ચરિષ્ણુરાસીત્ ॥ ૨૧॥

નામન્ત્ર્ય રાજાનમિતોઽગમિષ્યદ્
ભીરુપ્રવૃત્તિશ્ચ તદાભવિષ્યત્ ।
અતોઽસ્ય સન્દર્શનસમ્મતાર્થં
સ પલ્લવઃ પ્રેષયિતવ્ય એવ ॥ ૨૨॥

ગચ્છામિ ભૂયોઽપ્યનિવાર્યધાર્યં
દુઃખં વહન્નેવ વિધેર્નિયોગાત્ ।
તદા મદીયે હૃદયેઽભવિષ્યત્
સદાપ્યનિર્વાપિતમગ્નિકુણ્ડમ્ ॥ ૨૩॥

દિદૃક્ષિતા સા સકૃદપ્યહો ન
જન્માન્તરેષ્વપ્યસકૃત્ સહર્ષમ્ ।
નિશામ્ય ચામન્ત્રયિતું પ્રિયાં તાં
શશાક નેતિ વ્યથિતં મનો મે ॥ ૨૪॥

શનૈઃ કવાટો વિવૃતશ્ચ ચેતો-
ગતં યથા પલ્લવ આગતોઽભૂત્ ।
આગચ્છ- કિઞ્ચિદ્ ગુરુ વક્તુમસ્તી -
ત્યેતન્મુખં મૌનગિરૈવ વક્તિ ॥ ૨૫॥

વિચાર્ય કાર્યં વિવિધં સુદીર્ઘં
મન્ત્રિપ્રવેકૈઃ સહ ભૂમિપાલઃ ।
અન્તર્ગૃહં સમ્પ્રતિ સન્નિવિષ્ટઃ
પ્રતીક્ષતે તત્ર કવિં ભવન્તમ્ ॥ ૨૬॥

સમાગમો યશ્ચિરકાઙ્ક્ષિતઃ સ
ફલીકૃતશ્ચાપિ જવેન કિન્તુ ।
ગચ્છાગ્રતઃ સૂક્ષ્મતયેતિ ચેતઃ
પુનઃપુનર્મન્ત્રયતીવ ગૂઢમ્ ॥ ૨૭॥

વક્ષ્યામિ નાસત્યમિતિ સ્મરામિ
ભૂયો દૃઢં તદ્ ગણિકોક્તવાક્યમ્ ।
સ્નેહોપહારં વિનયેન દત્તં

તિરસ્કૃતં જ્ઞાપિતવાન્ નૃપઃ સ્યાત્ ॥ ૨૮॥

પરીક્ષિતો મે સુદૃઢાનુરાગ -
સ્તેનાત એવાસમમર્ષપાત્રમ્ ।
કારુણ્યશૂન્યો ભવિતા ચ દણ્ડ -
સ્તસ્ય શ્ચ ઇત્યેવ બલાદ્ વિશઙ્કે ॥ ૨૯॥

પ્રજાધિપોઽન્વિષ્યતિ ચેત્ કવીન્દ્રઃ
સત્યં વદામીતિ દૃઢીચકાર ।
આમુષ્મિકાદૈહિકતોઽપિ તસ્યાં
પ્રેમાસ્તિ મે માળવકન્યકાયામ્ ॥ ૩૦॥

અત્યન્તસઙ્ઘર્ષનિમેષકેષુ
નિશ્શબ્દમન્તર્મથિતેષુ તેષુ ।
સપ્રશ્રયં સોઽપ્યવધાનપુર્વ -
મન્તર્ગૃહં પ્રાપ કવિર્નૃપસ્ય ॥ ૩૧॥

પ્રસાર્ય બાહુદ્વયમાહ ભૂપઃ
સુસ્વાગતં સૌહૃદભાવરમ્યમ્ ।
અથાદરેણોપનિવેશયંસ્તં
ભઙ્ગ્યા બભાષે કુશલાર્દ્રવાચઃ ॥ ૩૨॥

કવેર્મનોઽનસ્તતરઙ્ગવારા -
ન્નિધિશ્ચ શશ્વત્ સમમસ્તશન્તમ્ ।
ઇતિ પ્રજાનન્નપિ લોકરીત્યા
પૃચ્છામિ - સૌખ્યં નુ મહાકવે કિમ્ ॥ ૩૩॥

ઉપક્રમે વાગિયમત્યુદારા
પ્રસ્તાવના કસ્ય તુ નાટકસ્ય ।
ન્યૂનાતિરિક્તેતરમુત્તરં ત -
સ્યોક્ત્વા કવિઃ સ્વાસનસન્નિવિષ્ટઃ ॥ ૩૪॥

યદ્યપ્યશાન્તં હૃદયં તથાપિ
તસ્યાનનં ભાત્યમલપ્રશાન્તમ્ ।
સમાપ્ય નૈજાલસભાષણં સ
રાજા પુનઃ સમ્યગભાષતૈવમ્ ॥ ૩૫॥

ઇહાતિથીભૂય ભવાન્ સમાયાત્
તતોઽધિકો નાભવદેવ કાલઃ ।
તથાપ્યભૂદાત્મપુરી તવેય -
માત્મીયમેષાપ્યકરોત્ કવિં ત્વામ્ ॥ ૩૬॥

અનેન સન્તુષ્ટમભૂન્મનો મે
પ્રાયોગિકં સત્યમિદં ચ જાને ।
સ્વતન્ત્રશીલં હૃદયં કવેસ્તત્ -
સામ્રાજ્યમાનન્ત્યમપારતા ચ ॥ ૩૭॥

એકાન્તતા સા ક્વ કવીષિતા ક્વ
કોલાહલોઽયં હ્યનુભૂયમાનઃ ।
નૈવેહ કાન્તિઃ પ્રકૃતિપ્રિયાત્મ -
પુત્રાભિકામ્યા કૃતકેતરા સા ॥ ૩૮॥

નૈવાનૃષિઃ કાવ્યકૃદિત્યતસ્ત -
સ્યાવશ્યકં તાપસવાટમેકમ્ ।
અતસ્ત્યજેમાં નગરીં વ્રજાબ્દ -
વાસાય તં રામગિરિં પવિત્રમ્ ॥ ૩૯॥

ઇતઃ પ્રયાણાય મનોભિલાષઃ
પ્રયાતુમેવાત્ર નૃપેણ ચોક્તમ્ ।
કુત્રેતિ દેશોક્તિરિયં તુ તસ્ય
વિસ્માપકં સત્યમહો બભૂવ ॥ ૪૦॥

શાન્તિપ્રદો રામગિરિસ્તથાપિ
કસ્તત્ર યાનં પરિનિશ્ચિનોતિ ।
નૃપો નિજેચ્છા કિમુ તસ્ય કાલઃ
કેનાબ્દ ઇત્યેવ વિધિર્વિધેયા ॥ ૪૧॥

ભિષગ્વિધિસ્તિક્તરસેયમત્ર
રોગીપ્સિતં દુગ્ધમતોઽન્યદેવ ।
નિષ્કાસનાજ્ઞા મધુરોક્તિગૂઢા
રાજ્ઞા પ્રદત્તેતિ તુ નગ્નસત્યમ્ ॥ ૪૨॥

પુરી કિલૈષોજ્જયિની મમૈવ
ગતાગતં મેઽત્ર તુ નિશ્ચિનોતિ ।

રાજ્ઞૈવ નાહં પરિસંવૃણોતિ
સત્યં ત્વિદં હા મધુવાઽભયેન ॥ ૪૩॥

રાત્રૌ ચ કાઞ્ચિદ્ ગણિકાં દદૌ યો
હ્યઃ સ્નેહસમ્માનતયા સ એવ ।
તપોવનં હા કવયે ચ મહ્ય-
મન્તે દદાતિ સ્મ દયાસમેતમ્ ॥ ૪૪॥

એવં વિચારસ્ફુટદગ્નિનાળ -
જ્વલત્સ્ફુલિઙ્ગાનિ નિગૃહ્ય ચિત્તે ।
અક્ષોભ્ય એવાસ્તિ કવિર્નિષણ્ણ -
સ્તલ્લોચને કિં જ્વલિતોઽગ્નિનાળઃ ॥ ૪૫॥

પ્રજાધિપો વક્તિ - મનોભિરામા
પરિસ્થિતી રામગિરેરતીવ ।
દૂરે ચ મેઘૈરભિવન્દિતાનિ
શ◌ૃઙ્ગાણિ નીલાચલસાનવશ્ચ ॥ ૪૬॥

આમ્રદ્રુકુઞ્જાનિ વિહઙ્ગમાનાં
ગાનં ચ સૂનોજ્જ્વલપલ્વલાનિ ।
સુગન્ધવાતાર્દ્રતટાશ્ચ તાળ -
લયાશ્ચ તાસાં તરુવલ્લરીણામ્ ॥ ૪૭॥ યુગ્મકમ્
અતુલ્યવાગ્વૈભવરાજશિલ્પિ -
વર્યસ્ય તત્ સર્ગતપોવનં સ્યાત્ ।
સૃષ્ટિર્ભવેત્ તત્પ્રતિભાનિટાલ -
નેત્રોદ્ભવા નિષ્પ્રતિમા કદાચિત્ ॥ ૪૮॥

નૃપઃ પુનશ્ચાહ - વરિષ્ઠસૃષ્ટ્યા
તયા ભવાન્ પ્રાપ્સ્યતિ વત્સરાન્તે ।
ભૂયસ્ત્વમામુજ્જયિનીં દિનં તત્
સુશોભનં હા પ્રતિપાલયામઃ ॥ ૪૯॥

દયાવિશૂન્યં નયતન્ત્રહૃદ્યં
શ્રુત્વા વચો હ્યેવમતીવ શાન્તઃ ।
પ્રતિબ્રવીતિ સ્મ કવિઃ - કૃતજ્ઞો -
સ્મ્યુદારબુદ્ધ્યૈ ભવતે નિતાન્તમ્ ॥ ૫૦॥

અથાવધીહાતિદયામયસ્ત્વ -
માસીશ્ચ નિઃસ્વે મયિ કાવ્યકારે ।
તત્ તેઽધમર્ણોઽહમશક્ત એવ
પ્રતિબ્રવીતું ચ કૃતજ્ઞભાવમ્ ॥ ૫૧॥

એવં કવિશ્ચાત્મવિકારવીચિ-
પ્રવાહમાવૃત્ય વચો બભાષે ।
અન્યેદ્યુરેવોષસિ ગન્તુમદ્યૈ -
વામન્ત્રયામાસ મહીપતિં સઃ ॥ ૫૨॥

ઉદારમેવાહ નૃપશ્ચ - કર્ણી -
રથેન ચાયાન્તિ તદુદ્વહન્તઃ ।
અન્યે ચ ભૃત્યા વિજનો યતો હિ
પન્થાશ્ચ નૈકં દિનરાત્રમસ્તિ ॥ ૫૩॥

કવિશ્ચ બધ્દ્વાઞ્જલિરાહ -માસ્તુ
પદ્ભ્યાં ચરન્નેવ સુશીલિતોઽસ્મિ ।
આમન્ત્ર્ય ભૂયોઽપિ ન કિઞ્ચિદુક્ત્વા
તતસ્તિરોઽભૂદથ કાવ્યકારઃ ॥ ૫૪॥

ગતોઽવતીર્ણો દિવસસ્ત્રિસન્ધ્યા
દૂરાત્ સમાયાત્યનુરક્તવક્ત્રા ।
અંસે વહંસ્તારકમેકમેકો
ધારાધરો ગચ્છતિ પઙ્ગુતુલ્યઃ ॥ ૫૫॥

ઉદેતિ મન્દં વળભૌ કપોત -
યુગ્મસ્ય કણ્ઠાન્મધુરો નિનાદઃ ।
ઉદ્યાનશાખીવિટપેષુ નીડં
પ્રત્યાગતાનાં પતતાં સુગીતમ્ ॥ ૫૬॥

સ્વેન પ્રણીતં મુનિકન્યકાયા
ગીતં વહત્યત્ર યતઃકુતશ્ચિત્ ।
અનેન સાર્ધં હૃદયં કિલૈકં
વિપઞ્ચિકીભૂય રુદત્યથાર્દ્રમ્ ॥ ૫૭॥

વૃથાપ્રતીતિસ્તુ ભવેત્ સદૈકં
પ્રરોદનં શ્રૂયત એવ ચિત્તે ।

અનુપ્રયાત્યેતદહર્નિશં તં
માર્ગેષુ સર્વત્ર ચ કાવ્યપાન્થમ્ ॥ ૫૮॥

નિશેયમેકાપિ તતઃપરં તુ
પરૈવ મે હ્યુજ્જયિની પુરીયમ્ ।
યૈષા દદૌ મે મહિતોપહારાન્
પ્રશસ્તિમુદ્રાશ્ચ મૃષાપવાદાન્ ॥ ૫૯॥

પ્રતિપ્રયચ્છામ્યખિલાનિ તુભ્યં
મા યચ્છ મે તં હ્યયિ રાજધાનિ ।
સમર્પિતં વક્ષસિ તે મયા યં
સ્વીયં યશોમૌક્તિકરમ્યહારમ્ ॥ ૬૦॥

સ પલ્લવસ્તિષ્ઠતિ સન્નિકર્ષે
વક્તવ્યતામૂઢ ઇવાતિમૂકઃ ।
જ્ઞાતં કથઞ્ચિત્ કિલ રાજધાન્યાં
સર્વત્ર યદ્ ગૂઢતયા નૃપોક્તમ્ ॥ ૬૧॥

અન્યાશ્ચ સન્ત્યત્ર કથાઃ કવિર્મા
જાનાતુ યાશ્ચેતિ તુ પલ્લવેચ્છા ।
કવિઃ સ વેશ્યાકુલસઙ્ગમોત્કો
ભવત્યતન્દ્રં મધુપાનસક્તઃ ॥ ૬૨॥

ઇત્યાદિનાનાવિધદુષ્પ્રવાદાઃ
હ્યન્તઃપુરેષુ પ્રસરન્તિ ગૂઢમ્ ।
કવિર્ન જાનાત્વિદમિત્યભીપ્સન્
સ પલ્લ્વોઽપ્યત્ર વિષણ્ણમાસ્તે ॥ ૬૩॥ યુગ્મકમ્
અન્તે ભવાવશ્ચિરવિપ્રયુક્તૌ -
કવિઃ કથઞ્ચિદ્ વિરરામ ચોક્ત્વા ।
પુનશ્ચ મૌનં- સુહૃદઃ કરૌ તૌ
સઙ્ગૃહ્ય વાચં કવિરેવમૂચે ॥ ૬૪॥

ઇતો ગમિષ્યામ્યુષસશ્ચ પૂર્વ-
મિતિ પ્રતિજ્ઞા મમ દુર્વિલઙ્ઘ્યા ।
સખે ન જાનાસ્યપિ કુત્ર વા સા
સુવિસ્તૃતાયામિહ રાજધાન્યામ્ ॥ ૬૫॥

તથાપિ તાં દ્રક્ષ્યસિ હા કદાચિત્
તદા સખે તત્કરયોરથૈતત્ ।
દત્વા પુનર્મદ્વચનાત્ પ્રિયા સા
વાચ્યા- મમ સ્મારકમેતદેવ ॥ ૬૬॥

આદાય નૈજં હૃદયં સુરક્તં
પટ્ટાંશુકેનેવ સમાવૃતં તત્ ।
સ્નેહોપહારં કવિના પ્રદત્તં
સમગ્રહીત્ પલ્લવહસ્તયુગ્મમ્ ॥ ૬૭॥

વિવૃત્ય તત્ પશ્યતિ પલ્લવોઽય -
મહો સુવર્ણાઞ્ચિતશૃઙ્ખલેયમ્ ।
સૈષા તુ રાજ્ઞા કવયે પ્રદત્તા
મિશ્રીભવત્કાઞ્ચનનાગતુલ્યા ॥ ૬૮॥

યસ્યાસ્તિ સર્વસ્વમપાહૃતં તત્
કવેરતઃ કિં સમુપેક્ષણીયમ્ ।
અત્રૈવ કુત્રાપિ નિજાર્ધદેહં
ત્યક્ત્વા કવિર્યાતિ તતોઽર્ધજીવઃ ॥ ૬૯॥

સ્વપ્નો ન કશ્ચિદ્દલિતો ન ચાસ્તિ
યામ્યેવ યાન્ત્યા નિશયા સમેતઃ ।
નાવશ્યકસ્તન્નૃપદત્તદોળા-
ભૃત્યાવલીબદ્ધપરિચ્છદો મે ॥ ૭૦॥

અંસે વહન્નક્ષરભાણ્ડમેતત્
પદ્ભ્યાં ચરન્નેવ સુખં પ્રયામિ ।
અસ્મિન્ પુરીઘોરવને વસન્તિ
ધૃતસ્મિતા હિંસ્રમૃગા મનુષ્યાઃ ॥ ૭૧॥

તત્રાપિ નિત્યવ્યતિરિક્તશોભઃ
કશ્ચિન્મનસ્વી પ્રિયપલ્લવોઽસ્તિ ।
સગદ્ગદસ્તં કવિરાહ- નૈવ
શક્નોમિ ચામન્ત્રયિતું સખે ત્વામ્ ॥ ૭૨॥

ગચ્છાતિસૂક્ષ્મં તવ લક્ષ્યદેશ-
પ્રાપ્તિં દૃઢીકર્તુમિહૈવ પશ્ચાત્ ।

જ્ઞાતું ચ સર્વં સુનિગૂઢરીત્યા
વિદગ્ધચારાક્ષિચયશ્ચકાસ્તિ ॥ ૭૩॥

લબ્ધં મયા ત્વત્પરિચર્યયાત્મ -
સૌખ્યં પ્રભો સજ્જનસઙ્ગતેન ।
ભાગ્યં તદત્રાસ્તમિતં ભવત્યે -
વાતઃપરં ... ક્રન્દતિ પલ્લવોઽસૌ॥ ૭૪॥

અંસે વહન્ ભાણ્ડભરં ચ મન્દં
યદા કવિર્ગોપુરતોઽવતીર્ણઃ ।
સાક્ષીભવત્યસ્ય વિનિઃશ્વસન્ને -
વાયં જ્વલદ્ભિત્તિશિલાપ્રદીપઃ ॥ ૭૫॥

ઇતઃપરં ત્વં પ્રતિગચ્છ - ભૂયઃ
કવિર્બભાષેઽનુગતં સખાયમ્ ।
અનુગ્રહાશ્વાસભરાત્ સ ચક્રે
સાષ્ટાઙ્ગપાતં કવયે પ્રણામમ્ ॥ ૭૬॥

તત્રૈવ તિષ્ઠન્નયમશ્રુપૂર્ણ -
નેત્રેણ યાત્રાશુભમાશશંસ ।
છાયા- કલા - બિન્દુરિતિ ક્રમેણ
ચાન્તર્હિતં તં કવિમેવ માર્ગે ॥ ૭૭॥

નિર્વર્ણ્ય નિર્વર્ણ્ય તથૈવ તસ્થૌ
સ્નેહાકુલત્વં તદચિન્ત્યહેતુ ।
નભશ્ચરઃ કશ્ચિદહો જ્વલિત્વા
ત્વસ્તઙ્ગતઃ કુત્રચિદન્ધકારે ॥ ૭૮॥

---

દ્વાદશઃ સર્ગઃ

કશ્ચિત્ કાન્તાવિરહગુરુણા

કશ્ચિત્ પ્રાણે જ્વલતિ કનકાગ્નિસ્તતઃ સમ્યગુધ -
જ્જ્વાલારૂપં નયનયુગળં ભાસુરં ભાસતે તત્ ।
કાયઃ કસ્માત્ સ ઇહ ભજતે કાર્શ્યકાન્તિં વિયોગાદ્
વર્ષાભોગ્યાજ્જનિતદુરિતાત્ સર્ગતાપાન્નુ તીવ્રાત્ ॥ ૧॥

આલોક્ય ત્વામિહ સવિધગે મય્યથાપૂર્ણનેત્રે

વાત્સલ્યાર્દ્રં કથયતિ ભવાન્ સ્નેહરમ્યં ત્વમેહિ ।
સૌખ્યં કિં વા - કુશલવચનં મે તથૈવાધરોષ્ઠે
જીર્ણપ્રાયં ભવતિ - સુખદુઃખાતિવર્તી ભવાન્ કિમ્ ॥ ૨॥

દુઃખં વા સ્યાત્ સુખમથ ભવેચ્છૈત્યમત્યુગ્રતાપઃ
સૃષ્ટિં કર્તું યદિ ભવતિ હા પદ્મપીઠોપરિસ્થઃ ।
સત્યસ્યાસ્યાવરકકનકપ્રૌઢપાત્રોજ્જ્વલાભા
પ્રાતઃસન્ધ્યા તદનુ મધુરા યાતિ સા ચ ત્રિસન્ધ્યા ॥ ૩॥

એકસ્યાશ્ચેચ્ચલનવિગતૌ સત્યમક્ષ્ણઃ પ્રભા સ્યા -
દન્યસ્યાશ્ચેત્તદિહ તમસાપૂર્ણયામા ત્રિયામા ।
બ્રૂતે સત્યં હૃદયમિહ ચેત્ સાવધાનશ્ચ કર્ણો
માયારજ્જુસ્તદિદમખિલં નૈવ સત્યં યથાર્થમ્ ॥ ૪॥

અબ્દો હ્યેકઃ સમતિગત એવેહ તૂર્ણં કિમિત્થં
તુષ્ટ્યાત્યન્તં કથયતિ ભવાન્ માં સ્મ શાન્તાન્તરઙ્ગઃ ।
વર્ષાભોગ્યઃ કિમયમધિવાસોઽસ્તિ - પપ્રચ્છ ચાહં
તત્ત્વં - કાલાવધિરવસિતા કિં -ભવાનાહ શીઘ્રમ્ ॥ ૫॥

યદ્યપ્યેવં ત્વવસિતમહાદણ્ડકાલાવધેર્મે
બદ્ધસ્યાર્દ્રં પ્રણયિ હૃદયં બન્ધનાગારકેઽસ્મિન્ ।
પૌરાકીર્ણં નગરમથ તત્ કિં મહારણ્યમેવ
સ્વાન્તઃશાન્તિપ્રદમિહ પ્રકૃત્યમ્બિકોત્સઙ્ગરઙ્ગમ્ ॥ ૬॥

નાપૃચ્છં ત્વામત ઇહ કુતસ્તેઽયમેકાન્તવાસઃ
પૃથ્વ્યામસ્યાં તવ કતિવિધાઃ સન્તિ ગન્તવ્યદેશાઃ ।
આરણ્યેઽસ્મિન્ પ્રકૃતિરુચિરે જાનકીસ્નાનપુણ્યો -
દારાઃ શીતાઃ સલિલઝરિકા નૈકપક્ષિપ્રભેદાઃ ॥ ૭॥

શશ્વત્પુષ્પાણ્યવકિરદરણ્યોત્થસત્કેસરાણાં
પર્ણસ્પન્દા મધુકરતતિઃ કીચકાનાં ચ દણ્ડાઃ ।
સમ્ભૂયૈતે ધરણિતલદેવાલયેઽસ્મિન્ પ્રકુર્વત્ -
સઙ્ગીતે ત્વં કિમુ સુખનિમગ્નોઽભવો જીવનાખ્યે ॥ ૮॥

નિદ્રાલોલે મયિ ચ ધરણૌ નિત્યમસ્યાં શયાને
વાત્સલ્યાર્દ્રં લળિતમધુરં ત્વત્યગાધાત્ કુતશ્ચિત્ ।
જાનામ્યેતત્ સરતિ હૃદયસ્પન્દનં મે સિરાસુ

નાન્યઃ કેષામહમિહ ભવામીતિ વાચં બ્રવીષિ ॥ ૯॥

અત્રાત્યન્તં પ્રિયહૃદયયા માતૃદેવ્યા સમેતઃ
સોદર્યૈર્હા ખગમૃગલતાપાદપૈશ્ચાપિ સાકમ્ ।
જ્ઞાત્વા સ્નેહપ્રસૃતવચનૈઃ સમ્યગન્યોન્યમેવં
વાસં ચક્રે સકુતુકમિહૈવૈકગેહે યથા સ્યાત્ ॥ ૧૦॥

દીર્ઘં સંવત્સરમિહ ભવાન્ નીતવાન્ સ્વચ્છસૌખ્યા -
દિત્થં જ્ઞાત્વા મમ તુ નિતરામસ્તિ સાન્ત્વસ્તથાપિ ।
ત્યક્તું સદ્યઃ પ્રભવતિ ભવાનુજ્જયિન્યાઃ સ્મૃતિં કિં
નૈતત્ સાધ્યં ત્વિહ જનુષિ મે ચેતિ કિં ત્વં બ્રવીષિ ॥ ૧૧॥

કિન્ત્વન્વેષ્ટું પ્રતિવચ ઇવાત્યન્તમૂકઃ કુતશ્ચિ -
દ્દૂરે દૃષ્ટ્વા સવિધમુપવિશ્યોચિષે વાચમેવમ્ ।
અન્તર્બાષ્પાણિ ચ મમ સમુહ્યામ્બુવાહઃ પુરીં તાં
ગન્તું હન્ત પ્રચલતિ સદા કશ્ચિદાર્દ્રાન્તરાત્મા ॥ ૧૨॥

હૃદ્રક્તેનાલિખિતમિહ યન્મેઘસન્દેશકાવ્યં
તસ્ય સ્નિગ્ધપ્રણયરુચિરામબ્રવીસ્ત્વં કથાં મામ્ ।
કશ્ચિદ્ યક્ષોઽભવદિહ ભવાનુજ્જયિન્યાઽઽળકાત્વં
પ્રાપ્તા ચાસૌ નૃપતિરધિકારોગ્રમત્તઃ કુબેરઃ ॥ ૧૩॥

નિર્લીનાત્મા બહુતરમભૂદાત્મતુલ્યપ્રિયાયા -
મિત્થં ચક્રે કઠિનમપરાધં કિલાયં ચ યક્ષઃ ।
એકાન્તાયાં ગિરિતટભુવિ પ્રાપ ચાત્રોગ્રદણ્ડં
વર્ષાભોગ્યપ્રવિતતવિયોગેન વાસાય સોઽયમ્ ॥ ૧૪॥

યક્ષઃ કાન્તાવિરહદહને તત્ર જાજ્જ્વલ્યમાને
દેહે ચૈવં મનસિ ચ કૃશે તપ્યમાને યુવાયમ્ ।
આષાઢસ્ય પ્રથમદિવસે મેચકં મેઘમેકં
ક્રીડામગ્નં ગજમિવ નભોમણ્ડલસ્થં દદર્શ ॥ ૧૫॥

અઞ્જલ્યાસૌ કુટજકુસુમાન્ વર્ષયિત્વા ચ તસ્મૈ
પ્રીતઃ પ્રીતિપ્રમુખવચનં સ્વાગતં વ્યાજહાર ।
કિઞ્ચિદ્ વક્તું ભવતિ નિકટે યસ્ય નૈકોઽપિ સોઽયં
મેઘાયાસ્મૈ સ્વયમથ ગિરા ચાબ્રવીદાત્મવૃત્તમ્ ॥ ૧૬॥

અલ્પો વાયુર્જલમતિમનોહારિ વિદ્યુચ્ચ ધૂમો -
પ્યેષાં યોગાત્ સમુદિતશરીરોઽયમાસ્તે ક્વ મેઘઃ ।
સન્દેશાર્થઃ ક્વ ચ પટુનિબોદ્ધવ્યચૈતન્યયુક્તઃ
કામાર્તાનાં ન ખલુ સ વિભેદાર્થચિન્તાવિવેકઃ ॥ ૧૭॥

કોઽપૂર્વોઽસૌ હૃદયરુચિરો યક્ષસઙ્કલ્પ એવે -
ત્યાવિશ્ચિન્તે મમ તુ નયને પશ્યસીવાભિલાષમ્ ।
કાવ્યં તત્ ત્વં પ્રથમમિહ મે નિર્ધનાયાલપસ્યે -
વૈતસ્મૈ હા ન ખલુ વિભવે સાર્વભૌમોત્તમાય ॥ ૧૮॥

નદ્યઃ પુર્યો ગિરિશિખરકાશ્ચારુમાલાનિ સમ્યક્
સદ્યઃ સીરોત્કષણસુરભીણ્યમ્બુકચ્છા મૃગાણામ્ ।
સ્વાદ્યોદ્ભિન્નપ્રથમમુકુળારમ્ભરમ્ભાશ્ચ માર્ગા -
શ્ચક્રાઙ્ગાનાં બિસકિસલયચ્છેદપાથેયભાજામ્ ॥ ૧૯॥

વાટીવ્રાતઃ કકુભસુરભિઃ પક્વજમ્બૂફલૈરા -
શ્યામારણ્યાન્યટવિકવધૂભુક્તિરમ્યાન્તરાણિ ।
ક્રીડાકુઞ્જાન્યુદયનકથાકોવિદગ્રામવૃદ્ધા -
લાપૈરુચ્ચૈર્મુખરિતજનાકીર્ણકેન્દ્રસ્થલાનિ ॥ ૨૦॥

ઉચ્ચારાવૈર્ગૃહબલિભુજાં ગ્રામચૈત્યાનિ દૃશ્યા -
ન્યલ્પાસારૈઃ કુસુમિતકદમ્બદ્રુવાટાનિ શાન્તે ।
સન્ધ્યાકાલે શિવબલિસમારબ્ધભેરીનિનાદઃ
પ્રાકારશ્ચાપ્યમૃતકિરણોત્તંસદેવાલયસ્ય ॥ ૨૧॥

ગેહોત્કણ્ઠાકુલિતમનસં ત્વાં વિધત્તે યદેતત્
સર્વં દૃશ્યં મમ નયનયોરગ્રતો માળવીયમ્ ।
ભ્રામ્યત્યસ્યોપરિ ચ સકલસ્યાત્તવૃષ્ટિઃ સ કો વા
કામાકારો ભવતિ મુદિરશ્ચિત્તમાર્દ્રં કવેર્વા ॥ ૨૨॥ વિશેષકમ્
જાનામ્યર્થં તવ તુ વચસો યન્ન શક્નોમિ હાતું
જન્મન્યસ્મિન્ હૃદયનિહિતામુજ્જયિન્યાઃ સ્મૃતિં મે ।
વક્રઃ પન્થા ભવતુ ભવતઃ સ્વલ્પમપ્યુજ્જયિન્યાઃ
સૌધોત્સઙ્ગપ્રણયવિમુખો મા ચ ભૂરિત્યવાદીઃ ॥ ૨૩॥

મેઘાય ત્વં તદનુ નગરી સા ચ સૌન્દર્યયુક્તં
સ્વર્ગસ્યૈકં શકલમિતિ ચાપ્યાહ શિપ્રાનદીસ્થમ્ ।

પદ્મોદ્ગન્ધં પટુ મદકળં ચારવં સારસાનાં
હૃદ્યોદારં સ્મરસિ મૃદુલં સમ્યગમ્ળાનરમ્યમ્ ॥ ૨૪॥

જીવત્યેષા વિરહવિધુરા પ્રેયસી તેઽળકાયાં
છાયાત્વેનાકલિતવપુષીહ ત્વયા હ્યુજ્જયિન્યાઃ ।
તત્રાગારં ધનપતિગૃહસ્યોત્તરેણાસ્તિ યસ્મિન્
ચેતોહારી સુરધનુરિવ પ્રેક્ષ્યતે તોરણૌઘઃ ॥ ૨૫॥

યસ્યોદ્યાને વિલસતિ તયા વર્દ્ધિતા કાન્તયૈકા
મન્દારશ્રીઃ કિસલયસુમોપાત્તભારાવનમ્રા ।
આરાદ્ધું યામિવ કુરવકા માધવી સીધુગન્ધા
રક્તાશોકોઽપિ ચ સવિનયસ્તત્ર રાજન્તિ ચારાત્ ॥ ૨૬॥

દ્વારોપાન્તે લિખિતવપુષૌ શઙ્ખપદ્મૌ ચ દૃશ્યૌ
ગેહાન્તે સા ભવતિ વિરહાર્તા હિ ચાલેખ્યમાને ।
યસ્યાશ્ચિત્રે સપદિ ભજતે વેપથુઃ કિં કરૌ તે
વર્ષત્યસ્માન્નયનયુગળાત્ કિં સુતપ્તાશ્રુધારા ॥ ૨૭॥

કાર્શ્યં ગાત્રે ભવતિ કૃશતા મધ્યદેશેઽપિ ચાસ્તે
શ્રોણીભારાદલસગમના દૃશ્યતે નિમ્નનાભિઃ ।
નમ્રાઙ્ગી યા ચકિતહરિણીચઞ્ચલપ્રેક્ષણા સા
ધાતુઃ સૃષ્ટિષ્વિહ યુવતિવૃન્દેષુ ચાદ્યૈવ નૂનમ્ ॥ ૨૮॥

ચિત્તે ભિત્તૌ વિરહવિધુરસ્યાત્મનાથસ્ય રૂપં
ચિત્રીકર્તું કૃશતરમતીવેયમુદ્યોગિની સ્યાત્ ।
પૃચ્છન્તી સ્યાત્ સ્મૃતિમધુગિરા પઞ્જરસ્થાં શુકીં ત્વં
ભર્તારં મે સ્મરસિ કરુણાર્દ્રં ચ ત્વલ્લાળનોત્કમ્ ॥ ૨૯॥

ઉત્સઙ્ગસ્થાં મલિનવસનાયાં ચ તસ્યાં વિપઞ્ચી -
મુદ્ગાયન્ત્યાં મધુરમથ તદ્બાષ્પપાતાત્ સમાર્દ્રામ્ ।
મૃદ્વિં તન્ત્રીં પુનરિહ મુહુઃ સારયન્ત્યાં ચ રાગં
વિસ્મૃત્યાર્તે મનસિ નિહિતં ખિન્નખિન્ના ભવેત્ સા ॥ ૩૦॥

તાળં કૃત્વા દશશતદળાન્તેષ્વથાયાતિ યો વા
શીતો વાયુઃ સ ઇવ ભવતો ભાવના નૃત્યતીહ ।
ઉજ્જૈનીસ્થા વિમલહૃદયા માળવગ્રામકન્યા
યાસાવત્ર પ્રણયવિધુરા યક્ષપત્ની બભૂવ ॥ ૩૧॥

તસ્યા ભર્તા સ્વયમપિ તથા સ્નેહકારુણ્યપૂર્ણો
મેઘો યસ્યા નિકટભુવિ ચ પ્રોષિતસ્તત્ર ગત્વા ।
ભક્તિશ્રદ્ધાભરિતહૃદયઃ શ્રાવયત્યાદરાત્ તં
સન્દેશાર્થં પવનતનયો મૈથિલીં તામિવ પ્રાક્ ॥ ૩૨॥

ભર્તુર્મિત્રં પ્રિયમવિધવેઽહં સમાવેદયે તે
તત્સન્દેશં શ્રવણમધુરં વિદ્ધિ માં વારિદં યઃ ।
મન્દ્રસ્નિગ્ધધ્વનિભિરુદિતૈર્દૂરદેશં ગતેષુ
પ્રેયસ્યાલિઙ્ગનકુતુકિતાં વર્ધયત્યધ્વગેષુ ॥ ૩૩॥

વિશ્વસ્તોઽહં મનસિ સદયં ધાર્યતાં - ત્વાં વિચિન્ત્યૈ-
વાસ્તે પ્રેયાન્ દુરિતરહિતો રામગિર્યાશ્રમેષુ ।
ઇત્યર્ધોક્તે પઠનવિરતો મેઘદૂતસ્ય સદ્યો
ભૂયો ભૂયો રણરણિકયા વર્ધતે ગદ્ગદઃ કિમ્ ॥ ૩૪॥

શુભ્રજ્યોત્સ્નાપુળકિતનિશીથે ગવાક્ષસ્ય પશ્ચાત્
ક્ષાન્તિં ત્યક્ત્વા પુનરિહ સદાશાવહં રૂપમેકમ્ ।
તત્રોદ્દીપ્તં નયનયુગળં જાલકસ્યાવકાશાદ્
વીતાલમ્બં કરતલયુગં લમ્બમાનં મનોજ્ઞમ્ ॥ ૩૫॥

સ્વસ્મિન્ વક્ત્રે કરતલયુગં તત્તુ વિન્યસ્ય લબ્ધઃ
સ્વર્ગાનન્દઃ - પુનરપિ તદા સ્મર્યતે સર્વમેતત્ ।
કાવ્યે ચાસ્મિન્ કથિતમિતરત્ પ્રત્યભિજ્ઞાનવાક્યં
યત્તન્નૂનં રુચિરકવિતૌચિત્યસઙ્કલ્પજન્યમ્ ॥ ૩૬॥ યુગ્મકમ્
પૂર્ણં કૃત્વા વિરમતિ ભવાન્ તચ્ચ સન્દેશકાવ્યં
સ્વીયં રક્તં મુહુરિહ કણૈરલ્પકૈઃ પ્રોક્ષતીવ ।
સન્દેશં ત્વં વિરહવિધુરાં તાં દ્રુતં શ્રાવયિત્વા
પ્રત્યાગન્તું મુદિરમમુનૈવાધ્વના યાચતે ચ ॥ ૩૭॥

મા ભૂદિત્થં તવ ચ વિરહઃ કાન્તયા વિદ્યુતાપી -
ત્યેવં તસ્મૈ વદસિ મહદાશંસિતં સ્વોપકર્ત્રે ।
કાવ્યાલાપો વિરમતિ તદા મારુતઃ સન્નિકૃષ્ટ -
શ્ચક્રે વૃષ્ટિં બકુળકુસુમૈસ્તત્ર સમ્યક્ સમન્તાત્ ॥ ૩૮॥

સાન્નિધ્યં મે કિમુ ન ભવતા સ્મર્યતે દૂરતસ્તે

સઞ્ચારોત્કં ભવતિ નયનં વિસ્તૃતાકાશસીમ્નિ ।
તામેકાન્તે વિરહવિધુરાં મદ્બહિઃપ્રાણભૂતાં
સન્દેશં મે કથયિતુમયે મેઘ કિં પ્રાભવસ્ત્વમ્ ॥ ૩૯ ॥

સા મે કાન્તા કિમપિ વચનં ત્વન્મુખેનાબ્રવીત્ કિં
જીવન્તી વા કથમથ ભવાન્ વક્તુમેતત્ સમસ્તમ્ ।
આગન્તા કિં ત્વરિતમથવા નૈવ ચાયાસ્યસિ ત્વં
દૃશ્યન્તે તે વદનકમલે નૈકભાવાન્તરાણિ ॥ ૪૦ ॥

કારુણ્યાર્દ્રાં પ્રકૃતિમતુલાં કાનનીયામિમાં ત્વાં
પશ્યસ્યેકં પ્રતિનવમિવાશ્ચર્યભૂતં મનોજ્ઞમ્ ।
આરાદાસીત્તવ તુ પરિચર્યોત્સુકેયં ચ વૃક્ષ -
ચ્છાયાભૂતા કિસલયમયી ચામરા સૂર્યતાપે ॥ ૪૧ ॥

નિદ્રાં કર્તું પરિસૃતતૃણાપૂર્ણશય્યા પ્રબોધ -
પ્રોદ્યુક્તોઽયં વિહગનિવહો નિર્મલો નિર્ઝરૌઘઃ ।
માધુર્યાર્દ્રં ફલમિતિ મનોહારિ વૈવિધ્યપૂર્ણં
તત્સાન્નિધ્યં સુવિદિતમભૂત્ કિન્નુ તે સર્વદાપિ ॥ ૪૨ ॥

વૃક્ષચ્છાયા વિરહદુરિતસ્યાબ્દદીર્ઘસ્ય મૂકા
સાક્ષિણ્યેષા ભવતિ ભવતઃ સર્ગદુઃખસ્ય ચાપિ ।
મૂલે ચૈતદ્વિપિનબકુળસ્યોપવિષ્ટઃ ખલુ ત્વં
યાત્રાક્ળેશાદ્ બહુષુ દિનરાત્રેષુ ભૂયઃ પુરા કિમ્ ॥ ૪૩ ॥

યદ્યપ્યેષા ધરણિરખિલા ગેહ એવ સ્વકીયો
વિસ્તીર્ણસ્તે તદપિ ચિરકર્મોત્થબન્ધેન ચેયમ્ ।
વૃક્ષચ્છાયા કથમપિ વિહાતું ન શક્યા ભવેત્ કિં
તિષ્ઠસ્યેવં ધૃતવપુરિહાહત્ય દુઃખં નિતાન્તમ્ ॥ ૪૪ ॥

ગચ્છાવોથેત્યવદદવનમ્ય સ્વયં ભાણ્ડભારં
ધૃત્વા સ્વાંસે સપદિ ચ ભવાન્ ચિત્તદાર્ઢ્યેન સાકમ્ ।
પૃચ્છામ્યેવં ગમનમિહ નાવુજ્જયિન્યુન્મુખં કિં
ક્ષિપ્રં ચૈવાગતમથ તથેત્યુત્તરં ત્વન્મુખાબ્જાત્ ॥ ૪૫ ॥

નૈવૈતન્મે ગમનમિહ તત્રત્યસમ્રાટ્સમક્ષં
નૈવાદાતું બહુમતિમિમાં કાવ્યસૃષ્ટિં સમર્પ્ય ।
અન્યત્ કિં વા ફલમિતિ મયા નૈવ પૃષ્ટં ત્વયા નૈ -

વોક્તં ચાપીત્યનુપદમિતઃ પ્રસ્થિતું પ્રારભેથામ્ ॥ ૪૬॥

ત્રયોદશઃ સર્ગઃ

પુનરપ્યુજ્જયિનીં પ્રતિ

છાયાપ્રદં પ્રણમતે બકુળં સ સંસ્પ -
ર્શ્યામન્ત્રણોત્સુક ઇવાદરપૂર્ણમારાત્ ।
વાતેરિતાનિ કતિચિત્ કુસુમાનિ હસ્તે -
નાદાય જિઘ્રતિ ચ તન્મૃદુગન્ધપૂરમ્ ॥ ૧॥

નિક્ષિપ્ય તાન્યપિ તતો બૃહતિ સ્વભાણ્ડે
સોપાનતોઽવતરસિ પ્રથમાત્ ત્વમસ્માત્ ।
પશ્ચાદહં ચ પથિ તે પ્રતિમૂર્તિકલ્પો
નિઃશબ્દસાક્ષિસદૃશશ્ચ ચરામિ મન્દમ્ ॥ ૨॥

પ્રાતઃપ્રભૃત્યધિકદૂરમથા પ્રદોષં
ગત્વા ચ પાર્શ્વતરુમૂલતલેષુ ચાન્તઃ ।
વિશ્રમ્ય પાવનપુરાતનચૈત્યકેષુ
વ્યાધોપજીવિતકુટીષુ વનાન્તરેષુ ॥ ૩॥

જીર્ણેષુ સત્રનિવહેષુ ચ રાત્રિકાલે
નિદ્રામુખેન શયનીયસુખં ચ લબ્ધ્વા ।
આરણ્યપક્ષિતતિકીર્તનમાલયા સ-
મુત્થાય ચાલ્પપથિભક્ષ્યરુચા ચરાવ ॥ ૪॥ યુગ્મકમ્
માર્ગે ચ તત્ર પથિકાન્તરપાદમુદ્રા
દૃષ્ટા ભવન્તિ પરિવર્તત એવ શબ્દઃ ।
આવાં વિશાલગહનસ્થલિકામતિક્ર -
મ્યારાદહો જનપદાન્તમનુપ્રવિષ્ટૌ ॥ ૫॥

એકાહદૂરમિત એવ ભવેદવાપ્તૌ
સ્યાવાદ્ય એવ હિ તદુજ્જયિનીં પ્રદોષે ।
જ્યોત્સ્ના ભવિષ્યતિ નિશામુખપૂર્વયામ
એવેતિ કિઞ્ચન વિચિન્ત્ય ભવાનવોચત્ ॥ ૬॥

જ્ઞાતું ન કેનચિદિહાધૃતવિપ્રભિક્ષુ -
વેષો ભવાનગમદગ્રત એવ વેગાત્ ।

સાધ્વન્તરોચિતવપુષ્યહમપ્યથાવાં
પ્રાપ્તૌ પુરીપરિસરે નવગોપુરાગ્રે ॥ ૭॥

વિઘ્નં ન કશ્ચન ચકાર પથિ ક્વચિન્નૌ
કો વાત્ર વારયતિ ભૂસુરભિક્ષુવર્ગમ્ ।
આવાં સુખેન ચરતઃ સ્મ ચ શુક્ળપક્ષ -
ચન્દ્રાદ્યયામકિરણેષુ સુદુર્બલેષુ ॥ ૮॥

અસ્યાઙ્ગણસ્થસકલસ્થલબિન્દવોઽપિ
હ્યુદ્દીપયન્તિ વિવિધસ્મરણાનિ ભૂયઃ ।
અદ્યાત્ર સૂક્ષ્મવિકસત્કુસુમસ્ય ગન્ધે -
નાનીયતે ગતમહાનુભવસ્મૃતિશ્ચ ॥ ૯॥

એવં નવીનજનનાન્તરસન્નિભેઽસ્મિન્
માર્ગે કવિશ્ચરતિ સૌહૃદસુપ્રબુદ્ધઃ ।
વાતાયનં સકલમેવ સમાવૃતં ચ -
સ્યાસ્તે સ સૌધમવલોક્ય તમુચ્છ્વસન્ કિમ્ ॥ ૧૦॥

અન્વિષ્યતે યદિહ સદ્મ તવેક્ષિતેન
તજ્જ્ઞાનમસ્તિ ન હિ મે તદિહાનુયામિ ।
વૈદગ્ધ્યતો વિરહિતઃ પરદર્શનેભ્યો
માર્ગેઽન્તરા ક્વચિદથાત્મસુગુપ્તિમાપ્તઃ ॥ ૧૧॥

ત્યક્ત્વા પુનસ્ત્વજિરવીથિમિહાન્તરાળ -
પથ્યન્તરેણ વસતેઃ પુરતઃ સ્થિતોઽસિ ।
નાન્તઃ પ્રવિશ્ય સહસા ક્ષણમાત્રમત્ર
તિષ્ઠન્નથાન્તરિકમેવ નિરીક્ષસે ત્વમ્ ॥ ૧૨॥

અન્તઃ પ્રકાશયતિ કશ્ચન દીપકોઽસૌ
મન્દં સમાહ્વયસિ દેહળિકાગતસ્ત્વમ્ ।
સ્પૃષ્ટ્વા કવાટમથ પલ્લવ ઇત્યનેન
નામ્ના હ્યતીવમૃદુપલ્લવસુસ્વરેણ ॥ ૧૩॥

આજ્ઞાનુસારમિહ તે સ્થિતવાનહં તુ
છાયાન્તરં કિમપિ સંશ્રિત એવ પશ્ચાત્ ।
મન્ત્રસ્ય પલ્લવ ઇતિ પ્રથિતસ્ય તસ્ય
જાપેન કિં સ્વયમિતો વિવૃતં કવાટમ્ ॥ ૧૪॥

નૈવ સ્વયં વિવૃતમત્ર વિવૃત્ય ગેહ -
દ્વારં સ પલ્લવ ઇહૈવ સમાગતોઽસ્તિ ।
યદ્યપ્યહં પ્રથમમેવ નિશામયામિ
સોઽયં ચિરન્તનસુહૃત્સદૃશો મમાસ્તે ॥ ૧૫॥

સોઽયં ભવન્તમિહ ન પ્રથમં વિવેદ
સત્યં ભવાંશ્ચ પરિવર્તિત એવ નૂનમ્ ।
કાષાયવસ્ત્રમપસાર્ય જવેન ભૈક્ષં
સાક્ષાત્સ્વરૂપમથ દર્શિતવાનસિ ત્વમ્ ॥ ૧૬॥

પશ્યન્ મુહુર્મુહુરપીહ ભવન્તમેવ
સ્થિત્વાઞ્જસાદ્ભુતવિકસ્વરલોચનોઽસૌ ।
ઉચ્ચૈરથોચ્ચરિતવાન્ પ્રિયકાળિદાસ -
શબ્દં તુ ભૂતપરિબાધિતવત્ સહર્ષમ્ ॥ ૧૭॥

વિન્યસ્ય મન્ત્રયતિ કિન્ત્વધરેઽઙ્ગુલિં સ
મા મેતિ નાગમમિહાદ્ય તુ કળિદાસઃ ।
કિંત્વસ્મિ તે પ્રિયપુરાતનમિત્રમેવ
મા મા બ્રવીતુ મમ નામ પુરઃ પરેષામ્ ॥ ૧૮॥

કેશાદિપાદમિહ સાતિશયં નિરીક્ષ્ય
ત્વામાહ ગદ્ગદગિરા સ તુ પલ્લવાખ્યઃ ।
અર્ધીભવત્તવ શરીરમિદં ચ વર્ષે -
ણૈકેન સોઢમતિદુઃખભરં વ્યનક્તિ ॥ ૧૯॥

નૈવ ; ત્વહં પરમતુષ્ટિમવાપમેવ
ચૈકાન્તવાસસમયે કિલ રામશૈલે ।
પ્રત્યાગતં ચ ભવતા યદિદં ત્વકસ્મા -
દત્યર્થમસ્ય નયને ગિરિ ચાશુ મોદાત્ ॥ ૨૦॥

નાહં પરૈરિહ ચ દૃશ્ય ઇતિ બ્રુવન્ને -
વાન્તઃપ્રવિશ્ય ભવનસ્ય  ભવાંશ્ચ તસ્થૌ ।
પાનોપચારમકરોદથ દીર્ઘયાત્રા -
પ્રત્યાગતદ્વિકકૃતે - કવયે ચ મે ચ ॥ ૨૧॥

સત્કારમપ્યનતિદીર્ઘસુભાષણં ચ

સર્વં ચકાર નિભૃતં વિગતારવં ચ ।
પ્રત્યાગતિં તુ મહિતોજ્જયિની કિમર્થં
જાનાતિ મે પુનરિયં - તવ ચોદ્યમેતત્ ॥ ૨૨॥

ભાવત્કનિર્ગમનતઃ પરમત્ર નાસ્ત્યે-
કાહો યદા ન કથિતં તવ નામ રાજ્ઞા ।
આસ્થાનગાયકવરાશ્ચ વિપઞ્ચિકાયાં
ગાયન્તિ કર્ણમધુરં તવ કાવ્યજાતમ્ ॥ ૨૩॥

જાનાતિ યદ્યવનિપસ્તવ ચાગતિં પ્ર -
ત્યુદ્યાત્યસંશયમિહાન્યનૃપં યથા ત્વમ્ ।
શેષં સમસ્તમપિ તેઽસ્તુ યથાહિતં ચે -
ત્યુક્ત્વા વિનિઃશ્વસતિ હા પ્રિયપલ્લવોઽસૌ ॥ ૨૪॥

અક્ષોભ્ય એવ સકલં તુ ભવાન્ નિશમ્ય
તિષ્ઠત્યહં તદવલોક્ય ચ વિસ્મિતોઽસ્મિ ।
સઙ્ગૃહ્ય પલ્લવકરં વિવૃતાખિલાત્મ -
ભાવં દદૌ સ્વહૃદયં ચ ભવાનિવાસ્મૈ ॥ ૨૫॥

શાન્તશ્ચ દીનહૃદયશ્ચ ભવાન્ સ્વકીય -
શિષ્ટાભિલાષમથ તં વદતીહ મન્દમ્ ।
સાક્ષી તુ કેવલમિહાસ્ય વિદૂરકોણે
તિષ્ઠન્નહં ચ મૃદુરસ્તમયંશ્ચ દીપઃ ॥ ૨૬॥

સ્નેહાલુરત્ર મયિ હા પ્રિયપલ્લવસ્ત્વ -
મેવેતિ વચ્મિ કમિદં ચ સખે ત્વદન્યમ્ ।
નૈવાગ્રહોઽસ્તિ વસિતું ચ મમોજ્જયિન્યા -
મેવં ન મે બહુમતિં સમવામુમિચ્છા ॥ ૨૭॥

અસ્મિંસ્તુ જન્મનિ મમાસ્ત્યભિલાષ એક -
સ્તત્પૂરણાય તવ દેહિ સહાયહસ્તમ્ ।
જીવોઽપરોઽસ્તિ મમ સા કથમપ્યતસ્તાં
દૃષ્ટ્વા કૃતાર્થહૃદયસ્ત્વચિરેણ યામિ ॥ ૨૮॥

અન્તઃપુરે નૃપવધૂરમણીયરત્ન -
હર્મ્યેઽથવા વિવિધશિલ્પવિચિત્રકુડ્યે ।
શાલાસુ વા નટનગેહગતાસુ ગમ્ભી-

રોદારસુન્દરકૃતાસુ મહાનટીનામ્ ॥ ૨૯॥

દેવાલયેષુ ચ સમર્પિતદેવદાસી-
ગેહેષુ વા ધરણિદેવસમૃદ્ધિમત્સુ ।
અન્યત્ર વા ભવતિ સા કિમિયં મમાશા
દ્રષ્ટું ચ તાં સકૃદતઃ પ્રતિયામિ શીઘ્રમ્ ॥ ૩૦॥ યુગ્મકમ્

વક્તવ્યમેવ કિમિદં કથમત્ર વક્તું
શક્યં યદેતદનભિજ્ઞતયાસ્તબોધઃ ।
નેત્રે ત્વકારણભયં ત્વિવ વર્તમાનં
વાગ્ભિર્નિગૂહિતમિવાશુ ગુહાન્તરે ચ ॥ ૩૧॥

એવંવિધા ભવતિ પલ્લવભાવરૂપ -
સાધારણસ્થિતિરયં ચ વિષાદમૂકઃ ।
હસ્તેન હસ્તમપિ તે પરિગૃહ્ય દક્ષિ -
ણાશાગતેન તુ પથા નયતિ ક્રમેણ ॥ ૩૨॥

અસ્તાચલોન્મુખગતોઽસ્તિ ચ શીતભાનુ -
રાસન્નમૃત્યુરિવ હા ક્ષયકાસરોગી ।
ભૂમૌ શનૈઃ પતતિ યો ગગનપ્રકાશ -
સ્તસ્યૈવ ચાસ્ફુટમનાતપવદ્ ભવાવઃ ॥ ૩૩॥

ગચ્છત્યસૌ ચ ભવતા સહ પલ્લવોઽપિ
ગેહાઙ્ગણસ્ય કુહચિત્ કિલ પાર્શ્વભાગે ।
તિષ્ઠત્યસાવિહ સુમાઞ્ચિતકાયમાન -
કલ્પં પુરોઽસ્તિ નવનીતશિલાકુટીરમ્ ॥ ૩૪॥

આન્દોળિકા ભવતિ કાચન મણ્ડપેઽસ્મિન્
મન્દારજાતિશતભીરુસિતસ્રગાઢ્યા ।
સમ્યગ્વિભૂષિતવતી પુરતશ્ચ યસ્યા
મન્દં જ્વલત્કિરણકોઽસ્તિ શિલાપ્રદીપઃ ॥ ૩૫॥

સઞ્જલ્પિતું કિમપિ ન પ્રભવંસ્તથૈવ
તસ્થૌ તદા પરવશઃ ખલુ પલ્લવોઽસૌ ।
એતન્નિગૂઢતરકારણકાર્યભાવં
જ્ઞાતું ન શક્ત ઇતિ હા સ્થિતવાન્ ભવાંશ્ચ ॥ ૩૬॥

ગ્રામે પુરા પ્રકૃતિમોહનમાળવાખ્યે

યા ડોલિકા ગગનસીમ્નિ તિરોહિતા સા ।
તસ્યાઃ પટાવરણતઃ કમપિ પ્રગાઢ -
મન્વેષયત્સસલિલં નયનદ્વયં ચ ॥ ૩૭॥

ભૂયોઽપિ હા સ્મૃતિપથે સહસા સમાયા -
ત્યાહાત્ર મિત્રમપિ હૃન્નિહિતસ્વહસ્તઃ ।
આન્દોળિકેયમિહ હા ભવતઃ પ્રિયાયાઃ
સ્થાનેઽવશિષ્યતિ ચ તત્સ્મૃતિમાવહન્તી ॥ ૩૮॥ યુગ્મકમ્
યાતા ક્વ સા વદ સખે પ્રિયવલ્લભાયાઃ
સ્થાને કથં ભવતિ હા ખલુ ડોલિકેયમ્ ।
એવં જવાદ્ ભવતિ પૃચ્છતિ પલ્લવોઽપિ
કિં વચ્મિ હેત્યતુલસમ્ભ્રમમાનસોઽભૂત્ ॥ ૩૯॥

ગાઢં પુનઃ સ તુ કવેઃ સુકરં ગૃહીત્વા
તસ્થૌ વિમૂકમથ મન્દમુવાચ ચૈવમ્ ।
વક્ષ્યામ્યહં સકલમેવ દુરન્તવૃત્તં
ત્વદ્યાનતઃપરમિહોજ્જયિનીપુરીસ્થમ્ ॥ ૪૦॥

---

## ચતુર્દશઃ સર્ગઃ

### આન્દોળિકાયાઃ કથા

ઉચ્ચસ્થઃ પૂર્ણચન્દ્રોઽસ્તમયતેઽસમયે યથા ।
તથા તસ્મિન્ કવિશ્રેષ્ઠે નિષ્ક્રામતિ કુતશ્ચન ॥ ૧॥

ખિન્નાશ્ચારાધકાસ્તસ્ય ચાન્વિષ્યતિ પરસ્પરમ્ ।
કુત્રાગચ્છત્ કિમર્થં વા કથં વેતિ કદેતિ વા ॥ ૨॥

કિમાસીદાત્મમિત્રં સ કવિર્નશ્ચક્રવર્તિનઃ ।
કિમાસીત્ સત્કવિઃ સોઽયમુજ્જયિન્યાઃ સુભૂષણમ્ ॥ ૩॥

અપ્રતીક્ષિતમેતત્તુ તિરોધાનં કિમર્થકમ્ ।
ઇત્યચિન્તિ પરં તસ્ય સુમનોભિઃ સુહૃત્તમૈઃ ॥ ૪॥ યુગ્મકમ્
વાર્તા યથેચ્છં નિર્માય વ્યાપયન્તિ દિવાનિશમ્ ।
પ્રતિકારત્વરાદગ્ધાઃ કવિકીર્ત્યભિલાષુકાઃ ॥ ૫॥

પ્રણયોઽભૂચ્ચક્રવર્તિસહોદર્યાં કવેઃ કિલ ।
બહૂનવિનયાન્યન્યાન્યપિ ચક્રે કવિઃ કિલ ॥ ૬॥

જ્ઞાત્વૈતત્ સકલં રાજા ક્રુદ્ધોઽભૂદિત્યનન્તરમ્ ।
આજ્ઞાં ચકારોજ્જયિનીં ત્યક્ત્વા ગન્તુમિતિ ક્ષણાત્ ॥ ૭॥

ઇત્થં નિરાકૃતો લજ્જાનમ્રશીર્ષઃ કુતશ્ચન ।
નિશ્ચક્રામ કવિસ્ત્વેવં વ્યાપ્નુવન્ બહુધા કથાઃ ॥ ૮॥

સત્કૃત્યારાધિતવતીં રાજકીયામુદારતામ્ ।
ધિક્ ચક્રે કિં કવીન્દ્રોઽયં નિર્દયત્વેન કેવલમ્ ॥ ૯॥

સ્વચ્છન્દાય વિહારાય સ્વાતન્ત્ર્યં યો મુદા દદૌ ।
વિશ્વાસં તં વઞ્ચિતવાન્ કવિઃ કિં સ નરાધમઃ ॥ ૧૦॥

શ્રુતં સર્વં સત્યમિતિ વિચિન્ત્યાહુશ્ચ કેચન ।
શુશ્રૂષવોઽભવન્ કેચિત્ સત્યં નિર્મલમશ્રુતમ્ ॥ ૧૧॥

કવેરભાવે રાજા તુ મૌનમેવ ભજન્ સ્વયમ્ ।
ખિન્નવદ્ ભવતિ સ્મૈવં બહવો દિવસા ગતાઃ ॥ ૧૨॥

ઋતુમઙ્ગલસંશુદ્ધં પ્રથમં કુસુમં વહન્ ।
દ્વારં ગતોઽભૂદ્ ભૂયોઽપિ વસન્તર્તુર્યથાપુરમ્ ॥ ૧૩॥

બાલાતપઃ સુવર્ણાભો હૃદ્યાલાપઃ પિકસ્ય ચ ।
શતવર્ણલયોલ્લાસઃ પ્રમદોદ્યાનતલ્લજે ॥ ૧૪॥

મધુવાચાં સુન્દરીણાં રાગનૈવેદ્યમેવ ચ ।
અથૈવં હૃદયં ભૂપો વિષાદાત્ પ્રવિમુક્તયે ॥ ૧૫॥

ઋતૂત્સવમદોન્માદલહરીં પુનરિચ્છતિ ।
વ્રણિતોઽપિ મુહુર્વંશો ગાયત્યેવાનિલાગમે ॥ ૧૬॥ યુગ્મકમ્
ભૂયોઽપિ જાગરૂકાભૂન્નાટ્યગેહોપશાલિકા ।
નાટ્યાચાર્યાઃ સમાયાન્તિ વિદગ્ધનટસંયુતાઃ ॥ ૧૭॥

અસ્મિન્ વર્ષે વિક્રમોર્વશીયમેવ પ્રયોજયેત્ ।
ઇત્યાશા વિક્રમાદિત્યમાનસેઽઙ્કુરિતા કિલ ॥ ૧૮॥

પુરા માળવિકા યાઽઽભૂત્ તથા ચાપિ શકુન્તળા ।
સૈવ કન્યા પ્રયોગેઽસ્મિન્નુર્વશ્યપિ ભવિષ્યતિ ॥ ૧૯॥

કુમારિકાયાસ્તસ્યાસ્તદુર્વશીવેષદર્શનમ્ ।

સર્વેષામભિલાષોઽસ્તિ રાજ્ઞઃ કિલ વિશેષતઃ ॥ ૨૦॥

સૂત્રધારાઙ્ગુલીકૢપ્તચલનાનુસૃતં તથા ।
ચઞ્ચ્યા ચલતિ તદ્વત્ સા ચલત્યેવૈકયન્ત્રવત્ ॥ ૨૧॥

અભ્યાસાનન્તરં તસ્યાશ્ચિન્તયન્ત્યાઃ પુરોભુવિ ।
આયાતિ સ્મ સસન્તોષં ચક્રવર્તી કદાચન ॥ ૨૨॥

નાજાનાત્તં નૃપં સા સ્વામભિનન્દિતુમાગતમ્ ।
પ્રત્યુજ્જગામ તં નૈવ ભક્ત્યાદરપુરસ્સરમ્ ॥ ૨૩॥

ન દુર્વાસા નૃપસ્તસ્માન્ન શશાપ રુષા ચ તામ્ ।
ક્ષમાવાનિવ તત્રૈવ તસ્થાવસ્વસ્થમાનસઃ ॥ ૨૪॥

આચાર્યે સ્મારયત્યશ્રુ ધારયન્તી નિરન્તરમ્ ।
ન કિઞ્ચનાપિ કમપિ વક્તું શક્તા સ્થિતૈવ સા ॥ ૨૫॥

સ્મૃત્વા કં વા તયા તસ્થૌ સ્થાયિ કિં નયને ભયમ્ ।
રઙ્ગે હિત્વા સ્મિતસુમં તન્મુખે કિં ન રાજતે ॥ ૨૬॥

તથાપિ સાક્ષાજ્જીવત્યેવોર્વશીત્વેન રઙ્ગકે ।
અન્યત્ સર્વં તદા નૂનં વિસ્મરત્યવનીપતિઃ ॥ ૨૭॥

ચરિતં નૃપતેઃ શત્રુવિજયસ્યૈવ કેવલમ્ ।
વિજિતાસ્તેન શકવત્પરાક્રમપરાયણઃ ॥ ૨૮॥

તસ્ય વાકાટકા રાષ્ટ્રકૂટાશ્ચ સુહૃદઃ પરમ્ ।
દક્ષિણે દિશિ સખ્યં તદ્ દુર્ગમેવ સુનિર્મિતમ્ ॥ ૨૯॥

ધ્વજં સ્થાપિતવાન્ તસ્ય દુર્ગસ્યોપરિ વિક્રમઃ ।
સુતાં પ્રભાવતીં દત્વા વાકાટકમહીપતેઃ ॥ ૩૦॥

અસૌ વિધિવશાદ્ રાજ્ઞી ત્વકાલે વિધવાભવત્ ।
તથાપિ પુત્રસ્ય કૃતે રાજ્યભારમુવાહ સા ॥ ૩૧॥

નૈસર્ગિકી સુખાસક્તિઃ સુતે યદ્યપ્યવર્ધત ।
તથાપિ રાજ્યં દુઃખાર્તા તસ્મિન્નેવ નિચિક્ષિપે ॥ ૩૨॥

વિક્રમાર્કોઽપ્યુત્સવસ્ય પ્રદદૌ ચ નિમન્ત્રણમ્ ।
સર્વેભ્યો મિત્રરાજેભ્યઃ સ્વદૌહિત્રનૃપાય ચ ॥ ૩૩॥

તતઃ સમાગતસ્તત્ર મુદા ચૈત્રમહામહઃ ।
રઙ્ગપ્રદીપાઃ સર્વત્ર પ્રજ્વલન્ત્યધિકાધિકમ્ ॥ ૩૪॥

વિક્રમાર્કઃ સમાયાતિ મિત્રરાજવરૈઃ સહ ।
તથા પ્રવરસેનોઽપ્યાયાતિ દૌહિત્રભૂપતિઃ ॥ ૩૫॥

અતિવાત્સલ્યપૂર્વં સ પિતામહનૃપાલકઃ ।
કરં ગૃહીત્વા દૌહિત્રમુપવેશયતિ ક્ષણાત્ ॥ ૩૬॥

તદ્દૃશ્યદર્શને હર્ષબાષ્પધારાકુલાભવત્ ।
પ્રભાવતી ચ- નૈપથ્યમભૂત્ સઙ્ગીતતુન્દિલમ્ ॥ ૩૭॥

ઉન્નીયતે યવનિકા રઙ્ગભૂમિરનાવૃતા ।
પ્રેક્ષકાક્ષીવ હૃદયં સમુત્ફુલ્લં ચ વર્તતે ॥ ૩૮॥

પુરૂરવા હેમકૂટાત્ પ્રત્યાગચ્છતિ સત્વરમ્ ।
તત્સુવર્ણરથાન્મન્દમવરોહત્યથોર્વશી ॥ ૩૯॥

તદારભ્યાન્તિમં રઙ્ગં યાવદત્ર પ્રશોભતે ।
ઉર્વશીવેષધારિણ્યાઃ પ્રયોગકૃતહસ્તતા ॥ ૪૦॥

તસ્યાં મુગ્ધમના ભૂત્વા દૌહિત્રયુવભૂમિપઃ ।
પિતામહસ્ય સાન્નિધ્યેઽપ્યાનન્દવિવશોઽભવત્ ॥ ૪૧॥

પઞ્ચાઙ્કેષ્વથ પૂર્ણેષુ મઙ્ગલોદ્ગીતપૂર્વકમ્ ।
નાટકાન્તે યવનિકા સંવૃણોતિ ચ વેદિકામ્ ॥ ૪૨॥

તદ્દિનેઽપ્યભિનેતારઃ સર્વે સાઞ્જલયો દ્રુતમ્ ।
નૃપોત્તમસ્ય સવિધમાગચ્છતિ યથાપુરમ્ ॥ ૪૩॥

ન પશ્યન્તી મુખં કસ્યાપ્યાનતાસ્યા કૃતાઞ્જલિઃ ।
આગમ્ય યા ગતા તત્ર નૈવ તસ્થૌ કલામપિ ॥ ૪૪॥

કો વા નિઃસઙ્ગભાવોઽસ્યા મુખેઽસ્તીતિ સસંભ્રમમ્ ।
શ્રદ્ધાનોઽભવત્ કિં સ ગૂઢં વિક્રમભૂમિપઃ ॥ ૪૫॥

નિર્મમે નયતન્ત્રે સુશિક્ષણં ચ તતોઽધિકમ્ ।
માતુશ્ચાતન્દ્રવાત્સલ્યમપિ યં સમનીયત ॥ ૪૬॥

સત્પથેન યુવા સોઽપિ નૃપઃ પ્રવરસેનકઃ ।
દિવાનિશં પશ્યતિ હા હૃદિ તાં દેવસુન્દરીમ્ ॥ ૪૭॥

માતૈવ શરણં સૈવ વાત્સલ્યં સાન્ત્વનં તથા ।
તસ્માત્ પુત્રઃ સાભિલાષં માતુરગ્રે ન્યવેદયત્ ॥ ૪૮॥

પ્રભાવત્યા યથા નૈજપુત્રઃ પ્રવરસેનકઃ ।
તથા સાપિ પિતુઃ પ્રીતિભાજનં સમભૂત્ સદા ॥ ૪૯॥

તસ્માદાદરપૂર્વં સા જગામ પિતૃસન્નિધૌ ।
પ્રિયપુત્રસ્યાભિલાષં નિવેદયિતુમઞ્જસા ॥ ૫૦॥

નિઃશબ્દં સર્વમેવાસૌ શુશ્રાવાવહિતાશયઃ ।
શાન્તશ્ચ કિન્તુ ન પ્રત્યુવાચ ચિન્તાકુલો નૃપઃ ॥ ૫૧॥

પુત્ર્યા યદુક્તં તત્ તસ્ય પ્રત્યભાદહિતં કિમુ ।
ન કિમઙ્ગીકરોત્યેષ સુતાયાસ્તં મનોરથમ્ ॥ ૫૨॥

યદા તત્ કન્યકારત્નં સ્વીયં કર્તુમકામ્યત ।
તદારભ્ય નૃપસ્યાભૂદ્ ભૂયો ભૂયોઽશુભોત્કરઃ ॥ ૫૩॥

વિશ્વપ્રકાશકં રત્નમપરં લજ્જયા વિના ।
નૃપેણ યત્ પરિત્યક્તં તસ્યાપીયં હિ કારણમ્ ॥ ૫૪॥

તથાપિ તસ્યા નિઃસઙ્ગભાવોઽયં કિં નૃપં પ્રતિ ।
તામેવ ચિન્તયિત્વા કિં તપત્યન્તઃ પુનઃ પુનઃ ॥ ૫૫॥

ક્રન્દત્યહો કિં સારઙ્ગી કાપિ નાટ્યગૃહાન્તરે ।
કશ્ચિત્ સન્તપ્તહૃદયસ્પન્દઃ કિં નૂપુરારવઃ ॥ ૫૬॥

વિસ્મર્તું તન્માળવીયલાવણ્યં શક્યતે કથમ્ ।
એવં દુઃખાગ્નિરેકોઽસ્મિન્ હૃદયે જાજ્વલીતિ કિમ્ ॥ ૫૭॥

કિં કર્મમૂઢો રાજાસૌ મન્ત્રિભિર્મન્ત્રયત્યલમ્ ।
પિત્રર્થં નિજતારુણ્યં પરિતત્યાજ કિં પુરુઃ ॥ ૫૮॥

વવ્રે નિત્યબ્રહ્મચર્યં ભીષ્મઃ કિન્નુ પિતુઃ કૃતે ।
સાહસં તત્ સુતાર્થં તુ ત્યાગો ધર્મો ન સંશયઃ ॥ ૫૯॥ યુગ્મકમ્
વાત્સલ્યસ્નિગ્ધમાધુર્યમાપ્નોતિ નૃપહૃત્તટમ્ ।
પુત્ર્યાઃ કૃતે પુનઃ પુત્રીપુત્રસ્ય ચ કૃતે શનૈઃ ॥ ૬૦॥

નવ્યપ્રભાતવેળાયાં ચન્દ્રરશ્મિવ્રજો યથા ।

લીયતે હૃદયામોદશીતળઃ સ મનોરથઃ ॥ ૬૧॥

આમન્ત્રણાર્થં તિષ્ઠન્તીં પુત્રયુક્તાં પ્રભાવતીમ્ ।
વાત્સલ્યાર્દ્રો નૃપો વક્તિ યથેચ્છં વાં ભવત્વિતિ ॥ ૬૨॥

ઋતૂત્સવઃ સમાપ્તસ્તે ગતાશ્ચાતિથયઃ સમે ।
વાકાટકમહીપાલો ન ગત્વાત્રાવશિષ્યતે ॥ ૬૩॥

અન્યેદ્યુઃ સપ્ત ચાન્દોળાઃ સ્થિતા રાજગૃહાઙ્ગણે ।
અગ્રે પ્રવરસેનસ્ય પ્રભાવત્યાસ્તતઃ પરમ્ ॥ ૬૪॥

તતઃ પઞ્ચસુ ડોલાસુ નીતાઃ પઞ્ચ કુમારિકાઃ ।
આનીયતે સા પ્રથમં સખીભિઃ પરિવારિતા ॥ ૬૫॥ યુગ્મકમ્
પૂર્વેદ્યુર્નાટ્યશાલાયામુર્વશીવેષધારિણી ।
રરાજ યા સૈવ ચાત્ર પૂર્વમાનીયતે શનૈઃ ॥ ૬૬॥

વિભૂષણવિહીનૈવ શાલીના ચારુતા હિ સા ।
તસ્યાઃ સખ્યશ્ચતસ્રોઽન્તઃપુરસ્થાસ્તદનન્તરમ્ ॥ ૬૭॥

નેત્રમાર્દ્રં વિક્રમસ્ય ભવત્યસ્યાઃ સમીક્ષણે ।
આત્મન્યેવ વિલીયન્તે સન્તપ્તાશ્રૂણિ કિં તદા ॥ ૬૮॥

ગૌરવં ન પરિત્યજ્ય તિષ્ઠત્યત્ર મહીપતિઃ ।
અસૌ માળવકન્યા તુ ન પશ્યતિ પરિસ્થિતાન્ ॥ ૬૯॥

શુભ્રવસ્ત્રં સ્વલ્પમાત્રમલઙ્કારાસ્તથાપિ સા ।
સમ્પશ્યમાના સર્વૈરપ્યપ્સરા ઇવ રાજતે ॥ ૭૦॥

કાલાખ્યનેત્રપક્ષ્માગ્રે સાન્દ્રીભૂતા વિલમ્બિની ।
વિલોલતરળા બાષ્પબિન્દુવત્ સા વિરાજતે ॥ ૭૧॥

શિબિકાવાહકાનાં સુમન્દ્રગમ્ભીરસંરવૈઃ ।
સપ્ત ચાન્દોળિકાઃ શીઘ્રં પુરોગચ્છતિ પઙ્ક્તિશઃ ॥ ૭૨॥

એષા ચોજ્જયિનીગાઢકામિતા મુક્તિકાપરા ।
અતિગચ્છતિ હા કુત્ર તદ્વાસઃ સ્યાદિતઃપરમ્ ॥ ૭૩॥

ન શક્યં શુક્તિકામેવ પ્રતિગન્તુમિતઃપરમ્ ।
વારાન્નિધાવેવ ભૂયઃ પતનં ચાપિ દુર્ઘટમ્ ॥ ૭૪॥

સ્વાયત્તીકૃતવાન્ યસ્તાં મુક્તાં સોઽપ્યચિરાદહો ।

અન્યસ્મૈ પ્રદદાત્યેતદ્દુરન્તં નાવસીયતે ॥ ૭૫॥

રક્ષાર્થં પુરતઃ સન્તિ હયારૂઢાશ્ચ સૈનિકાઃ ।
પશ્ચાત્ત્વશ્વાકૃષ્ટદીર્ઘવાહનાનાં પરમ્પરા ॥ ૭૬॥

વાહનાનિ સુપૂર્ણાનિ ભાણ્ડૈર્ભારભૃતૈસ્તથા ।
સપ્તાહયાત્રાભુક્ત્યર્થમિષ્ટપાથેયસઞ્ચયૈઃ ॥ ૭૭॥

ચતુર્નરભૃતઃ કર્ણીરથઃ સઞ્ચરતિ દ્રુતમ્ ।
અષ્ટપાદો જન્તુરિવ દીર્ઘરમ્યપથે ભુવિ ॥ ૭૮॥

ક્રમેણ ચાવરુહ્યન્તે સપ્ત ચાન્દોળિકાઃ પથિ ।
તમોયામેષુ ચાયાસશ્રાન્ત્યૈ સઙ્કેતસીમસુ ॥ ૭૯॥

સપ્તાહયાત્રાસન્ધ્યાસુ પ્રતિસઙ્કેતમન્દિરમ્ ।
ડોલાવરૂઢાન્ સકલાન્ પ્રત્યુદ્ગન્તું યથાવિધિ ॥ ૮૦॥

વિશ્રામગેહેષ્વાનેતું દાતું ચેષ્ટસુભક્ષણમ્ ।
ભયભક્તિયુતાસ્તસ્થુર્નૃપસેવકસંહતિઃ ॥ ૮૧॥

દિનદીર્ઘા ચ યાત્રાથ વિશ્રાન્તિભજનં નિશિ ।
અતઃપરં ત્વહોરાત્રમેકમેવાવશિષ્યતે ॥ ૮૨॥

રેવાયાશ્ચાપરે પારે વાકાટકમહીપતેઃ ।
પ્રિયં જનપદં ભક્ત્યાદરાત્ પ્રત્યુદ્ગમિષ્યતિ ॥ ૮૩॥

એવં ષષ્ઠી સમાયાતા સન્ધ્યા તત્ર યથાપુરમ્ ।
સઙ્કેતે વિરતિં પ્રાપ્તા સપ્ત ચાન્દોળિકાગતિઃ ॥ ૮૪॥

ડોલાવરૂઢાન્ મનુજાન્ ભક્ત્યાદરપુરઃસરમ્ ।
પ્રત્યુદ્ગન્તું સમાયાતા નૃપાલપરિસેવકાઃ ॥ ૮૫॥

વિક્રમાર્કમહીપસ્ય પ્રિયપુત્રી પ્રભાવતી ।
તસ્યાઃ પુત્રશ્ચ વિશ્રાન્તિગેહમુદ્દિશ્ય જગ્મતુઃ ॥ ૮૬॥

પશ્ચાદ્ભવાયા ડોલાયાઃ પટાનાવરણે સમૈઃ ।
દૃશ્યતે મીલિતાક્ષી સા શયાનૈવ ચ કન્યકા ॥ ૮૭॥

સખ્યસ્તામાહ્વયન્ત્યુચ્ચૈઃ સ્વરૈરથ સસંભ્રમમ્ ।
નિદ્રાણેવ સુખં સા તુ દૃશ્યતે શયનાસને ॥ ૮૮॥

કિમિત્યન્વિષ્યન્તિ સર્વે સોદ્વેગં તદનન્તરમ્ ।
જાનન્તિ સત્યમેકં તદ્ વિસ્મયસ્તબ્ધમાનસાઃ ॥ ૮૯॥

નિરાહારા ભવન્ત્યાસીદ્ દિનસપ્તકમત્ર સા ।
સખીભિઃ પ્રેરિતાયાં તુ નિઃશબ્દૈરાસને સ્થિતા ॥ ૯૦॥

મૃત્યુશ્યામમરાળેન દષ્ટં યદ્ બિસસૂત્રકમ્ ।
તત્સન્નિભેન હસ્તેન વિન્યસ્તં ચ નિજોરસિ ॥ ૯૧॥

દુકૂલં દૃશ્યતે યસ્મિન્ રાજમુદ્રોજ્જ્વલાઙ્કિતા ।
સુવર્ણશૃઙ્ખલા રમ્યનવરત્નવિરાજિતા ॥ ૯૨॥ યુગ્મકમ્
દત્વાન્ત્યચુમ્બનં ફાલે ક્ષૌમેનાવૃત્ય વિગ્રહમ્ ।
રાજમાતાપિ સન્તપ્તા તસ્યાસ્તસ્મિન્ જડે તદા ॥ ૯૩॥

અશ્રૂણ્યન્ત્યોદકત્વેન પાતયામાસ સન્તતમ્ ।
માળવસ્યાઙ્કુ એવાન્ત્યતલ્પં માળવિકાવૃતમ્ ॥ ૯૪॥ યુગ્મકમ્
આન્દોળષટ્કં નૃવહં માળવાત્ પુરતોઽગમત્ ।
નૃશૂન્યયા ડોલિકયા ત્વૈકયા ચાપરે જનાઃ ॥ ૯૫॥

દુઃખભારેણ સન્તપ્તાઃ પ્રતિજગ્મુર્મહાપુરીમ્ ।
સ્મર્તું સ્મૃત્વાશુ માર્ષ્ટું ચ ડોલૈવેહાવશિષ્યતે ॥ ૯૬॥ યુગ્મકમ્
નવનીતશિલામણ્ડપેઽસ્મિન્ ડોલાં નિચિક્ષિપે ।
યત્ર રાજ્ઞા પ્રજ્જ્વલિતા ચૈકા સૌવર્ણવર્તિકા ॥ ૯૭॥

અદ્યાપિ નૈવ નિર્વાણા વર્તતે કિમિયં પુરઃ ।
ભગ્નસ્ય તસ્ય પ્રણયદીપસ્ય પ્રાણનાળિકા ॥ ૯૮॥ યુગ્મકમ્
વિરામચિહ્નમેતસ્યાઃ કથાયાઃ પલ્લવોઽકરોત્ ।
દુઃખબાષ્પેણ ન દ્રષ્ટુમનયોસ્તુ પરસ્પરમ્ ॥ ૯૯॥

શક્યતે કિન્ત્વાત્મતાપમુભૌ જાનીત એવ કિમ્ ।
તસ્માત્ કિં પલ્લવઃ સમ્યગાશ્લિષ્યતિ સુહૃત્કવિમ્ ॥ ૧૦૦॥ યુગ્મકમ્
અથ તત્સ્વર્ણડોલાયાઃ પુરતસ્તત્ર મીલતઃ ।
દીપસ્ય પુરતઃ સ્વીયં દૂતકાવ્યં સમાર્પયત્ ॥ ૧૦૧॥

તચ્ચ કાવ્યં કવેઃ સ્નેહદુઃખાનામક્ષરાત્મકમ્ ।
રૂપમેવાસ્ય હૃદયમેવ તચ્છાન્તસુન્દરમ્ ॥ ૧૦૨॥

આન્દોળિકાન્તર્દૃષ્ટ્વાસૌ પશ્યન્ કિઞ્ચિદિવ સ્થિતઃ ।

અશ્રાવ્યવેગં વાતેનાવ્યક્તમાક્રન્દનં યથા ॥ ૧૦૩॥

અપ્રત્યક્ષો બભૂવાસૌ કવિઃ શૂન્યે તમસ્યહો ।
કાલોઽપિ પૂર્ણનૈશ્ચલ્યં પ્રાપેવૈકનિમેષકે ॥ ૧૦૪॥ યુગ્મકમ્
નિખિલં શબ્દજાતં યત્ તદસ્તઙ્ગમિતં કિમુ ।
અપ્રત્યક્ષોઽભવત્ કાલબોધોઽપીતિ પ્રતીયતે ॥ ૧૦૫॥

સર્વં સ્વપ્નોઽભવત્ કિન્નુ કિં વા સ્વપ્નસ્ય સત્યતા ।
સ્વપ્ન ઇત્યુચ્યતે સત્યસ્યૈવ માયામુખં કિમુ ॥ ૧૦૬॥

અસંખ્યાનાં દુરૂહાણાં સમસ્યાનાં ચ પૂર્તયે ।
કાલે તપતિ યો દૃશ્યપ્રપઞ્ચાદ્ ભૌતિકાદતઃ ॥ ૧૦૭॥

નિશ્ચક્રામ કવિઃ સોઽયં સઞ્ચરત્યધુનાપિ કિમ્ ।
હૃદ્યસૂક્ષ્મધ્વનીન્ કુર્વન્ મર્ત્યચિત્તેષુ સન્તતમ્ ॥ ૧૦૮॥ યુગ્મકમ્
મમાવબોધોજ્જ્વલભૂર્જપત્રે
વ્યાલેખિતાં તેન ચ સત્યગાથામ્ ।
ગાયામિ કાલે પથિ - સોત્સુકાન્ નઃ
કુર્વન્તુ જન્માન્તરસૌહૃદાનિ ॥ ૧૦૯॥

---

Original Malyalam poem by ONV Kurup
Sanskrit text by NVP Unithiri

Popularly known as ONV, ONV Kurup (b. 1931) is one of the major poets of Kerala. He has authored more than 25 works in Malayalam and has won many awards including Soviet Land Nehru Award, Central Sahitya Academy Award and Bharatiya Bhasha Parishad Award. He has been conferred Padmasri in 1998 .

NVP Unithiri (b. 1945) is presently Professor and Head of the Department of Sanskrit, University of Calicut, Kerala.
Author of more than 20 books in Malayalam and Sanskrit, he has to his credit many papers in various research journals.

The text encoded by NVP Unithiri unithiri@sify.com, anandavardhanan@yahoo.com

*Poem on Ujjayini*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*